# महाभारतम्- सभापर्व

## लक्षालङ्कारटीका-पाठान्तरादिसहितम् (क्रिटिकल् एडिशन्)

## भाग-1




सम्पादकः

सि. आर. प्रदीपसिंहाचार्यः चतुर्वेदः



प्रकाशनम्

वेद-वेदान्ताध्ययनशोधसंस्थानम्

वसन्तकुञ्ज, नवदेहली

विश्वविद्याग्रन्थमाला -2

वेदवेदान्ताध्ययनशोधसंस्थानम्

# श्रीमन्महाभारतम्

श्रीमन्महाभारततात्पर्यनिर्णय-महाभारतलक्षालङ्कारानुसारि-

प्राचीनतौळवपाठ-पाठान्तरादिसंवलितम्

# सभापर्व-१

सम्पादकः

सि. आर्. प्रदीपसिंहाचार्यः, चतुर्वेदः

उपसम्पादकाः

देवीप्रसादाचार्यः, आर् विठोबाचार्यः, श्रीनिधि.वि

प्रकाशनम्

वेद-वेदान्ताध्ययनशोधसंस्थानम्.

वसन्तकुञ्ज, नवदेहली.

2018

**विश्वविद्याग्रन्थमाला- 2**

# श्रीमन्महाभारतम्

**श्रीमन्महाभारततात्पर्यनिर्णय-महाभारतलक्षालङ्कारानुसारि-प्राचीनतौळवपाठ-पाठान्तरादिसंवलितम्**

**सम्पादकः** : सि. आर् प्रदीपसिंहाचार्यः, चतुर्वेदः
**उपसम्पादकाः** : देवीप्रसादाचार्यः, आर् विठोबाचार्यः, श्रीनिधि.वि

**प्रकाशनम् :** **वेद-वेदान्ताध्ययनशोधसंस्थानम्.**
**वसन्तकुञ्ज, नवदेहली.**

© **सर्वे अधिकाराः स्वायत्तीकृताः**

**प्रथममुद्रणम् :** **2018**

**ISBN :** **978-81-998471-3-2**

**पृष्ठसङ्ख्या :** **12+246**

**प्रतयः :** **250**

**मूल्यम् :** **200 रूप्यकाणि**

**मुखचित्रविन्यासः:** **कार्तिकः**

**मुद्रणालयः:** **वागर्थ. बेङ्गळूरु**

Vedic Vedantic Studies & Research Institute

# Śrīmanmahābhāratam

# Sabhāparva vol-1

**"Following the Mahābhāratatātparyanirṇaya and Lakṣālaṅkāra; including the Ancient Tulu Recension and Variant Readings.**

**Edited by:**

**C. R. Pradeepa simha achaya, chaturveda.**

**Sub-editors**

Devīprasādācārya, R.Viṭhobācārya, Śrīnidhi, v.

**Published by:**

**Vedic Vedantic Studies & Research Institute**

**(Eetablished under SRI RAMA VITTALA SHIKSHANA SEVA SAMITI New Delhi)**

Sri Krishna Dhama, Plot No-3, Phase-II, Institutional Area,
vasant Kunj, New Delhi-110070

**2018**

**Vishvavidyagranthamala -2**

Śrīmanmahābhāratam - Sabhāparva vol-1

"Following the Mahābhāratatātparyanirṇaya and Lakṣālaṅkāra;
including the Ancient Tulu Recension and Variant Readings.

**Edited by:** **C. R**. vd. **Pradeepa simha achaya, chaturveda.**

**Sub-editors :** **Devīprasādācārya, R. Viṭhobācārya, Śrīnidhi, v.**

**Published by:** **Vedic Vedantic Studies & Research Institute**
(Eetablished under SRI RAMA VITTALA SHIKSHANA SEVA SAMITI New Delhi)
Sri Krishna Dhama, Plot No-3, Phase-II, Institutional Area,

**ISBN :** **978-81-998471-1-8**

**Edition:** **2018**

**copies :** **250**

©: Publishers

**Price:** **200**

**pages** **246**

**printed by:** vagartha.Bangalore

# जगद्गुरुश्रीमन्मध्वाचार्यमूलमहासंस्थानम्

**पेजावरअधोक्षजमठः,उडुपि**

## अनुग्रहसन्देशः

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥

श्रीमन्महाभारतं नाम पञ्चमो वेदः, भारतीयसंस्कृतेरमूल्यनिधिरूपञ्च। तत्र पाण्डवानां अभ्युदयस्य तथा कौरवपाण्डवयोर्महासङ्घर्षस्य बीजारोपणस्य साक्षीभूतं 'सभापर्व' अत्यन्तं महत्त्वं भजते। अधुना प्रकाश्यमाने प्रथमभागे सभाक्रियापर्वतः आरभ्य जरासन्धवधपर्वपर्यन्तं विद्यमानविषयाः सविस्तरं निरूपिताः। मयासुरेण निर्मिताया अद्भुतमायासभायाः वर्णनं, नारद-मुनिना वर्णिताः लोकपालसभाः, तथा राजसूययागस्य निर्विघ्नपरिसमाप्तये श्रीकृष्णकृतः मगधराजस्य जरासन्धस्य वधोपायः - इत्यादयः सर्वेऽपि अंशा अत्र प्रस्तुताः। धर्मस्य सूक्ष्मागतिं, राजनीतिं च अवगन्तुम् एते अध्यायाः दर्पणायमानाः।

अस्य ग्रन्थस्य वैशिष्ट्यं नाम - अत्र क्वचित् क्वचित् 'लक्षालङ्कारटीकायाः' समावेशः। तदनुगुणेनैव अत्र मूलश्लोकानां पाठनिर्धारणं कृतमस्ति, यत् अध्येतॄणां कृते नूतनदृष्टिं ददाति। अपि च, नैकाः हस्तलेखाः (Manuscripts) परिशील्य, प्रतिश्लोकं 'पाठान्तराणि' अत्र संयोजितानि सन्ति, येनायं ग्रन्थ एकः 'विशिष्टसंशोधनग्रन्थः' (Critical Research Edition) इति ख्यातिं लभते। एतादृशस्य गहनकार्यस्य दायित्वं 'वेदवेदान्ताध्ययनशोधसंस्थानेन' ऊढम् इति ज्ञात्वा वयं भृशं मोदामहे। अस्य प्रधानसम्पादकः विद्वान् श्रीप्रदीपसिंहाचार्यः, तथा सहसम्पादकाः विद्वांसः श्रीदेविप्रसादाचार्यः, श्रीविठोबाचार्यः, श्रीवि. श्रीनिधिआचार्याश्चात्र श्लाघनीयं परिश्रमं कृतवन्तः। एतेषां विदुषां समष्टिप्रयत्नेन प्रकाशितः अयं ग्रन्थः तत्त्वजिज्ञासूनां ज्ञानदीपो भवतु। भगवान् वेदव्यासः सर्वेभ्यः सन्मङ्गलं ददात्विति आशास्महे

इति नारायणस्मृतयः

**श्रीश्रीविश्वप्रसन्नतीर्थश्रीपादाः**

# निदेशकवचांसि

सभापर्वणः प्रधानप्रतिपाद्यमस्ति यत् धर्मसंस्थापनव्याग्रचित्तस्य धर्मराजस्य युधिष्ठिरस्य साम्राज्यवैभवम्, तत्सिद्धये आवश्यकं 'कण्टकशोधनं' च। एतादृशस्य सभापर्वणः 'वेदवेदान्ताध्ययनशोधसंस्थानेन' प्रकाश्यमाने अस्मिन् प्रथमभागे मयासुरेण निर्मितायाः अद्भुतसभायाः वर्णनं, नारदवर्णिताः इन्द्रादिलोकपालसभाः, तथा राजसूययागस्य निर्विघ्नपरिसमाप्तये भीमार्जुनादिकृतः राजपराजयः, मगधराजस्य जरासन्धस्य वधः' इत्यादिविषयाः सविस्तरं निरूपिताः। जरासन्धः धर्मसाम्राज्यस्य मार्गे स्थितः महान् पाषाणखण्डः इव आसीत्, तस्य अपसारणमन्तरेण राजसूयः न सिध्यति स्म। अत्र वर्णिता राजनीतिः, भगवतः श्रीकृष्णस्य तन्त्रं, भीमस्य बाहुबलं च अध्येतृभ्यः नूतनां स्फूर्तिं यच्छन्ति।

अस्य संस्करणस्य वैशिष्ट्यं नाम अस्य 'संशोधनात्मकं स्वरूपम्'। अत्र मूलश्लोकानां पाठ-निर्णयः केनापि साधारणमार्गेण न, अपि तु श्रीवादिराजतीर्थश्रीचरणैः विरचितायाः 'लक्षालङ्कार-टीकायाः' अनुरोधेनैव कृतः, इति यत् ग्रन्थस्य प्रामाणिकतां वर्धयति।

अपि च, प्राचीन-ताडपत्रमातृकाः (Manuscripts) परिशील्य, अत्र 'पाठान्तराणि' अपि संयोजितानि सन्ति। एतादृशे महति शोधकार्ये अस्माकं संस्थायाः प्रधानसम्पादकः प्रदीपसिंहाचार्यः, तथा सहसम्पादकाः विद्वांसः श्रीदेवीप्रसादाचार्यः, श्रीविठोबाचार्यः, श्री.वि.श्रीनिधिआचार्याश्च अहोरात्रं परिश्रमं कृतवन्तः। एतेषां विदुषां श्रमेण निष्पन्नः अयं ग्रन्थः संशोधकानां कृते, तत्त्ववादिनां कृते चात्यन्तं उपकरोतु इति आशासे।

**डा। धनञ्जयाचार्यः**

# सम्पादकीयम्

'भारतं पञ्चमो वेदः' इति प्रसिद्धं वचनम्। अस्मिन् महाग्रन्थे 'सभापर्वणः' स्थानं अत्यन्तं विशिष्टम्। अद्य 'वेदवेदान्ताध्ययनशोधसंस्थानेन' प्रकाश्यमाने अस्मिन् प्रथमभागे 'सभाक्रिया', 'लोकपालसभाख्यान', 'राजसूयारम्भ', तथा 'जरासन्धवधपर्व' पर्यन्तं कथाभागः सङ्गृहीतः अस्ति।

अस्य संस्करणस्य वैशिष्ट्यानि: इदं केवलं मूलश्लोकानां मुद्रणं न, अपि तु एकः 'संशोधनाात्मकः ग्रन्थः' (Critical Research Edition) वर्तते।

लक्षालङ्कार-वैशिष्ट्यम्: श्रीमन्मध्वमतपयोधिचन्द्रैः, श्रीवादिराजतीर्थश्रीचरणैः विरचितायाः 'लक्षालङ्कारटीकायाः' आलोकनेनात्र मूलपाठस्य निर्धारणम् अस्माभिः कृतम्। यत्र यत्र श्रीवादिराजैः विशेषार्थः सूचितः, तदनुगुणं पाठः अत्र रक्षितः, येनास्य ग्रन्थस्य गांभीर्यं वर्धते।

पाठान्तर-सङ्ग्रहः (Variant Readings): दक्षिणकर्नाटकक्षेत्रीयेभ्यः मठेभ्य आनीताः अनेकाः ताडपत्र-मातृकाः (Manuscripts) अस्माभिः परिशीलिताः। तत्र उपलभ्यमानाः पाठभेदाः, अधिकपाठाः च अत्राधस्तनटिप्पणीभागे संयोजिताः सन्ति। एतेन संशोधकानां कृते तुलनाध्ययनं कर्तुं सौकर्यं भवति।

अस्मिन् खण्डे मयासुरेण निर्मितायाः अद्भुतसभायाः वर्णनं, नारदमुनिना बोधितः 'राजनीति-धर्मः', इन्द्रादिलोकपालानां सभावर्णनं, तथा भीमकृतः मगधराजस्य 'जरासन्धस्य पराजय' — इत्यादिविषया अत्र सविस्तरं विवेचिताः। राजसूययागस्य निर्विघ्नसमाप्तये जरासन्धस्य वधः कथं अनिवार्यः आसीत् इति अत्र स्पष्टं भवति।

अस्मिन् महति शोधकार्ये मम सहकारिणः, विद्वांसः श्रीदेवीप्रसादाचार्यः, श्रीविठोबाचार्यः, तथा श्री.वि.श्रीनिधिआचार्यश्च महोदयाः अहोरात्रं परिश्रमं कृतवन्तः। तेभ्यो मम धन्यवादाः।

अयं 'लक्षालङ्कार-परिशोभितः' पाठान्तरादिसंवलितः ग्रन्थः विदुषां, शोधछात्राणां, तथा सकलास्तिकानां ज्ञानवर्धनाय भवतु इति कामये।

श्रीश्रीविश्वप्रसन्नतीर्थश्रीपादानामनुग्रहबलेनैव सम्पन्नमिदं ग्रन्थसम्पादनम् । भूयो भूयो गुरुचरणनलिनयोः प्रणामाः समर्प्यन्ते । ग्रन्थप्रकाशनकर्मणि बद्धादराय निदेशकाय डा। धनञ्जयाचार्याय चाधमर्णोहम् । अन्येषां च कृतज्ञोयं जन इत्युपरम्यते ।

**इति सज्जनविधेयः,**

**सि. आ प्रदीपसिंहाचार्यः.चतुर्वेदः**

# किञ्चिन्निवेदनम्

'देशे देशे तथा ग्रन्थान् दृष्ट्वा कतिपयान्' इत्यादि श्रीमदाचार्यैः तात्पर्यनिर्णये अभिहितम् । तेन महाभारते नानाविधाः पाठभेदाः सन्तीति अवगम्यते । पूना महानगरगतभण्डार्कर् प्राच्यविद्यासंशोधनालयेन षट्त्रिंशद्वर्षपर्यन्तं महाभारतमूलपाठमधिकृत्य अधीत्य मुद्रितं च तत् क्रिटिकल्एडिषन्मुखेन । तदेव इदानीम् अत्यन्तप्राचीनपाठान्तरसंवलितः महाभारतपाठः इति अनेकेषां विदुषाम् अभिप्रायः । परन्तु, ततोऽपि अधिकप्राचीनतमपाठः उडुपीनगरस्थनानामठीय-ताळपत्रग्रन्थेषु इदानीं समुपलब्ध इति महान् सन्तोषः ।

पञ्चदशाधिकाः महाभारतताळपत्राः इदानीम् अस्मद्धस्तपथं गताः । तत्पर्यालोचनया मूलपाठनिर्धारणे वयं प्रभवाः स्मः । ताळपत्रगतपाठाः वाविळ्ळप्रेस्द्वारा मुद्रितमहाभारतपाठस्य अत्यन्तसंवादि । यत्र विसंवादस्तत्रापि तात्पर्यनिर्णयानुरोधि पाठ एवात्रादृतः । तदेवं अस्मिन् शुद्धपाठसमीक्षासमये अस्माभिः मूलश्लोकतया पलिमारुमठीयताळपत्रगतपाठः आदृतः । श्लोकसङ्ख्याविषये प्रायः वावीळ्ळक्रम आदृतः । क्वचित् मूलश्लोकाः वावीळ्ळपाठे अदृश्यमाना अपि ताळपत्रे, टि.आर् पाठे, बोरि पाठेपि विद्यमानाः अर्थ-तात्पर्यानुरोधात् अस्मिन् संस्करणे आदृताः ।

एतत्संस्करणाध्ययने अस्माभिरादृतः अध्येतृभिरवश्यं वेदितव्यः विना यद्वदेनेनात्रादृतक्रमानधिगमस्तदत्रैवं निरूप्यते ।

*. क्रिटिकल् एडिषन् मध्ये तालपत्रेषु वाविळ्ळे वा अविद्यमानाः श्लोकाः 'अधिकः/ अथवा ins' इति निर्दिष्टः । तद्यथा -

एतदिच्छाम्यहं श्रोतुं वदतो द्विजसत्तम ।
आनुपूर्व्येण ये चान्ये राजानो वंशधारिणः ।।

(२) व्यासतो for वदतो (क); विस्तरेण द्विजोत्तम (ग); द्विजोत्तमः; तपोधन;

after line 1 ins (६९६) वर्णसङ्करजो धर्मः कथं तं नास्पृशत्तदा ।
जरासञ्चारणं चापि अन्यदेहेषु नः श्रुतम् ।। (अधिकः घपाठे)

* बोरि क्रिटिकल् पुस्तके appendix निर्दिष्टाः केचनश्लोकाः appendix इत्येव श्लोकाधस्तनभागे निर्दिष्टाः ।

*. क्वचितु soubstitute इति पाठान्तर एव निर्दिष्टाः ।

*. श्लोकसङ्ख्याविषये अयं क्रमः अदृतः । प्रारम्भगतसङ्ख्या आपर्वम् अनुवर्तते । अध्यायान्ते आहत-अध्याय-श्लोकसङ्ख्या निर्दिष्टा यथा 'अस्मिन्नध्याये श्लोकाः सन्ति' इत्येवम् ।

*. भागवतमहाभारतयोः ताळपत्रेषु अयमपि एकः पाठभेदः दरीदृश्यते । भागवतपाठेषु शुक उवाच; परीक्षिदुवाच; राजोवाच इत्यादि पठ्यते क्वचित् । क्वचित् श्रीशुकः इत्येव । महाभारते तु सर्वत्र उवाच इति नैव पठ्यते । कुम्भकोणमुद्रितपुस्तके एवं बोरि पुस्तकेपि उवाचशब्दः पठ्यते । अयं नास्माभिरादृतः । केवलं जनमेजयः; भीमसेनः इत्याद्येव ।

* बोरिपुस्तके मध्ये मध्ये अध्यायाः यत्र परिसमाप्यन्ते तत्र वाविळ्ळपुस्तके अध्यायः नैव समाप्यते । एवं टि. आर् कृष्णाचार्यपाठेपि । अत्र प्राचीनतौळवपाठ एव आदृतः । यत्र द्वयोरध्यायोः एकीभावः तत्र बोरिपुस्तकपत्रसङ्ख्या क्वचिद्दत्ता; क्वचिन्नैव ।

*. line interpretation; आनुपूर्वीव्यत्यासः' यत्र दृश्यते तदपि सूचितः । तत्र निर्देशक्रमः एकरूपतया नैव निर्दिष्टः ।

*. पर्वारम्भे महाभारततात्पर्यनिर्णयगताः तत्पर्वकथासङ्ग्रहश्लोकाः उपनिबद्धाः ।

*. महाभारतकथाविषयानुक्रमणिकापि श्लोकानुसारेण प्रत्यध्यायं विस्तरतो निवेशिता

१*.यद्यपि महाभारतलक्षालङ्कारः एम्. एस्. पि द्वारा मुद्रितः । अत्र विद्यमानाध्याय-श्लोकसङ्ख्यादि न वावीळ्ळ-टि.आर् पाठानुसारी इति केवलं विषयमात्रमत्र निवेशितम् । अध्यायसङ्ख्यादि तौळवपाठानुसार्येवेति चावगन्तव्यम् ।।

*.लक्षालङ्कारे व्याख्याताः श्लोकाः क्वचित् वावीळ्ळपुस्तके नोपलभ्यन्ते । टि.आर् कृष्णाचार्यपाठे उपलभ्यन्त इति तेपि मूलश्लोकतया क्वचिद् ग्राह्या भवन्तीत्यस्माकमाशयः । महन्तः प्रष्टव्याः

*. मूलश्लोकाः बृहदक्षरै राराज्यन्ते । अधिकश्लोकाः अल्पाक्षरैः मूलश्लोकमध्य एव अर्थानुगुणाः विषयविशेषगर्भिताः मूलश्लोकानां पूर्वं पश्चाद्वा, पूर्वार्ध-उत्तरार्धमध्ये वा अनङ्कितसङ्ख्याः निवेशिताः । एतेषां महाभारतान्तर्गतत्वं वा अनन्तर्गतत्वं वा न निश्चेतुं प्रभवामः ।।

*.तत्र पाठान्तरदानसमये पूना(बोरि)पाठान्तराणि अपि निर्दिष्टानि । तद्यथा-

एवं पाठान्तरदानसमये आदृताः अपरेपि विशेषाः एवं निर्दिष्टाः –

सर्वमूलग्रन्थटीका-टिप्पणीषु महाभारतपाठः

* श्रीमन्मध्वाचार्यैः तत्र तत्र महाभारतवचनानि 'भारते, मोक्षधर्मपर्वणि' इत्यादिरूपेण नामनिर्देशमात्रेणसूचितानि।तानिकेचनउपलभ्यन्ते,नोपलब्धानिबहूनिइत्यनेकेषांप्रवादः। अस्माभिः अस्मिन् संस्करणे श्रीमदाचार्योदाहृतवचननां आकरमपि पर्व-अध्याय-श्लोकसङ्ख्या-निर्देशपूर्वकमाकरः प्रादर्शि । यथा -गीताभाष्ये 'अनन्तग अनन्त' इत्येवोदाहृतम् । अस्माभिः अस्य शान्तिपर्वान्तर्गतत्वं संशोध्य '(सर्वमूलो-) गीताभाष्योदाहृत-महाभारतवचनानि 'इति सङ्गृह्य पर्वारम्भे स्थलनिर्देशपूर्वकं १२-१३१-५ इत्येवं निर्दिश्यते ।।

* सर्वमूलेषु- महाभारतवचनतया अनुदाहृतान्यपि प्रमणवचनानि 'इतिच' इत्येवं रूपेण निबद्धानि । यथा गीताभाष्ये 'पृथिवी धर्ममूर्धनि' इति च ' इति। एतादृशानि वाक्यान्यपि अस्मदीयमहाभारतसंशोधनावसरे संशोध्य आकरप्रदर्शनपूर्वकं निर्दिष्टानि ।

* किञ्च महाभारतवाक्यानि टिप्पणीषु तत्र तत्र प्रासङ्गिकतया उदाहृतानि ।

एवं भागवतयादुपत्ये -शर्यातिकथाप्रसङ्गे आदिपर्ववचनमुदाहृतम् - 'यथोक्तमादिपर्वणि-जिगीषया ततो देवा वव्रिरे.. इत्यारभ्य 'दुहिता वृषपर्वणः ' इत्यन्तः ८० श्लोकाः ।

भरतराट्कथाप्रसङ्गेपि - आदिपर्ववचनम् -'तां विशोध्य तदा राजा देवदूतेन भारत... इत्यारभ्य 'मया शुभे' इत्यन्तो भागः ।

विश्वामित्रप्रसङ्गे गदापर्ववचनमुदाहृतम् -'सतु वव्रे वरं राजन् ब्राह्मणः स्यामहं त्विति । तथेति चावदद् ब्रह्मा सर्वलोकपितामहः इति गदापर्वणि' इति ।।

एवं उद्योगपर्ववचनम् -'प्रतिगृह्य ततो धर्मः... विश्वामित्रस्तथाभवत् ।

एवं शान्तिपर्ववचनम् -च्यवनाद्वरदानेन रुचिकस्य ... ब्राह्मण्यं समवाप्तवान् ।।'

एतादृशग्रन्थसमम्पादनकाले सहकृतवभ्द्यः समेभ्यः विद्भ्द्यः धन्न्यवादः ।।

सम्पादकमण्डली

# श्रीमन्महाभारतम्

# सभापर्व

श्रीमन्महाभारततात्पर्यनिर्णये एकविंशाध्याये
जनार्दनाज्ञया मयः समस्तकौतुकोत्तराम् ।
सभां विधाय भूभृते ददौ गदां वृकोदरे ।।१।।

## 02- 01- 01

## प्रथमोऽध्यायः

**मयेन प्रत्युपकारः कर्तव्य इति अर्जुनं प्रति प्रार्थना ।। १ ।। कृष्णे उपकृते अहमुपकृत इतिं मयं प्रति अर्जुनस्योक्तिः ।। २ ।। कृष्णाज्ञाया मयेन सभानिर्माणारम्भः ।। ३ ।।**

जनमेजयः

अर्जुनो जयतां श्रेष्ठो मोक्षयित्वा मयं तदा।
किं चकार महातेजाः तन्मे ब्रूहि द्विजोत्तम ।

वैशम्पायनः

शृणु राजन्नवहितः चरितं पूर्वकस्य ते ।। १ ।।

मोक्षयित्वा मयं तत्र पार्थश्शस्त्रभृतां वरः ।
गाण्डीवं कार्मुकश्रेष्ठं तूणी चाक्षयसायकौ ।। २ ।।

दिव्यान्यस्त्राणि राजेन्द्र दुर्लभानि नृपैर्भुवि।।
रथध्वजपताकाश्च श्वेताश्वैस्सह वीर्यवान् ।। ३।।

एतानि पावकात्प्राप्य मुदा परमया युतः ।
**तस्थौ पार्थो महावीरः तदा सह मयेन स ।। ४ ।।**

ततोऽब्रवीन्मयः पार्थं वासुदेवस्य सन्निधौ ।। ५ ।।

पाण्डवेन  परित्रातः तत्कृतं प्रत्यनुस्मरन् ।
**प्राञ्जलिः श्लक्ष्णया वाचा पूजयित्वा पुनः पुनः ।। ६ ।।**[०१]

**मयः**

अस्माच्चकृष्णात् सङ्क्रुद्धात् पावकाच्च दिधक्षतः।
**त्वया त्रातोऽस्मि कौन्तेय ब्रूहि किं करवाणि ते ।। ७ ।।**
**पाण्डवेन परित्रातस्तत्कृतं प्रत्यनुस्मरन् ।**[०२]

अहं हि विश्वकर्मा वै असुराणां परन्तप ।
**तस्मात्ते विस्मयं किञ्चित्कुर्यामन्यैस्सुदुष्करम् ।। ८ ।।**

**लक्षालङ्कारः - अहं कर्माणि दारुभिः क्रियमाणकर्माणि यस्य स इति योगेन मयो..पि विश्वकर्मा ।**

**वैशम्पायनः**

एवमुक्तो महावीर्यः पार्थो मायाविनं मयम्।
**ध्यात्वा मुहूर्तं कौन्तेयः प्रहसन्वाक्यमब्रवीत् ।। ९ ।।**[०३]

**अर्जुनः**

कृतमेव त्वया सर्वं स्वस्ति गच्छ महासुर।

---

(०१)(४)पुनर्मयः (for पुनः पुनः).

(०२) (१)यस्माच्च, अस्मात्कृष्णात्सु(च्छ्रासुः, च्छ्रं सुः, ष्णाच्च, च्छ्राच्च)संरम्भात्, अस्माच्च कृष्णा (च्छ्रा) संरम्भात्, मयं तस्माच्च संक्रुद्धात्, अस्माच्च,(२) पावकाच्चण्डविक्रमात्, (अस्मात्कृष्णात्सुसंरब्धात्-कृ-पाठ) ३)भद्रं ते (for कौन्तेय).

(०३) (१)ह्यसु (for असु), कार्यमन्यैः, कुर्यामद्य, कुयौ यदि  (for कुर्यामन्यैः), महावीरः (for र्यः), मायाविनं तेजस्वी चरितव्रतः.

प्रीतिमान्भव मे नित्यं प्रीतिमन्तो वयं च ते।(०१)

प्राप्तोपकारादर्थं हि नाहरामीति मे व्रतम् ।। १०।।(०२)

मयः

ऋतमेतत्त्वयि विभो यथाऽऽत्थ पुरुषर्षभ।

प्रीतिपूर्वमहं किञ्चित्कर्तुमिच्छामि तेर्जुन ।। ११ ।।(०३)

अहं हि विश्वकर्मा वै दानवानां महाकविः।

सोऽहं वै त्वत्कृते किञ्चित् कर्तुं इच्छामि पाण्डव ।। १२ ।।(०४)

दानवानां पुरा पार्थ प्रासादा हि मया कृताः ।। १३ ।।

रम्याणि (सुखगर्भाणि) सुखदर्शानि भोगाढ्यानि सहस्रशः।

उद्यानानि च रम्याणि सरांसि विविधानि च ।। १४ ।।(०५)

विचित्राणि च (श)वस्त्राणि रथाः कामगमास्तथा ।

नगराणि विशालानि साट्टप्राकारतोरणैः ।। १५ ।।(०६)

वाहनानि च मुख्यानि विचित्राणि सहस्रशः।।

बिलानि रमणीयानि सुखयुक्तानि वै भृशम्।

(०१) (१)कृतं मम, कृतमेतत् विश्वं (for सर्वं), २)स्वस्ति तेस्तु, युक्तमात्थ, व्रजासुर (for महा).

(०२) (१) प्रणोपकारणार्थं(कारादर्थं) हि, नादास्यामि, नाचरामि, मतं (for व्रतम्).

(०३) (१)अ-अयुक्तमेतत्त्वयि विभो । क- युक्तमेतत्त्वयि विभो.अयुक्तं तत्, युक्तमेव, वचो (for विभो), (२) यदात्थ, पुरुषोत्तम,(३) पूर्वमिदं, तेनाथ,पाण्डव, (४)अ-प्रियम् ,भारते, प्रियं, तेर्जुन, भारत तेस्म्यहं (for भारत).

(०४) (१)विश्व, (२) दान, महात्मनां,महाकविः,(३) तदहं (for सोऽहं वै)किंचित् ,(४) कर्तुं, भारत (for पाण्डव), पार्थ कुर्यां महत्प्रियं .

(०५) (१)अ-सुखगर्भाणि भोगाढ्यानि ,सुखगर्भाणि, भोगार्थानि, भोगार्हाणि, गृहाणि, विविधानि (for विचि), वस्त्राणि (for शं), कामकाश्च रथाश्च वै, कार्मुकाणि रथा मया, कामगानि रथानि च, कामगा(र्मुका)श्च , विभो, तोरणं, वंति च, रम्याणि (for मुख्यानि), च सर्वशः (for सह),.

(०६)(२)अ-कामगाश्च रथा विभो ।.

एतत्कृतं मया सर्वं तस्मादिच्छामि फल्गुन ।। १६ ।।(०१)

अर्जुनः

प्राणकृच्छ्राद्विमुक्तं त्वमात्मानं मन्य(सेऽनघ)से मया ।
एवं गते न शक्ष्यामि किञ्चित्कारयितुं त्वया ।। १७ ।।(०२)

न चापि तव सङ्कल्पं मोघमिच्छामि दानव।
कृष्णस्य क्रियतां किञ्चित्तथा प्रतिकृतं मयि ।। १८।।(०३)

मयः

वासुदेव मया कर्तुं किमिच्छसि शुभानन ।। १९ ।।

**वैशम्पायनः-**

चोदितो वासुदेवस्तु मयं प्रति नरर्षभ ।
मुहूर्तमिव सन्दध्यौ किमयं चोद्यतामिति।
चोदयामास तं कृष्णः सभा वै क्रियतामिति ।। २० ।।(०४)

नैपुणं दिवि शिल्पस्य संचिन्त्य मयमब्रवीत् ।(०५)

ततो विचिन्त्य मनसा लोकनाथः प्रजापतिः ।(०६)

ततो विचिन्त्य मनसा लोकनाथः प्रजापतिः।

---

(०१)(३)अ-जालानि, ज (for वि), कृताः, मया,(५) एतत्कृतं मया सर्वं (पूर्वं).
(०२) १)प्राणकृत्य (for कृच्छ्राद्) विमुक्तं त्वाम्, विनिर्मुक्तम्, प्राणाकृच्छ्रापि मुक्तं त्वम्, विमोचितं प्राणकृच्छ्राद्, २)यदि, मय(सुर), नघ (for मया), ३)कृते गते, शक्यामि, शक्नोमि, एतत्कृते न गच्छामि(एवं गते न शक्यामि), ४)त्वयि, त्वहं (for त्वया).
(०३) का(क)श्यप (for दानव), कृष्णार्थं, प्रीतिस् (for किंचित्) तत्ते(भवेत्), कृते, तदा (for तथा), प्रीतिं (for प्रति), मम (for मयि).
(०४)१)नोदितो, मयेन पुरुषर्षभ, २)मयं प्रति नरर्षभ, ३)अपि, एव, अभि (for इव), ४)नोद्य, कार्यं (for चोद्य). (मयेन भरतर्षभ-कृ)
(०५)नैपुण्यं, निपुणं.
(०६)सुचिरं (for मनसा).

श्रीभगवान्[०१]

यदि त्वं कर्तुकामोऽसि प्रियं शिल्पवतां वर ।

अनवाप्यां मनुष्येण तादृशीं कुरु वै सभाम् ।

असुरान्मानुषान्देवागन्धर्वान्राक्षसानपि ।

यदि त्वं कर्तुकामोऽसि प्रियं शिल्पवतां वर ।

धर्मराजस्य दैतेय यादृशीमिह मन्यसे ।। [०२]
यां कृतां नानु कुर्युस्तमानवाः प्रेक्ष्य विस्मिताः ।। २१ ।।[०३]

मनुष्यलोके कृत्स्नेस्मिन् तादृशीं कुरु वै सभाम् ।। २२ ।।[०४]

यत्र दिव्यानभिप्रायान् पश्येम हि कृतांस्त्वया ।
आसुरान् मानवांश्चैव तादृशीं कुरु वै सभाम् ।
सर्वर्तुगुणसम्पन्नां दिव्यारूपामलङ्कृताम् ।। २३ ।।[०५]

वैशम्पायनः

प्रतिगृह्य तु तद्वाक्यं सम्प्रहृष्टो मयस्तदा ।
विमानप्रतिमां चक्रे पाण्डवस्य शुभां मुदा (सभाम् ) ।। २४ ।।[०६]

ततः कृष्णश्च पार्थश्च धर्मराजे युधिष्ठिरे।

---

(०१)नोद (for चोद).

(०२) दैत्येय, दैत्येन्द्र, दयित,सदृशीं, यदि त्वं,यादृशीं, इव, मय, अभि, इह.

(०३) (१)यादृशं यां कृत्वा, यां क्रियां, यान्कृतान्, नानुकुर्युर्हि, कुर्वंति, कर्तुं हि, २)कुशलाः (for मानवाः), धिष्ठिताः, निष्ठिताः, मानवाः, विष्ठिताः (for विस्मिताः), .

(०४) (१)सकले, कृष्णेस्मिन्, कृच्छ्रे (for कृत्स्ने) (कृत्स्नेस्मिन् त्ऀसकले -कृ).

(०५) (१)मन्येम, पश्यामो प्रेक्षामो, प्रेक्षामो, २)पश्याम, विकृतांस्, हि कृतांस् (for विहितांस्), ३)असुरान्, मानवान् (for मानुषान्)(मानुषांश्चैव-कृ), ४)तां सभां, तादृशीं कुरु वै सभां (घ) (सभां तां कुरु वै मय-कृ।।).

(०६) वैशं उ, सभां पुनः, मुदा युतः, सभां ततः, तदा सभां, सभां तदा, शुभां सभां, मुदा ततः, सभामुत (for सभां मुदा), सभां धर्मात्मजस्य वै.

सर्वमेतत्समावेद्य दर्शयामासतुर्मयम् ।। २५ ।।(०१)

लक्षालङ्कारः - यथावेद्य इत्यत्र आवेद्येति पदच्छेदः ।

यस्मै युधिष्ठिरः पूजां यथार्हमकरोत्तदा ।

आसनं कल्पयामास पूजयामास च प्रभुः ।। २६ ।।(०२)

स तु तां प्रतिजग्राह मयः सत्कृत्य सत्क्रियाम् (भारत-कृ)
ततस्तु सत्कृतस्तेन कथयामास भारत ।। २७ ।।(०३)

स पूर्वदेवचरितं तदा तत्र विशाम्पते।
कथयामास दैतेयः पाण्डुपुत्रेषु भारत ।। २८ ।। (०४)

संप्रहृष्टो मयो राजन्पाण्डवस्य च तत्त्वतः ।(०५)

स कालं कश्चिदाश्वस्य विश्वकर्मा विचिन्त्य च ।
सभां प्रचक्रमे कर्तुं पाण्डवानां महात्मनाम् ।। २९ ।।(०६)

अभिप्रायेण पार्थानां कृष्णस्य च महात्मनः।
पुण्येऽहनि महाबाहुः कृतकौतुकमङ्गलः ।। ३० ।।(०७)

तर्पयित्वा द्विजश्रेष्ठान्पायसेन सहस्रशः।

---

(०१) (२)राजं (for ष्ठिरं), (३)अथावेद्य, यथातथ्यं, समावेद्य, तदा(था)दा)वेद्य, यथावेद्य, सर्वमेव तदावेद्य, सर्वमेव तदाज्ञाय.

(०२) (१) (तस्मै-कृ) २)यथार्हम् ।.

(०३) (१)च (for तु), भारत,(२) सत्क्रियां (for सत्कृतः), .

(०४) (१)स पूर्वदेवचरितैस्, स पूर्वं देवचरितं, संपूर्णं देव, स दैत्यदेव, पूर्वदेवाः(=दानवाः), पूर्वदेवः(=वृषपर्वा दानवः),(२) तदा (for तत्र).

(०५)दैत्येयः दैत्याय, पाण्डवेषु महात्मसु.

(०६) (१)किंचिद्, आश्वास्य, विचिंत्य (for प्रचिन्त्य), २)शुचिर्भुवि (for प्रचिन्त्य च), तु, वै (for च), (४)मनोरमां (for महात्मनाम्), पाण्डवस्य मनोरमां(महात्मनः) .

(०७) (१)पार्थस्य(कृष्णस्य) (for पार्थानां),(२) पार्थ (for कृष्ण), मनोरमां (for महात्मनः), (३) महाबाहुः, (महातेजाः-कृ)महाराज.

धनं बहुविधं दत्त्वा तेभ्य एव च वीर्यवान् ।। ३१ ।।(०१)

(सर्वर्तुगुणसम्पन्नां दिव्यरूपां मनोरमाम्।)-अधिकपाठः कृ

जनौघस्य रथौघस्य यानयुग्यस्य चैव हि ।

दशकिष्कुसहस्रां तां मापयामास सर्वतः ।। ३२ ।।(०२)

लक्षालङ्कारः - दशकिष्कुसहस्राणि मापयामास सर्वत इत्यत्र 'किष्कुर्हते वितस्तौ च' इत्युक्तत्वात् हस्तपरिमितो देशः किष्कुरित्युच्यते । दशसहस्रकिष्कुपर्यन्तं सभाकरणाय भूमिं मापयामास 'माङ् माने' इति धातोः मानदण्डेन मानं कारयामासेत्यर्थः ।

अस्मिन् अध्याये १ श्लोकाः ३२ सन्ति ।

**मन्त्रपर्वणि(१) प्रथमोऽध्यायः**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि सभाक्रियापर्वणि सभास्थाननिर्णये प्रथमोऽध्यायः।। १।।

# २.द्वितीयोऽध्यायः

## 02- 01- 02

**द्वारकां गच्छतः श्रीकृष्णस्य युधिष्ठिरादिभिः सारथ्यादिकरणम् ।। १।। क्रोशमात्रं गतानां कृष्णपाण्डवानां परस्परानुज्ञया स्वस्वपुरगमनम् ।। २ ।। कृष्णस्य द्वारकायां सुखेन वर्तनम् ।। ३ ।।**

वैशम्पायनः

उषित्वा खाण्डवप्रस्थे सुखवासं जनार्दनः।

---

(०१)(२)ससर्पिषा (for सहस्रशः),(३) दत्त्वा तेभ्यः, भक्त्या (for एव), स (for च).

(०२) (१)अ- निष्कसहस्राणि दापयामास सर्वतः । दशकिष्कु(निष्कु, निष्क)सहस्राणि,

(२) तथा निष्कसहस्राणि, शतकृष्णसहस्राणां,किष्कुः, पूरयामास, दाप, माप, वै मयः, सर्वशः, समस्तगुण, सर्वर्तुफल, गुणसंपूर्णा, चित्र (for दिव्य),अलङ्कृतां (forमनो).

पार्थैः प्रीतिसमायुक्तैः पूजनार्होऽभिपूजितः।[०१]
**गमनाय मतिं चक्रे पितुर्दर्शनलालसः ।। १ ।।**

धर्मराजमथामन्त्र्य पृथां च पृथुलोचनः
**ववन्दे चरणौ मूर्ध्ना जगद्वन्द्यः पितृष्वसुः ।। २ ।।[०२]**

स तया मूर्ध्न्युपाघ्रातः परिष्वक्तश्च केशवः।[०३]
**ददर्शानन्तरं कृष्णो भगिनीं स्वां महायशाः ।। ३।।**

तामुपेत्य हृषीकेशः प्रीत्या बाष्पसमन्वितः ।। ४ ।।[०४]

अर्थ्यं तथ्यं हितं वाक्यं लघु युक्तमनुत्तरम्।
**उवाच भगवान्भद्रां सुभद्रां भद्रभाषिणीम् ।। ५।।[०५]**

तया स्वजनगामीनि श्रावितो वचनानि सः ।
**सम्पूजितश्चाप्यसकृच्छिरसा चाभिवादितः ।। ६।।[०६]**

तामनुज्ञाय वार्ष्णेयः प्रतिनन्द्य च भामिनीम्।
**ददर्शानन्तरं कृष्णां धौम्यं चापि जनार्दनः।[०७]**
**ववन्दे च यथान्यायं धौम्यं पुरुषसत्तमः ।। ७ ।।**

---

(०१) (१)सुखावासं, समापन्नैः, (३)समुद्युक्तैः, र्हः(४) सुपूजितः.

(०२)१)मनः (for मतिं),पितृद-,(२)क- पृथुलेक्षणः- च-कपृथुलक्षणः, ३)राजं समा, पार्थं (for पृथां), पृथुल (for च पृथु), लोचनां,लक्षणः -लेक्षणः,.

(०३) (१)सभायां (स तया), प्राघ्राय,(२)परिष्वज्य च पांडवान्.

(०४) (१)दर्शनानंतरं, भद्रां (for कृष्णो), ३)तामुवाच बाष्पसमन्वितां, बाष्पाकुलेक्षणः.

(०५) (१)अर्चितस्तुः, अल्पं तथा, तथ्यं पथ्यं, पथ्यं तथ्यं,(२) युक्तं (for वाक्यं),लघु व्यक्तम्, लघु वंत्तम्, युक्तियुक्तम्, युक्तं, अनुत्तरं, गुरु स्व(गुरुम)ल्पाक्षरं मृदुः,(३) उक्तवान् (for उवाच), भद्रं, चारु,(४) मित्त (for भद्र).

(०६) (१)तया च गजगामिन्या, तया स्वजनगा( मा, का)मिन्या(न्यां), तया स्वजनगामीन्या, तया सौहार्दयुक्तानि (सुजनगामीनि, तयाप्यजनयामीनि) तया सौहार्दगामीनि, स्वजनगामीनि, च (for सः),(४) चाथ सकृत्, चाथा (for चाप्य), चाभिनंदितः, वाद्य च, वंदितः, संपूजिताश्चाथ सकृवंदिताः.

(०७) (१)तामनुज्ञाय, स्वसारं चापि, भाविनीं (भगिनीं),(३) कृष्णो( त्त्री कृष्णां),द्रौपदीं ददर्श कृष्णां पांचालीं, चाथ, (४)पुरोहितं (for जनार्दनः).

द्रौपदीं सान्त्वयित्वा च आमन्त्र्य च जनार्दनः। [०१]
**भ्रातनभ्यगमद्  धीमान् पार्थेन सहितो बली  ।। ८ ।।**[०२]

भ्रातृभिः पञ्चभिः कृष्णो वृतः शक्र इवामरैः ।।

**(यात्राकालस्य योग्यानि कर्माणि गरुडध्वजः।**

**कर्तुकामः शुचिर्भूत्वा स्नातवान्समलङ्कृतः।। -अधिकपाठः -कृ)**

आमन्त्र्य च पृथां कृष्णां प्रतस्थे तस्थुषां वरः ।

आमन्त्र्य च पृथां कृष्णां धौम्यं च पुरुषोत्तमः  ।। ९ ।।[०३]

(१)अ-(अधिकः पाठः) अनन्वितश्च)

आमन्त्र्य च पृथांकृष्णः प्रतस्थे तस्थुषां वरः ।।

उपेत्य स यदुश्रेष्ठो बाह्यकक्षां विनिर्गतः ।[०४]

अर्चयामास देवांश्च द्विजांश्च यदुपुङ्गवः।
**माल्यजाप्यनमस्कारैर्गन्धैरुच्चावचैरपि  ।। १० ।।**[०५]

स कृत्वा सर्वकार्याणि प्रतस्थे पुष्करेक्षणः  ।। ११ ।।[०६]

उपेत्य स यदुश्रेष्ठो बाह्यकक्षाद्विनिर्गतः ।
**स्वस्तिवाच्यार्हतो विप्रान्दधिपात्रफलाक्षतैः।**

---

(०१) (१)स, तां (for च),धौम्यं स(च), पुरुषोत्तमः, परुषसत्तमः,(२) चाप्यामंत्र्य (for च आमंत्र्य),ह्यमंत्र्य च, तथांत्र्य(आमंत्र्य च), सुभद्रां, परिदा (धा)य च.

(०२) (१)समगमत्, अप्यधिकं (for अभ्यगमत्), सर्वान्, विद्वान्, (२)वीरान् (for धीमान्), वशी (for बली),(विद्वान्-कृ) सहितः (for पञ्चभिः), भूत्वा (for कृष्णो), इवावभौ.

(०३) अग्निमभ्यर्च्य (for अर्चया), तान्सर्वान् (for देवांश्च), यदुनंदनः, भरतर्षभ,.

(०४)च (for स), राज्यकक्षां, बाह्यकक्षाद्, रथं गतः ।।.

(०५) (१)क- अग्विमभ्यर्च्य,(३)स्नानजप्यः, माल्यजाप्यः माल्यैः पुष्पैर्, माल्यैर्जप्यैर्, माल्यैर्जप्य, अर्घ्यैर्माल्यैर् (for माल्यजप्य),(४) तथा (for अपि), गंधैर्गंधवहैस्तथा, .

(०६) (१)निर्वर्त्य (for स कृत्वा), सर्वकर्माणि, (२)प्रतस्थे पुष्करेक्षण, तस्थुषां वरः(तस्थुषां वरः-कृ).

वसु प्रदाय च ततः प्रदक्षिणमथाकरोत् ।। १२ ।।[०१]

ततस्तु कृतमङ्गल्यो ब्राह्मणैर्वेदपारगैः।
काञ्चनं रथमास्थाय ताक्ष्र्यकेतनमाशुगम् ।। १३ ।।[०२]

गदाचक्रासिशार्ङ्गाद्यैरायुधैश्च समावृतम् ।
तिथावप्यथ नक्षत्रे मुहूर्ते च गुणान्विते ।। १४ ।।

प्रययौ पुण्डरीकाक्षः शैब्यसुग्रीववाहनः।[०३]
अन्वारुरोह चाप्येनं प्रेम्णा राजा युधिष्ठिरः ।। १५ ।।[०४]

अपास्य चास्य यन्तारं दारुकंसूतसत्तमम् ।।
अभीशून् प्रतिजग्राह स्वयं कुरुपतिस्तदा ।। १६ ।।[०५]

लक्षालङ्कारः - अभीषून् प्रतिजग्राह इत्यत्र अभीषून् रथरज्जूः ।

उपारुह्यार्जुनश्चापि चामरव्यजनं सितम् ।
रुक्मदण्डं बृहन्मूर्ध्नि दुद्धावाभिप्रदक्षणम् ।। १७।।[०६]

---

(०१) (३)वाच्य ततो, वाच्यान् गतान् (वाच्या)र्हतो) दधि पत्रफलान्वितैः,(४) दध्ने पा क्षतान्, दधिपालफलाक्षतैः(पूर्णफला), सर्षपतण्डुलैः, पुष्पफलाक्षतैः,(५) सुभृशं (for च ततः), वसुप्रिये च तत्पुत्रं,(६) अथाकरोत् अवर्तयत् (for अवर्तत),वासांस्याभरणानि च .

(०२)ततः स्वरथमा, ताक्ष्र्यप्रवरकेतनं, समन्वितैः, समन्ततः, समावृतः, आयुधैरावृतं शुभम्.

(०३)शुभायां, अप्यथः, अस्य च (for अथ च), तिथिवारं च नक्षत्रे, निर्ययावथ नक्षत्रे, शुभान्विते, स (for प्र), प्रवरोन्धकवृष्णिषु, सैनिकैश्च समावृतः, सैन्य.

(०४) (१)अथारुरोह, तं चालक्षालङ्कारः -पि, कृष्णस्य (for चाप्येनं),(२) धर्मराजो (for प्रेम्णा राजा),.

(०५) (१)आपास्य, चाशु (for चास्य),(२)यन्त्रसत्तमं, सूतमुत्तमं, सूतसत्तमं,द्रुतं, अभीशुं, अभीशू(सू)न्, (३)अहशून्, अभिशून्, प्रति, तत्र, अस्य,परि (for सम्प्र),ततः (for तदा),(४) स्वयं राजा युधिष्ठिरः. (सम्प्रजग्राह-कृ)

(०६) (१) अपगृह्य, अपानुद्य (for उपारुह्य),तूर्णः,चास्य (for चापि), (२) चामरं (for चामर),शुभं (for सितम्), व्यजने शुभे, चामरे व्यजने सिते, (३)वृहद्वीरः, बृहत्सार्चिः, बृहद्बाहुः, ब्रह्ममूर्ध्नि,(४)त-दधावभिप्रदक्षिणम्. धारयामास पाण्डवः, छत्रं दध्ने स पाण्डवः, विदु(द)धाव प्रदक्षिणं, आ(वि)दधार प्रदक्षिणं, विदुधौ(विबुधो), वामदक्षिणं, विवुधाव , पाण्डवः(व प्रद क्षिणं), दुधावाशु प्रदक्षिणं. (बृहद्बाहुर्विदुधाव प्रदक्षिणम् -कृ)

तथैव भीमसेनोऽपि रथणारुह्य वीर्यवान् ।[०१]

पृष्ठतोऽनुययौ कृष्णमृत्विक्पौरजनैः सह ।-अधिकपाठः -कृ[०२]

छत्रं शतशलाकं च दिव्यमाल्योपशोभितम् ॥ १८ ॥

वैडूर्यमणिदण्डं च चामीकरविभूषितम् ॥

दधार तरसा भीमश्छत्रं तच्छार्ङ्गधन्वने ॥ १९ ॥

उपारुह्य रथं शीघ्रं चामरव्यजने सिते॥

नकुलः सहदेवश्च धूयमानौ जनार्दनम् ॥ २० ॥

(१)क-(अधिकः पाठः)

भीमसेनोऽर्जुनश्चैव यमावरिनिषूदनौ ।

पृष्ठतोऽनुययुः कृष्णम् ऋत्विक्पौरजनैर्वृताः ॥

स तथा भ्रातृभिःसार्धं केशवः परवीरहा ॥

अनुगम्यमामनः शुशुभे शिष्यैरिव गुरुः प्रियैः ॥ २१॥[०३]

अभिमन्युं च सौभद्रं वृद्धैः परिवृतस्तथा।

रथमारोप्य निर्यातो धौम्यो ब्राह्मणपुङ्गवः ॥ २२ ॥

इन्द्रप्रस्थमतिक्रम्य क्रोशमात्रं महाद्युतिः।

पार्थमामन्त्र्य गोविन्दः परिष्वज्य सुपीडितम् ॥ २३ ॥[०४]

---

(०१) (२) यमाभ्यां सहितो बली कृ

(०२) (१)युधिष्ठिरं चार्जुनोपि चित्रं (for छत्रं), दान्त (for शत),शुभे (for सिते), दृष्ट्वा (for चापि),(२) रूपचित्रमसंपन्नौ, भीमसेनोर्जुनश्चैव बली (for वशी), यमावरिनिषूदनौ(घातिनौ), नुययुः(न्वयतुः), ययतुः पृष्ठतः कृष्णम्, सह, वृतौ, वृताः,वृतं, ऋत्विग्भिः स्वजनैर्वृतः. .

(०३) (१) स प्रायाद्, ततः स, स तदा (for स तथा), पाण्डवैः (for भ्रातृभिः),(२) सर्वैः (for सार्धं),(३) अन्वीय (for अनुगम्य), बृहस्पतिरिवाभाति, चैव (for इव),गुरुप्रियः, गुरुः स्वयं,गुरुः प्रियः, गुरुप्रियैः, मरुद्भिरिव वासवः परिवृतं. (सर्वैः-कृ) (अन्वीयमानः-कृ)

(०४) (१) सुपीडितं, सहानुगं, पीडितं, ययौ (for यमौ),तदा, तदा(नावपि).

युधिष्ठिरं पूजयित्वा भीमसेनं यमौ तथा।
परिष्वक्तो भृशं तैस्तु यमाभ्यामभिवादितः ।। २४ ।।(०१)

योजनार्धमथो गत्वा कृष्णः परपुरञ्जयः।

युधिष्ठिरं समामन्त्र्य निवर्तस्वेति भारत।।

ततोऽभिवाद्य गोविन्दः पादौ जग्राह धर्मवित्।

उत्थाप्य धर्मराजस्तु मूर्ध्न्युपाघ्राय केशवम्।।

पाण्डवो यादवश्रेष्ठं कृष्णं कमललोचनम्।

गम्यतामित्यनुज्ञाप्य धर्मराजो युधिष्ठिरः।। अधिकपाठः -कृ

ततस्तैः संविदं कृत्वा यथावन्मधुसूदनः।
निवर्त्य च तथा कृच्छ्रात्पाण्डवान्सपदानुगान् ।। २५।। (०२)

स्वां पुरीं प्रययौ हृष्टो यथा शक्रोऽमरावतीम् ।। २६ ।।(०३)

लोचनैरनुजग्मुस्ते तमादृष्टिपथात्तदा ।
मनोभिरनुजग्मुस्ते कृष्णं प्रीतिसमन्वयात् ।। २७ ।।(०४)

अतृप्तमनसामेव तेषां केशवदर्शने।।
क्षिप्रमन्तर्दधे शौरिश्चक्षुषां प्रियदर्शनः ।। २८ ।।

अकामा एव पार्थास्ते गोविन्दगतमानसाः।
निवृत्योपययुस्तूर्णं स्वं पुरं पुरुषर्षभाः ।। २९ ।।

---

(०१) (१) तैस्तु (for ताभ्यां),(२) चाभिवादितः, अभिवन्दितः, .

(०२) (१)(अ)थ, तान् (for च), स तान्, सदा,(२) तथा, सर्वान् (for तदा),(३) निवर्त्य च तथा कृच्छ्रात्(निवर्तयामास तदा), (४)सपुरोहितान् (for सपदा),.

(०३) (१)हृष्टः (for कृष्णः),(२) यथा शक्रोमरावतीं, पुरन्दर इवालयं.

(०४) (१) अभि (for अनु), च (for ते), तं चा, (२) तस्माद् (for तमा), दृष्टिपथे, दृष्टिपथं, पुनः (for तदा), तं च दृष्टिपथादिव, कृष्णप्रीतिसमन्विताः(३) लोचनैर् (for मनोभिर्), अति, अभि (for अनु), तं (for ते), कृत (for कृष्णं),(४)प्रीति(प्रति), समन्विताः, प्रीतिसमुच्चयात्, प्रतपतां वरं.

(निवृत्तो धर्मराजस्तु सह भ्रातृभिरच्युतः।
**सुहृज्जनवृतो राजा प्रविवेश पुरोत्तमम्** ।। ३० ।।

लक्षालङ्कारः - सह भ्रातृभिरच्युत इत्यत्र अच्युतः भक्त्यादिगुणैश्च्युतिरहितः ।

विसृज्य सर्वान्सुहृदो भ्रातन्पुत्रांश्च धर्मराट्।
**मुमोद पुरुषव्याघ्रो द्रौपद्या सह भारत** ।। ३१ ।।

स्यन्दनेनाथ कृष्णोऽपि त्वरितं द्वारकामगात्।।
**केशवोऽपि मुदा युक्तः प्रविवेश पुरोत्तमम्** ।। ३२ ।।

**सात्वतेन च वीरेण पृष्ठतो यायिना तदा।**

दारुकेण च सूतेन सहितो देवकीसुतः।
**पूज्यमानो यदुश्रेष्ठैरुग्रसेनमुखैस्तथा** ।। ३३ ।।
**प्रययौ (स गतो) द्वारकां विष्णुर्गरुत्मानिव वेगवान् ।।३३ ।।**

**वैशम्पायनः**

**निवृत्य धर्मराजस्तु सह भ्रातृभिरच्युतः।**

**सुहृत्परिवृतो राजा प्रविवेश पुरोत्तमम्।।**

**विसृज्य सुहृदः सर्वान्भ्रातन्पुत्रांश्च धर्मराट्।**

**मुमोद पुरुषव्याघ्रो द्रौपद्या सहितो नृप।।**

**केशवोऽपि मुदा युक्तः प्रविवेश पुरोत्तमम्।**

आहुकं पितरं वृद्धं मातरं च यशस्विनीम्।
**अभिवाद्य बलं चैव स्थितः कमललोचनः** ।। ३४ ।।

प्रद्युम्नसाम्बनिशठांश्चारुदेष्णं गदं तथा।
**अनिरुद्धं च भानुं च परिष्वज्य जनार्दनः।**

स वृद्धैरभ्यनुज्ञातो रुक्मिण्या भवनं ययौ ।। ३५ ।।

स तत्र भवने दिव्ये प्रमुमोद सुखी सुखम् ।। ३६ ।।

(मयोऽपि स महाभागः सर्वरत्नविभूषिताम्।

विधिवत्कल्पयामास सभां धर्मसुताय वै।।)

अस्मिन् अध्याये २ श्लोकाः ३६ सन्ति ।

**मन्त्रपर्वणि(२) द्वितीयोऽध्यायः**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि सभाक्रियापर्वणि भगवद्याने द्वितीयोऽध्यायः।। २ ।।

श्रीमन्महाभारततात्पर्यनिर्णये एकविंशाध्याये

स वायुधारितां गदां हि यौवनाश्वभूभृता ।

प्रसादतोऽस्य लम्भितामवाप्य मोदमाप ह ।।२।।

पुनश्च वत्सरद्वयं समुष्य केशवो ययौ ।

समर्चितश्च पाण्डवैर्वियोजनेऽस्य चाक्षमैः ।।३।।

# ३.तृतीयोऽध्यायः

# 02- 01- 03

**सभानिर्माणसामग्र्यानयनाय बिन्दुसरः प्रति मयस्य गमनम् ।। १ ।। गदाशङ्खाभ्यां सह सामग्रीं गृहीत्वा मयस्य खाण्डवप्रस्थागमनम् ।। २ ।। भीमार्जुनाभ्यां गदाशङ्खदानं सभानिर्माणं च ।।३ ।।**

**वैशम्पायनः**

एतस्मिन्नन्तरे राजन्मयो दैत्याधिपस्तथा।

विधिवत्कल्पयामास सभां धर्मसुताय वै।

अथाब्रवीन्मयः पार्थमर्जुनं जयतां वरम् ।। १ ।।

मयः-

आपृच्छे त्वां गमिष्यामि पुनरेष्यामि चाप्यहम्।
विश्रुतां त्रिषु लोकेषु पार्थ दिव्यां सभां तव ।। २ ।।

प्राणिनां विस्मयकरीं तव प्रीतिविवर्धिनीम्।
पाण्डवानां च सर्वेषां करिष्यामि धनञ्जय ।। ३ ।।

उत्तरेण तु कैलासं मैनाकं पर्वतं प्रति।
यियक्षमाणेषु पुरा दानवेषु मया कृतम् ।। ४ ।।

लक्षालङ्कारः - उत्तरेण तु कैलासम् इत्यत्र कैलासमुत्तरेण मैनाकपर्वतं प्रति कैलास पर्वतमारभ्य मैनाकपर्वतपर्यन्तं आयतायां बिन्दुरोवराख्यतीर्थयाभिमुख्ये विद्यमानाया सभाया यद् भाण्डमासीत्, तद् गृह्येति सम्बन्धः ।

चित्रं मणिमयं भाण्डं रम्यं बिन्दुसरः प्रति ।। ५ ।।

सभायां सत्यसन्धस्य यदासीद्वृषपर्वणः।
आगमिष्यामि तद्गृह्य यदि तिष्ठति भारत ।। ६ ।।

ततः सभां करिष्यामि पाण्डवस्य यशस्विनीम्।।
मनःप्रह्लादिनीं चित्रां सर्वरत्नविभूषिताम् ।। ७ ।।

अस्ति बिन्दुसरस्युग्रा गदा च कुरुनन्दन।
निहिता यौवनाश्वेन राज्ञा हत्वा रणे रिपून्।
सुवर्णबिन्दुभिश्रि्चत्रा गुर्वी भारसहा दृढा ।। ८ ।।

लक्षालङ्कारः - यौवनाश्वेन मुचुकुन्देन ।

निहिता भावयाम्येवं राज्ञा हत्वा रणे रिपून्।
सुवर्णबिन्दुभिश्चित्रा गुर्वी भारसहा दृढा ।। ८ ।।

सा वै शतसहस्रस्य सम्मिता शत्रुघातिनी।
अनुरूपा च भीमस्य गाण्डीवं भवतो यथा ।। ९ ।।

वारुणश्च महाशङ्खो देवदत्तः सुघोषवान्।
सर्वमेतत्प्रदास्यामि भवते नात्र संशयः ।। १० ।।

(१)क-(अधिकः पाठः)

तस्माद् गिरेरुपादाय शिलास्सुरुचिराश्शुभाः ।

इत्युक्त्वा सोऽसुरः पार्थं प्रागुदीचीं दिशं गतः।
अथोत्तरेण कैलासान्मैनाकं पर्वतं प्रति ।। ११ ।।(०१)

हिरण्यशृङ्गं सुमहान्महामणिमयो गिरिः।
रम्यं बिन्दुसरो नाम यत्र राजा भगीरथः ।। १२ ।।

द्रष्टुं भागीरथीं गङ्गामुवास बहुलाः समाः ।। १३ ।।

यत्रेष्टं सर्वभूतानामीश्वरेण महात्मना।
आहृताः क्रतवो मुख्याः शतं भरतसत्तम ।। १४ ।।

यत्र यूपा मणिमयाश्चैत्याश्चापि हिरण्मयाः।।
शोभार्थं विहितास्तत्र न तु दृष्टान्ततः कृताः।
अत्रेष्ट्वा स गतः सिद्धिं सहस्राक्षः शचीपतिः ।। १५ ।।(०२)

यत्र भूतपतिः सृष्ट्वा सर्वान्लोकान्सनातनः।
उपास्यते तिग्मतेजाः स्थितो भूतैः सहस्रशः ।। १६ ।।

नरनारायणौ ब्रह्मा यमः स्थाणुश्च पञ्चमः।
उपासते यत्र सत्रं सहस्रयुगपर्यये ।।१७ ।।(०३)

---

(०१) (३)क- अभ्यन्तरेण.

(०२) (४)क- नत्वदृष्टाश्च ते क्रतौ.

(०३) (३)क- उपास्यते.

यत्रेष्टं वासुदेवेन सत्रैर्वर्षगणान्बहून्।
**श्रद्दधानेन सततं धर्मसम्प्रतिपत्तये ।। १८ ।।**

लक्षालङ्कारः - यत्रेष्टं वासुदेवेन इत्यत्र वासुदेवेन नारायणेन । प्रतिपत्तये विश्वासाय ।

सुवर्णमालिनो यूपाश्चैत्याश्चाप्यतिभास्वराः।
**ददौ यत्र सहस्राणि प्रयुतानि च केशवः ।। १९ ।।**

तत्र गत्वा स जग्राह गदां शङ्खं च भारत ।। २० ।।

तस्माद्गिरेरुपादाय शिलास्सुरुचिराश्शुभाः।
**स्फाटिकं च सभाद्रव्यं यदासीद्वृषपर्वणः।**
**किङ्करैः सह रक्षोभिर्यदरक्षन्महद्धनम् ।। २१ ।।**

तदगृह्णान्मयस्तत्र गत्वा सर्वं महासुरः।।

तदाहृत्य च तां चक्रे सोऽसुरोऽप्रतिमां सभाम्।

विश्रुतां त्रिषु लोकेषु दिव्यां मणिमयीं शुभाम् ।। २२ ।।

गदां च भीमसेनाय प्रवरां प्रददौ तदा।
**देवदत्तं चार्जुनाय शङ्खप्रवरमुत्तमम् ।। २३ ।।**

**सा सभा भमिना सभ्या शातकुम्भमयद्रुमाः ।**

यस्य शङ्खस्य नादेन भूतानि प्रचकम्पिरे ।। २४ ।।

**सभा च सा महाराज शातकुम्भमयद्रुमा।।**

स कालं कश्चिदाश्वस्य विश्वकर्मा विचिन्त्य च ।
**सभां प्रचक्रमे कर्तुं पाण्डवानां महात्मनाम् ।। २५ ।।**

अभिप्रायेण पार्थानां कृष्णस्य च महात्मनः।
**सर्वर्तुगुणसम्पन्नां दिव्यरूपामलङ्कृताम्।**

**तर्पयित्वा द्विजश्रेष्ठान्पायसेन सहस्रशः** ।। २६ ।।

**दशकिष्कुसहस्राणि समन्तादायताभवत्** ।। २७ ।।[०१]

यथा वह्नेर्यथार्कस्य सोमस्य च यथा सभा।।
**भ्राजमाना तथात्यर्थं दधार परमं वपुः** ।। २८ ।।[०२]

अभिघ्नतीव प्रभया प्रभामर्कस्य भास्वराम्।।
**प्रबभौ ज्वलमानेव दिव्या दिव्येन वर्चसा** ।। २९ ।।

नवमेघप्रतीकाशा दिवमावृत्य विष्ठिता।
**आयता विपुला रम्या विपाप्मा विगतक्लमा** ।। ३० ।।

उत्तमद्रव्यसम्पन्ना रत्नप्राकारमालिनी(तोरणा)।
**बहुचित्रा बहुधना निर्मिता(सुकृता) विश्वकर्मणा** ।। ३१ ।।

न दाशार्ही सुधर्मा वा ब्रह्मणो वाथ तादृशी।
**सभा रूपेण सम्पन्ना यां चक्रे मतिमान्मयः** ।। ३२ ।।[०३]

तां स्म तत्र मयेनोक्ता रक्षन्ति च वहन्ति च।
**सभामष्टौ सहस्राणि किङ्करा नाम राक्षसाः** ।। ३३ ।।[०४]

अन्तरिक्षचरा घोरा महाकाया महाबलाः।
**रक्ताक्षाः पिङ्गलाक्षाश्च शुक्तिकर्णाः प्रहारिणः** ।। ३४ ।।

तस्यां सभायां नलिनीं चकाराप्रतिमां मयः।
**वैदूर्यपत्रविततां मणिनालमयाम्बुजाम्** ।। ३५।।

हैम(पद्म)सौगन्धिकवतीं नानाद्विजगणायुताम्।

---

(०१) (१)क- शतं निज । ख- शतनिष्क

(०२) (१)क- प्रभयाऽग्नेर्यथार्कस्य सोमस्य च यथैव ह ।.

(०३) (१)क- न तादृशी । क- न दाशार्हि.

(०४) (२)क- वहन्ति च.

पुष्पितैः चपङ्कजैश्चित्रां कूर्मैर्मत्स्यैश्च काञ्चनैः ।। ३६ ।।

चित्रस्फटिकसोपानां निष्पङ्कसलिलां शुभाम्।।
मन्दानिलसमुद्धूतां मुक्ताबिन्दुभिराचिताम् ।। ३७ ।।

महामणिशिलापट्टबद्धपर्यन्तवेदिकाम्।

मणिरत्नचितां तां तु केचिदभ्येत्य पार्थिवाः।
दृष्ट्वापि नाभ्यजानन्त तेऽज्ञानात्प्रपतन्त्युत ।। ३८ ।।

तां सभामभितो नित्यं पुष्पवन्तो महाद्रुमाः।
आसन्नानाविधा लोलाः शीतच्छाया मनोरमाः ।। ३९ ।।

काननानि सुगन्धीनि पुष्करिण्यश्च सर्वशः।
हंसकारण्डवोपेताश्चक्रवाकोपशोभिताः ।। ४० ।।

जलजानां च पद्मानां स्थलजानां च सर्वशः।
मारुतो गन्धमादाय पाण्डवान्स्म निषेवते ।। ४१ ।।(०१)

अष्टौ तानि सहस्राणि किङ्करा नाम राक्षसाः ।

अयस्मयप्रहरणाश् शूलमुद्गरपाणयः ।।ग- (अधिकः पाठः)

उपगूढाः प्रलृत्यन्ति समयन्ति स्म पाण्डवान् ।

प्राकारेण परिक्षिप्तां सत्रजालविभूषिताम् ।।

ईदृशीं तां सभां कृत्वा मासैः परिचतुर्दशैः।
निष्ठितां धर्मराजाय मयो राजन्यवेदयत् ।। ४२ ।।(०२)

अस्मिन् पर्वणि ३ अध्याये ४२ श्लोकाः

**मन्त्रपर्वणि (३) तृतीयोऽध्यायः ।**

---

(०१) (१)क- मुख्यानां.
(०२) (१)क- निष्ठितां.

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि सभाक्रियापर्वणि सभानिर्माणे तृतीयोऽध्यायः।। ३ ।।

# ४.चतुर्थोऽध्यायः

## 02- 01- 04

**युधिष्टरस्य सभाप्रवेशः । मयनिर्मिते सभाभवने युधिष्ठिरस्य प्रवेशः सभासदां महर्षीणां नृपाणां च वर्णनम्**

वैशम्पायनः

तां तु कृत्वा सभां श्रेष्ठां मयश्चार्जुनमब्रवीत्।

मयः-

एषा सभा सव्यसाचिन्ध्वजो ह्यत्र भविष्यति ।। १ ।।

लक्षालङ्कारः - तां तु कृत्वा इत्यत्र एषा सभा रचिता । ध्वजाग्रश्च मया कृतो भविष्यति।

भूतानां च महावीर्यो ध्वजाग्रे किङ्करो गणः।

तव वि(स्फ)प्फारघोषेण मेघवन्निनदिष्यति ।। २ ।।

अयं हि सूर्यसङ्काशो ज्वलनस्य रथोत्तमः।

इमे च दिविजाः श्वेता वीर्यवन्तो हयोत्तमाः।

**मायामयः कृतो ह्येष ध्वजो वानरलक्षणः ।। ३ ।।**

असज्जमानो वृक्षेषु धूमकेतुरिवोच्छ्रितः ।। ४ ।।(०१)

बहुवर्णं हि लक्ष्येत ध्वजं वानरलक्षणम्।

ध्वजोत्कटं ह्यनवमं युद्धे द्रक्ष्यसि विष्ठितम्।

---

(०१) (२)क- राशिरिवोत्थितः क- राशिरिवोच्छ्रितः.

वैशम्पायनः-

इत्युक्त्वाऽऽलिङ्ग्य बीभत्सुं विसृष्टः प्रययौ मयः ।। ५ ।।[०१]

ततः प्रवेशनं चक्रे तस्यां चक्रे राजा युधिष्ठिरः।

अयुतं भोज(यित्वा तु)यामास ब्राह्मणानां नराधिपः।। ६ ।।[०२]

परमान्नेन शुचिना मोदकैश्च फलैस्तथा ।

साज्येन पायसेनैव मधुना मिश्रिन च ।

भक्ष्यैर्मूलैः फलैश्चैव मांसैर्वाराहहारिणैः।

कृसरेण (अथ)च जीवन्त्या हविष्येण च सर्वशः ।। ७ ।।[०३]

मांसभक्ष्य प्रकारैर्विविधैः (फलै)लेह्यैश्चापि तथा नृप।
चोष्यैश्च विविधै राजन्पेयैश्च बहुविस्तरैः ।। ८ ।।[०४]

अहतैश्चैव वासोभि(र्माल्यैरुच्चावचैरपि) धनेन च सहस्रशः ।

भक्ष्यैर्मूलैः फलैश्चैव मांसैर्वाराहहारिणैः ।[०५]

तर्पयामास विप्रेन्द्रान्नानादिग्भ्यः समागतान् ।। ९ ।।

ददौ तेभ्यः सहस्राणि गवां प्रत्येकशः (पुनः) प्रभुः।
पुण्याहघोषस्तत्रासीद्दिवस्पृगिव भारत ।। १०।।[०६]

---

(०१) (४)क-द्रक्षयन्ति.

(०२) (१) तस्यां चक्रे, चक्रे तत्र, पार्थो (for राजा), भोजयित्वा तु(स) (for यामास), युधिष्ठरः, नराधिप.

(०३) (१)क-धृतपायसेन शुचिना ।.

(०४) (१) भक्षैर्, शुचिना (for मधुना), २ धृतपायसमधुना, साज्येन(सात्वेन) पायसेनैव(नाथ), घृते(घने) न पयसा चैव, परमान्नेन शुचिना, भक्षैर्, बहु (for भक्ष्यैर्), मूलैः (for मूल), मधुना मिश्रिन च, मोदकैश्च(कैः स) फलैस्तथा.

(०५) कृप कृश (for कृस), च (for (अ)थ)भक्ष्य (for मांस),भक्ष्यभोज्यप्रकारैश्च, चर्व्यै, लेह्यै, फलै (for खाद्यै), नृपः, चूष्यैश्च, शोष्यै आहतैः, अहतैः, चापि (for चैव), तथा (for अपि),धनेन, रुक्मेण, रौक्मेण, रुम्मेण, च सहस्रशः.

(०६)२तेषां (for तेभ्यः), (३) पुनः, तथा, तदा (for प्रभुः), दिवि(व्य)स्पृक्, कीर्तिवर्धनः (for इव भारत).

वादित्रैर्विविधैर्दिव्यैर्गन्धैरुच्चावचैरपि।
**पूजयित्वा कुरुश्रेष्ठो दैवतानि निवेश्य च ।। ११।।[०१]**

तत्र मल्ला नटा झल्लाः सूता वैतालिकास्तथा।
**उपतस्थुर्महात्मानं धर्मपुत्रं युधिष्ठिरम् ।। १२ ।।[०२]**

**लक्षालङ्कारः - तत्र मल्ला इत्यत्र हल्लाः नानावाद्यकुशलाः ।**

तथा स (कृत्वा पूजां) पूतां कृत्वा तां भ्रातृभिः सह पाण्डवः।
तस्यां सभायां रम्यायां रेमे शक्रो यथा दिवि ।। १३ ।।[०३]

सभायामृषयस्तस्यां पाण्डवैः सह आसते।
**आसाश्चक्रुर्नरेन्द्राश्च नानादेशसमागताः ।। १४ ।।[०४]**

असितो देवलः सत्यः सुमाली चाप्यथाङ्गिराः, ।
**अर्वावसुः सुमित्रश्च मैत्रेयः शुनको बलिः ।। १५ ।।[०५]**

आत्रेयः कण्वजठरौ मौद्गल्यो हस्तिकाश्यपौ।
**बको दाल्भ्यः स्थूलशिराः कृष्णद्वैपायनः शुकः ।। १६ ।।[०६]**

---

(०१)(२) क- माल्येलोश्चावचेन च । पूजयित्वा कुरूश्रेष्ठो दैवतानि निवेद्य च । गन्धैर्, दि(द्र)व्यैर् (for गीतैर्), (३) दिव्यैः, माल्यैः (for गन्धैः),चोच्चा (for उच्चा), तथा (for अपि), गन्धैर्धूपैश्च दामभिः, माल्येनोच्चावचेन च, (४) अपूजयत् (for पूजयित्वा), द्विजश्रेष्ठान्, सुरश्रेष्ठो, निवेद्य, देवताः संनिवेश्य च.

(०२) (२) मल्लनटाः, मल्लानटात्, मल्लाटनाः, मल्लाः, जल्लाः, चैव,भल्लाः, रल्लाः, गल्लाः, धल्लाः, फुल्लाः, सर्वे, हल्लाः,(नानावाद्यकुशलाः), झल्लाः, (४) क- सप्तरात्रं.सूतमा(ता मा)गधवन्दिनः, सूतमा(ता मा) गधकैः सह, सप्तरात्र, धर्मराजं, धर्मपुत्रं, सप्तराष्ट्रं.

(०३) (२) पूजां तां, तथा स पूजां तां(स पूजितां, प्रवेशनं) कृत्वा, (३) पार्थिवः (for पाण्डवः), धर्मात्मा, दिव्याय (for रम्यायां), दाल्भ्यः.

(०४)(४) चासते (for आसते), पाण्डवान्समुपासते, पाण्डवैः स्म सहा(दा)सते, पाण्डवैः स महामते, पाण्डवैश्च सहा (भा)सिरे, नानादेश्याः, (दिग्भ्यः) समा(सभा)गताः.

(०५) ८ (२) सूर्यः (for सत्यः), (३) सूर्यमाली, सर्पिर्माली, महागिराः, सुमाली चाप्यथाङ्गिराः, (४) अर्चावसुः, अद्य, आर्चा, दुर्वासाश्च, शौनको, बली, बलः, बलि.(सर्पिर्माली महाशिराः)

(०६) (१)खद्यजठरौ, कण्वकचचौ, कठरौ, करो .(३)क- दाल्भ्यः.

सुमन्तुर्जैमिनिः पैलो वैशंपायन एव च ।। १७ ।।(०१)

तित्तिरिर्याज्ञवल्क्यश्च ससुतो लोमहर्षणः।

अप्सुजातश्च धौम्यश्च अणीमाण्डव्यकौशिकौ ।। १८ ।।(०२)

दामोष्णी(षस्त्रैबलिश्च)षस्त्रिषवणः पर्णादो घटजानुकः।

मौञ्जायनो वायुभक्षः पाराशर्यश्च (सारिकः) हारितः ।। १९ ।।(०३)

बलिवाकः सिनीवाकः सत्यपालः कृतश्रमः।

जातूकर्णः शिखावांश्च आलम्बः पारिजातकः ।। २० ।।(०४)

पर्वतश्च महाभागो मार्कण्डेयो महामुनिः।

पवित्रपाणिः सावर्णो भालुकिर्गालवस्तथा ।। २१।।(०५)

जङ्घाबन्धुश्च रैभ्यः च कोपवेगस्तथा भृगुः।

---

(०१) ९ (१) दाल्भ्यः, (३) बकदाल्भ्यः(दांभ्यः), बकोद्दाल, बक्रो दाल्भ्यः, (४) (पौलो), तथा वसुः, तथैव ते, तथा च ये, वैशंपायन एव च.(व्यासशिष्यास्तथा वयम्)

(०२) १० (२) तैत्तिरिर्, (३) सुमुन्तो ,सुमन्तो, सुदेवो, संयु(यं)तो, संयुक्तो (for ससुतो), रोम (for लोम) (४) असु (for अप्सु), होमश्च, होत्रश्च, जातश्च, र्हो(हो)म्योथ, अणी, अणि, कण्वो, आणि).(होम्यश्च)

(०३) (१)क- मदोष्णमीषः.(२) त्रैबलिश्च(त्रैबलि, त्रैबली च, त्रिवर्गिश्च),त्रिषव(प)णः,
(३) शूकर्णाजो, पर्वादो, वर्णादो, घटजानुजः, काः, पटजानुकः, घटजानुगः, पर्णादो घजटाहुकाः,
(४) मुञ्जायनो, वायुभक्ष्यः, परासर्योथ सुनकः, सारिकः(शरिकः)सारकः, हारितः, पारासर्याश्च सारि(र)कौ, कौञ्जायन्योथ सारिकः.

(०४) ( २)चल, बलि, बली, वल, बाली, वलो (for बल), शिलीवाकः, सत्यपालः, सिनी (for शिनी), बलवाकशिनीवाकौ(कः शिनी चैकः,कशिनावाकौ, कोश्विनीवाकः), शी(नी)लवानश(वान्निशि), निर्धाता(तः),
(३) शुत्यपालः, सत्य, शूलपाणिः, मृत्युपालः, शून्य,भृत्य, सप्त,सव्यदानः, शिलीवाकः, बभ्रुपालः (for सुत्य), सुत्यपालः, कृताश्रमः,
(४) जातु(तू)कर्ण्यः, जातु(नु)कर्णः, जातुकर्णिः, सुपर्णः, गालवः, मालवः, व्यालश्च, आलम्बः, भुवनः, प्रलम्बः (for सुबलः).

(०५) (२) च्यवन (for पर्वत),महाबाहो, तथाभागो, (३) महा (for तथा),
(४) सावर्णि, सावर्णो, स्वपरो (for सावर्णिर्), जाल्लुकिर्, माल्लुकिर्, भालुकीर्(की), वालुभिर्, वालुकिर्, वालुग, गालुकिस्, भार्गवस्, दानवस् (for गालवस्), भानुकिर्दालवस्तथा.

**हरिबभ्रुश्च कौण्डिन्यो बभ्रुमाली सनातनः ।। २२ ।।**[०१]

**काक्षीवानौशिजः चैव नाचिकेतोऽथ गौतमः।**
**पैङ्ग्यो वराहः शुनकः शाण्डिल्यः च महातपाः ।। २३ ।।**[०२]

**कुक्कुरो वेणुजङ्घोऽथ कालापः कठ एव च ।**
**शार्ङ्गरस्तैलकुण्ड्यश्च पर्णवल्कस्तथैव च ।। २४ ।।**[०३]

**मुनयो धर्मविद्वांसो धृतात्मानो जितेन्द्रियाः।**
**एते चान्ये च बहवो वेदवेदाङ्गपारगाः ।। २५ ।।**[०४]

**उपासते महात्मानं सभायामृषिसत्तमाः।।**
**कथयन्तः कथाः पुण्या धर्मज्ञाः शुचयोऽमलाः।**[०५]
**तथैव क्षत्रियश्रेष्ठा धर्मराजमुपासते ।। २६ ।।**

**श्रीमान्महात्मा धर्मात्मा मुञ्जकेतुर्विवर्धनः।**[०६]

---

(०१) (२) जङ्घामन्यु, जङ्घाबन्ध(जङ्घश्चन्द, जङ्घाबद्ध),
(३) कोपवेगश्च वा, कोपवेगस्तथा, कोकवेगश्रवा, कोपो(गोप; को नु) वेगश्रवा,
(४) हरिर्बभुश्च, परिबक्र, हरिबक्र, हरिवभ्रु, प(व)रिबभ्रु(भ्र)श्च, चक्रमाली, बभ्र, बभ्रुमालिः.

(०२) (२) काक्षीवान्, कक्षि, कक्षीवाण्, उसिजश्चैव, औसिज, उषिज, कुशिक, ऋषिज,कुटिज, ऊषिज,
(३) क- लैङ्गो. क- पैङ्गो.ना गौ. नासिकेतथ, नाचिकेतश्च, शौनकः (for गौतमः),
(४) पिगो,पैलो,पैगिर्, लैगो,पैङ्ग्यो शौण्डिल्य, महायशाः,.

(०३) (१)कर्कटो, कर्केयो, कुक्कु(कु)रो, कुण्डिनो(लो), कुररो(कुरवो, कूररो, कूरवो, कुबेरो), जानुजङ्घश्च, वेणुजङ्घोथ, कालापः, (२)कालेयः, कत, कच, कल, कङ्क, कट (for कठ) शार्ङ्गुरस्, शार्ङ्गकस्, शैलकुम्भ्यश्च, तैलकुण्ड्यश्च, कूप्यश्च, परि, वर्ण (for पर्ण).

(०४) (२) एते वै (for मुनयो), धर्मविद्वांसो, धर्मरहिता,
(३) महा, जित्वा, जिता (for धृता)समागम्य महात्मानः(नं).

(०५) (१) क- महात्मानसु सभामध्ये युधिष्ठिरम् । उपासंती, समासते, उपासिर, महात्मानः,
(२) सभामध्ये युधिष्ठिरं, सभायां मुनिसत्तमाः, (३) प्रवदन्तः (for कथ),दिव्याः, शुभ्राः (for पुण्याः), धर्मज्ञाः (४) शुचयोखिलाः, शुचयो धर्मवत्सलाः.

(०६)(२) क्षत्रियाः(या)श्रेष्ठाः, क्षत्रिया राजन्, (३) युधिष्ठिरम् (for धर्मराजम्), उपासिरे, (४) श्रीमांश्च सुम(श्रीमान्वसर्म)हात्मा च, पुण्य, मुश्च (for मुञ्ज), विबन्धनः.

सङ्ग्रामजित् दुर्मुखश्च उग्रसेनश्च वीर्यवान् ।। २७ ।।(०१)

क्षेमश्च वसुदानश्च वैदेहश्च कृतक्षणः ।। २८ ।।

कक्षसेनः क्षितिपतिः क्षेमकश्चापराजितः।
काम्बोजराजः कमठः कम्पनश्च महाबलः ।। २९ ।।(०२)

सततं कम्पयामास यवनानेक एव यः।
बलपौरुषसम्पन्नान्कृतास्त्रानमितौजसः।

यथासुरान्कालकेयान्देवो वज्रधरः तथा ।। ३० ।।(०३)

जटासुरो मद्रकाणां च राजा
कुन्तिः पुलिन्दः च किरातराजः।
तथाऽऽङ्गवाङ्गौ सह पुण्ड्रकेण
पाण्ड्य उड्रराजौ च सहान्ध्रकेण ।। ३१ ।।(०४)

अङ्गो वङ्गः सुमित्रश्च शैब्यश्चामित्रकर्शनः।

किरातराजः सुमना यवनाधिपतिस्तथा।।
पाञ्चालश्च विराटश्च द्रुमशल्यः पृथुश्रवाः ।। ३२ ।।

---

(०१)(३) सङ्ग्रामजनमुख्यश्च, मखश्चाप्युग्र (for मुखश्च उग्र), सुमुखश्चैव (for उग्रसेनश्च), भारत (for वीर्य),.
(०२)(४) वज्र, तक्ष (for कक्ष), ५.क्षप(म)कश्चा, क्षेमकक्षापरा, क्षेमकश्च परा, ६.कम्बोजराजः, कमठः, कृकलः, कपिलः (for कमलः)कम्बोजराजः कमठः(कृकशः), कां(कं)बोजः कृकलश्चैव, कम्पनः, कम्बलश्च महाजरः.
(०३) सः (for यः) सम्पन्नः कृतास्त्रान्स्थि(मि)ततेजसः यथा सुतान्, तथा दुरान् (for यथासुरान्).
(०४) (२) मद्रकानां च, मत्त(मन्त्र)कान्तश्च, (३) कुम्भी, कुन्ती, कुणिः (for कुन्तिः),कुलिन्दश्च, कुलिङ्कु, पुलिन्द, किणिन्द, (४) त(य)थाङ्गवाङ्गौ, यथाङ्गवङ्गौ, तथाङ्कवङ्कौ, पुण्ड्रकेन, पौण्ड्रकेण(न), पाण्डकेण, पौण्ट्र, पाण्य, तथाङ्गवङ्कौ च सुपौण्ड्रकौ वा, पाण्ड्यश्च राजा, पाण्ड्योन्ध्रराजौ, सह च. (आं)ध्रकेन, पाण्ड्योत्र(पाण्ड्योथ पौण्ड्रोत्र, पाण्ड्योपि, पाण्योपि) राजा सह केरलेन कुन्ती, कुलिन्दकः, राजा कुन्ति(डी)पुलिङ्गकः, पौण्ड्र(पौण्ड्रि)कः, माद्र (for पाण्ड्य), नलकेश (for अन्ध्रकेण), पाण्ड्योण्ड्रराजौ च सह अन्ध्रकेण अङ्गो वङ्गः पाण्डुकश्च, अङ्गो वङ्गश्च पौण्ड्रश्च, वङ्गावङ्गश्च पौण्ड्रश्च, अङ्गो वङ्गश्च पौण्ड्रश्च, वङ्गावङ्गश्च पौण्ड्रश्च तथाङ्गवङ्गौ सहितौ, शैब्य(सैन्य) श्चामित्रकर्षणः, शैब्य आमित्र.

चाणूरो देवरातः च भोजो भीमरथश्च यः।[०१]

सुशर्मा चेकितानश्च मुख्यसेनश्च भारत ।

श्रुतायुधः च कालिङ्गो जयसेनश्च मागधः।

सुकर्मा चेकितानश्च पुरुः चामित्रकर्शनः ।। ३३ ।।[०२]

केतुमान्वसुदानः च वैदेहः अथ कृतक्षणः।।

सुधर्मा चानिरुद्धश्च श्रुतायुश्च महाबलः।[०३]

अनूपराजो दुर्धर्षः क्रमजिच्च सुदर्शनः।

शिशुपालः सहसुतः करूषाधिपतिः तथा ।[०४]

वृष्णीनां चैव दुर्धर्षाः कुमारा देवरूपिणः ।। ३४ ।।[०५]

आहुको विपृथुश्चैव गदः सारण एव च।[०६]

अक्रूरः कृतवर्मा च सत्यकश्च शिनेः सुतः ।। ३५ ।।[०७]

भीष्मकोऽथाकृतिश्चैव द्युमत्सेनश्च वीर्यवान्।

---

(०१) (२) शुम्भश्च च तथा (for सुमना), जव (for यव) पाश्चाल्यश्च, पाश्चालाश्च वानरो, चानरो, चाणुरो, चारणो, दे(दै)वराजश्च, भोजराज, भैमरथिश्च यः, देरिरथ(देवरथि)श्च यः, है(भै)मरथश्च यः, हैमरथोपि च, भैमरथोपि च(रथस्तथा).

(०२) (१)क-सुशठः । क- सुधर्मा।, (२) शता (for श्रुता), विक्रान्तो (for कालिङ्गो), (३) जयसेनश्च, यज्ञ, (४) सुकर्मा, सुधर्मा, च कृतानश्च (for चेकिता), सुरथो(जो)मित्रकर्शनः, वैदेहोथ कृतक्षणः, पु(म पू) रुश्चामित्रकर्षणः, भुख्यसेनश्च भारत.

(०३) (१).क्षेमश्च (for केतुमान्),वष्वादानश्च केतुबन्धः सुदानश्च- (२) वैदेहश्च विदर्भश्च, वैदेहोकृतलक्षणः, (३) सुव(श)र्मा चा; (४)निषधश्चा, महारथः (for बलः).

(०४)(२) अनूपराजा (३) क्षेमक(य)श्च, क्षेपजिच्च, सुदर्शनः अदक्षिणः (for सुद),क्रमजिच्च सुदर्शनः, (४) सुपुत्रश्च, सअत्वकीकः, दशग्रीवः (for सहसुतः), शिशुपालदशग्रीवौ, शुशुपालो जरासन्धः, करूशा.

(०५) (१) क- विपृथुश्चैव ,(२) सुरूपाम (for वृष्णीनां),चापि (for चैव), (३) काम (for देव).

(०६) (१)आहुको विप्रथुश्चैव, आहुकोऽपि पृथुश्चैव, आहुकः पृथुकश्चैव.

(०७) (१)क- ऽथाहृतिश्चैव, (२) कृतकर्मा, क्रूरकर्मा.

केकयाश्च महेष्वासा यज्ञसेनश्च सौमकिः ।। ३६ ।।(०१)

केतुमान्वसुमांश्चैव कृतास्त्रश्च महाबलः।

एते चान्ये च बहवः क्षत्रिया मुख्यसम्मताः।।
उपासते सभायां स्म कुन्तीपुत्रं युधिष्ठिरम् ।। ३७ ।।

अर्जुनं ये च संश्रिय राजपुत्रा महाबलाः।।
अशिक्षन्त धनुर्वेदं रौरवाजिनवाससः ।। ३८ ।।(०२)

तत्रैव शिक्षिता राजन्कुमारा वृष्णिनन्दनाः।।
रौक्मिणेयश्च साम्बश्च युयुधानश्च सात्यकिः ।। ३९ ।।(०३)

चाणूरो देवरातश्च भोजो भैमरथोऽपि च ।
शतायुधश्च कालिङ्गो यज्ञसेनश्च मागधः ।। ४० ।।(०४)

एते चान्ये च बहवो राजपुत्रा महाबलाः।
धनञ्जयमुपातिष्ठन्धनुर्वेदचिकीर्षवः ।। ४१।।

सुधर्मा चानिरुद्धश्च शैब्यश्च नरपुङ्गवः।।
एते चान्ये च बहवो राजानः पृथिवीपते ।। ४२ ।।

---

(०१) (१) सत्यक(कि)श्च, सात्यकश्च, सात्विकिश्च, सिने, शिनिजः(निरिजे), शश एव च, (२) को भीष्मकश्च धृतिश्चैव, भीष्मकोथाकृति(वृति, हृदि)श्चैव, भीष्मकश्चाहु(को व्याहृ, कोप्याहु)तिश्चैव, भीष्मकोथाहुकश्चैव, भीष्मकः साङ्गतिश्चैव, को हृदि(ति, षि)कश्चैव, भीष्मक्रोधाहृतिश्चैव, आहृति, (३) द्युम्न(म)सेनश्च, क्रतुसेन, युयुत्सेन, द्रुमसेन, (४) कैकेयाश्च, कौन्तेयाश्च, महावीर्या (for महे), जयत्सेनश्च, व्रजसेनश्च, सोमकिः, सौमिकः, सौनकिः, सोमकः(सैनिकाः) क्षतायुश्च (for कृतास्त्र) युद्धदुर्मदाः(संमताः), मुख्यसत्तमाः,लोकसंमताः, राजानो मुख्यतां गताः, क्षत्रमुख्याः समागताः, तां, वै (for स्म).
(०२)(२) चैव, ये च (for चापि),संश्रुत्य, संसृत्य, संगृह्य, अर्जुनं तू(चो)पसङ्गृह्य, (३) महारथाः यशस्विनः (for महाबलाः), शिक्षन्ते स्म (for अशिक्षन्त), वेदा.
(०३)(२) तथैव, सर्वे (for राजन्), (३) कुमारा वृष्णिवर्धनाः, वृष्णिपुत्रा यशस्विनः, (४) प्रद्युम्नो रौक्मि(हि)णेयश्च, युयुधानोथ सुधर्मा चानिरुद्धश्च शैब्यश्च नरपुङ्गवः (सुधन्वा, सुशर्मा, चेकितानश्च (for चानिरुद्ध).
(०४) (४)क- जयत्सेनश्च.

धनञ्जयसखा चात्र नित्यमास्ते स्म तुम्बुरुः।(०१)
**उपासते महात्मानमासीनं सप्तविंशतिः ।। ४२ ।।**

चित्रसेनः सहामात्यो गन्धर्वाप्सरसस्तथा।।
**तस्यां सभायामास्ते स्म बहुभिः परिवारितः ।। ४३ ।।(०२)**

गीतवादित्रकुशलाः साम्यतालविशारदाः।(०३)
**प्रमाणेऽथ लये स्थाने किन्नराः कृतनिश्रमाः ।। ४४ ।।**

ते चोदितास्तुम्बुरुणा गन्धर्वाः किन्नरैस्सह ।
**दिव्यगानेषु गायन्ति गाथा दिव्याश्च भारत ।। ४५ ।।(०४)**

शम्यातालेषु कुशलाः गीतवाद्यविशारदाः।(०५)

सम्बो(श्चो)दितास्तुम्बुरुणा गन्धर्वसहितास्तदा।

गायन्ति दिव्यतानैस्ते यथान्यायं मनस्विनः।

**पाण्डुपुत्रानृषींश्चैव रमयन्त उपासते ।। ४६ ।। (०६)**

तस्यां सभायामासीनाः सुव्रताः सत्यसङ्गराः।

---

(०१)(३) राजानः पृथिवीश्वराः (सुराः), राजपुत्रा महाबलाः (४) चैव, तत्र (for चात्र), त्र, च, स (for स्म), तुंबरुः उपासत (ते) तमासीनं आसीनाः, गन्धर्वाः (for आसीनं).

(०२) (१) (२) गन्धर्वराजः सामात्यः, (३) गन्धर्वाप्सरसां गणैः.

(०३) (१).नृत्य, शम्यास्ताल, शिष्या ताल, स(श)म्यक्ताल,(२) सम्याताल, रम्याताल, शम्यताल, शम्या, साम्यं(=तालविशेष), शंपा(=दक्षिणहस्तगृहीततालविशेषः).

(०४)(२) च तु (for ऽथ), लये (for लय). (३) विश्रमाः, कृतश्रमाः, (४) संनोदितास्, चोदितास्, तुंबरुणा, तंबु, गन्धर्व (for गन्धर्वाः), सभायां, संहताः (for सहिताः), विभो, तथा, तदा (for जगुः).

(०५) (१) गन्धर्वसहितास्तदा(स्तथा),(२) गन्धर्वाः(र्वैः)किन्नरैः सह.

(०६) (१) गायन्तो, दिव्यगानैस्ते, मानैश्च, गाथैस्ते, तालैस्ते, तैः (for ते), दिव्यगानेषु गायन्ति (गानेष्वगायन्त; तेनेषु गायन्ति, दिव्यतानैः, (२) यथाज्ञाय, यथान्यासं, दिव्यगाथा स्म भारत; गाधा(था) दिव्याश्च भारत, समक्ता शम्यता, वादिते (for वादने), गीतवाद्यविशारदाः (४) पाण्डवेयान् (for पाण्डुपुत्रान्), नृपांश्चैव (for ऋषीं), उपासिरे.

दिवीव देवा ब्रह्माणं युधिष्ठिरमुपासते ।। ४७ ।।(०१)

अस्मिन् पर्वणि ४ अध्याये ४७ श्लोकाः

मन्त्रपर्वणि (४) चतुर्थोऽध्यायः ।

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि सभाक्रियापर्वणि सभाप्रवेशो नाम चतुर्थोऽध्यायः।। ४।।

# ५.पञ्चमोऽध्यायः

श्रीमन्महाभारततात्पर्यनिर्णये एकविंशाध्याये

ततः कदाचित् प्रवरे सभातले धर्मात्मजो राजभिर्भ्रातृभिश्च ।

वृतो निशम्यैव सभाः सुराणां यथा स्थिता नारदमन्वपृच्छत् ।।५०।।

अन्तरिक्षं त्वया प्रोक्तं लक्षयोजनमुच्छ्रितम् ।

अर्द्धकोट्युच्छ्रितः स्वर्गो विमानावलिसङ्कुलः ।।५१।।

भुवः स्वर्गश्च कोट्यैव योजनानां प्रविस्तृतौ ।

महर्जनस्तपश्चैव क्रमादध्यर्द्धयोजनाः ।

पञ्चाशत्कोटिविस्तारा योजनानां समस्तशः ।।५२।।

यावन्त एते मिलितास्तत्प्रमाण उदीरितः ।

सत्याख्यो ब्रह्मलोकस्तु यत्र ब्रह्मा विराजते ।।५३।।

ततश्च द्विगुणः प्रोक्तो विष्णुलोकः सनातनः ।

उत्तरोत्तरतः सर्वे सुखे शतगुणोत्तराः ।।५४।।

अनन्तजनसम्पूर्णा अपि ते हीच्छया हरेः ।

---

(०१) (१) २।।सत्यवादिनः (for सङ्गराः), तस्यां सभायामृषयो(यां राजानं, यां कुशलो), राजानश्च पृथग्विधाः, (३) देवं (for देवा, देवेन्द्रं (for ब्राह्मणं) सभाक्रिया, सभाप्रवेशः, युधिष्ठिरसभावर्णनं(सभाप्रवेशः).

अवकाशवन्तो दिव्यत्वात् पूर्यन्ते न कदाचन ।
सर्वकामसुखैः पूर्णा दिव्यस्त्रीपुरुषोज्ज्वलाः ॥५५॥
दिव्यरत्नसमाकीर्णं तथा पातालसप्तकम् ।
अधस्ताच्छेषदेवेन बलिना समधिष्ठितम् ॥५६॥
कामभोगसमायुक्ता बहुवर्षसहस्रिणः ।
सप्तद्वीपेषु पुरुषा नार्यश्चोक्ताः सुरूपिणः ॥५७॥
एषां च सर्वलोकानां धाता नारायणः परः ।
विष्णुलोकस्थितो मुक्तैः सदा सर्वैरुपास्यते ॥५८॥
सेवका ब्रह्मणश्चैव देवा वेदाश्च सर्वशः ।
शक्रस्य मुनयः सर्वे हरिश्चन्द्रश्च भूमिपः ॥५९॥
अखिला अपि राजानः पाण्डुश्चास्मत्पिता मुने ।
यमस्यैवानुगाः प्रोक्ता राजभिस्तैर्यमेन च ॥६०॥
उपास्यमानो भगवान् रामो यमसभातले ।
उक्त इन्द्रेण चोपास्यो वामनात्मा जनार्दनः ॥६१॥
प्रादुर्भावाश्च निखिला ब्रह्मणोपासिताः सदा ।
वरुणस्यानुगा नागास्तत्र मत्स्याकृतिर्हरिः ।
गन्धर्वा धनदस्यापि तत्र कल्की हरिः प्रभुः ॥६२॥
रुद्रस्योग्राणि भूतानि नृसिंहात्मा शिवेन च ।
उपास्यते सदा विष्णुरित्याद्युक्तं त्वयाऽनघ ।
सर्वरत्नस्थलान् दिव्यान् देवलोकान् प्रभाषता ॥६३॥

# ५.पञ्चमोऽध्यायः

## 02- 01- 05

**तत्रागतेन नारदेन युधिष्ठिरं प्रति कुशलप्रश्नव्याजेन राजनीतिकथनम् ।। १ ।। नारदस्य युधिष्ठिरसभायामागमनं प्रश्नमुखेन युधिष्ठिराय राजनीत्युपदेशदानं च**

**वैशम्पायनः**

अथ तत्रोपविष्टेषु पाण्डवेषु महात्मसु।
**महत्सु चोपविष्टेषु गन्धर्वेषु च भारत ।। १ ।।**[०१]

वेदोपनिषदां वेत्ता ऋषिः सुरगणार्चितः।
**इतिहासपुराणज्ञः पुराकल्पविशेषवित् ।। २ ।।**

स्तुतिस्तोमग्रहस्तोमपदक्रमविभागवित्।
**न्यायविद्धर्मतत्त्वज्ञः षडङ्गविदनुत्तमः ।। ३ ।।**

ऐक्यसंयोगनानात्वसमवायविशारदः।।
**शिक्षाक्षरविशेषज्ञः पुराकल्पविशेषवित् ।। ४ ।।**

आदिकल्पार्थवक्ता च कल्पसूत्रार्थतत्त्ववित्।।
**ब्रह्मचर्यव्रतपरः सभापोषविशारदः ।। ५।।**[०२]

वक्ता प्रगल्भो मेधावी स्मृतिमान्नयवित्कविः।
**परापरविभागज्ञः प्रमाणकृतनिश्चयः ।। ६ ।।**

पञ्चावयवयुक्तस्य वाक्यस्य गुणदोषवित्।
**उत्तरोत्तरवक्ता च वदतोऽपि बृहस्पतेः ।। ७ ।।**

धर्मकामार्थमोक्षेषु यथावत्कृतनिश्चयः।
**तथा भुवनकोशस्य सर्वस्यास्य महामतिः।।**

**प्रत्यक्षदर्शी लोकस्य तिर्यगूर्ध्वमधस्तथा ।। ८।।**

---

(०१) (१) क-नारदः,अथ (for तथा), अथो(तत्रो, ततो, तथो) पविष्टेष्वृषिष, (२) च राजसु (for महात्मस, पार्थिवेषु च भारत(नारदः), (४) सर्वशः (for भारत), महात्मसु च सर्वतः.
(०२) (४)क- ऊहापोहविशारदः क- उभावेव विशारदः.

(३)क-( अधिकः पाठः)

दिवि चेह च कोशस्य अन्वितस्य महामतिः ।

क- भुवि चैव तथा शस्य अश्वितश्च महाद्युतिः ।।

साङ्ख्ययोगविभागज्ञो निर्विविक्षुः सुरासुरान्।।
सन्धिविग्रहतत्त्वज्ञस्त्वनुमानविभागवित् ।। ९ ।।

लक्षालङ्कारः - निर्विविक्षुरुदारधीः इत्यत्र नितरां वेष्टुमिच्छुः निर्विविक्षुः ।

षाड्गुण्यविधियुक्तश्च सर्वशास्त्रविशारदः।।
युद्धगान्धर्वसेवी च सर्वत्राप्रतिघस्तथा ।। १०।।

एतैश्चान्यैश्च बहुभिर्युक्तो गुणगणैर्मुनिः।।
लोकाननुचरन्सर्वानागमत्तां सभां नृप ।। ११ ।।

नारदः सुमहातेजा ऋषिभिः सहितस्तदा।। (०१)
पारिजातेन राजेन्द्र रैवतेन(पर्वतेन) च धीमता ।। १२ ।।(०२)

सुमुखेन च सौम्येन देवर्षिरमितद्युतिः।।
सभास्थान्पाण्डवान्द्रष्टुं प्रीयमाणो मनोजवः ।। १३ ।।(०३)

जयाशीर्भिस्तु तं विप्रो धर्मराजानमार्चयत्।।

तमागतमृषिं दृष्ट्वा नारदं सर्वधर्मवित्।

---

(०१) (१) देशान्, सर्वान् (for लोकान्), उपचरन्, अतिचरन्, लोकान् (for सर्वान्), देवलोकात्तदा राजन्, सर्वानपि चरँल्लोकान्, (२) अगमत्, महान् (for सभाम्), नृप, प्रति (for ऋषिः),आजगाम यदृच्छया, (३) तु (for सु), (४) मुनि (for ऋषि) तथा, सभां (for तदा).

(०२) (१) पारिपात्रेण, पाजिनेन, पारिजाते, परिज्ञाने च, दैवतेन, पर्वतेन, क्कहडेना (for रैव), महात्मा (।।. च धीमता). .

(०३) (१) सुमसखेनाथ (for खेन च), धौम्येन (for सौ), (२) महर्षिरमित, देवर्षिश्चामित, (३) सभायां, (४) प्रीयमानो, महौजसः, बभूव ह (for मनो), प्रीयमाणान्मनोजवान् च तं, स्तुवन् (for स्तुतं), जयाशीर्वच(द)नेनाथ, अर्च (for आर्च).

सहसा पाण्डवश्रेष्ठः प्रत्युत्थायानुजैः सह ।
अभ्यवादयत प्रीत्या विनयावनतस्तदा ।। १४ ।।[०१]

जयाशीर्वचनेनाथ धर्मराजानमर्चयत् ।। १५।।

तदर्हमासनं तस्मै सम्प्रदाय यथाविधि।
गां चैव मधुपर्कं च सम्प्रदायार्घ्यमेव च ।

अर्चयामास रत्नैश्च सर्वकामैश्च धर्मवित्।[०२]
तुतोष च यथावच्च पूजां प्राप्य युधिष्ठिरात् ।। १६ ।।

सोऽर्चितः पाण्डवैः सर्वैर्महर्षिर्वेदपारगः।
धर्मकामार्थसंयुक्तं पप्रच्छेदं युधिष्ठिरम् ।। १७ ।।[०३]

नारदः

कच्चिदर्थाश्च कल्पन्ते धर्मे च रमते मनः।
सुखानि चानुभूयन्ते मनश्च न विहन्यते ।। १८ ।।

कच्चिदाचरितं पूर्वैर्नरदेव पितामहैः।
वर्तसे वृत्तिमक्षुद्रां धर्मार्थसहितां त्रिषु ।। १९ ।।[०४]

कच्चिदर्थेन वा धर्मं धर्मेणार्थमथापि वा।

---

(०१) (१) समागतम्, तमायान्तम् (for तमागतम्), (२) धर्मवित्तमं, तु स धर्मवित् (for सर्वधर्म) (३) सगणः (for सहसा), पाण्डवो ज्येष्ठः पाण्डवज्येष्ठः (४) अभ्यवान्ययतः प्रीत्या, वादयतं प्री, अभिवाद्य तः प्रीत्या (५)क- अभिवाद्य ततः प्रीत्या विनयावनतस्तथा ।.

(०२) (१) सदर्भम् (for तदर्हम्), तदर्हमानं चास्मै स ३।।तर्प (for अर्च), (४) सर्ववित्, पार्थिवः यथावत्स(यथान्यायं) ऋषिस्तस्मात्, महर्षिस्तां, तुतोष महर्षिस्तस्माच्च, नारदस्तस्मात्.

(०३)(२) दवर्षिर्, स ऋषिर्, सहर्षीर् (for महर्षीर्), वेदपारगैः, (३) धर्मकामार्थसहितं, धर्मार्थकामसंयुक्तं.

(०४) (१) च कल्प्यन्ते, प्रकल्प्यन्ते, प्रकल्प्यन्ते, कल्पं(ल्प्यं)ते कच्चिदर्थास्ते(कच्चित्तेर्थाः प्रकल्पन्ते), (२) मतिः (for मनः), (३) सुखानि तव जायन्ते, (४) मनश्च, न. न पुनश्च न विद्यते, भोगाश्च विविधा नृप, विमतश्च विहन्यते.

उभौ वा प्रीतिसारेण न कामेन प्रबाधसे ।। २० ।।[०१]

लक्षालङ्कारः - कच्चिदर्थेन वा धर्मम् इत्यत्र अर्थेन अर्थार्जनप्रयत्नेन धर्मं स्वविहितधर्मं न बाधसे कच्चित् । धर्मेण सदा स्नानादिव्यसनेन अर्थं राजपदवीयोग्याथ न बाधसे कच्चित् । अयं सन्न्यासिनां धर्मः; न तु राज्ञ इति भावः । प्रीतिरेव सारः श्रेष्ठो यस्मिन् तेन कामेन उभौ धर्मार्थौ न विबाधसे कच्चित् । वनितादिविषयासक्तो भूत्वा धर्मार्थौ न जहासि किम् इति भावः ।

कच्चिदर्थं च धर्मं च कामं च जयतां वर।
विभज्य काले कालज्ञः सदा वरद सेवसे ।। २१ ।।[०२]

कच्चिद्राजगुणैः षड्भिः सप्तोपायांस्तथानघ।
बलाबलेन(लं तथा) सम्यक्त्वं चतुर्दश निषेवसे ।। २२ ।।[०३]

लक्षालङ्कारः - कच्चिद्राजगुणैः इत्यत्र सन्धिविग्रहयानासनद्वैधीभावाश्रयाख्यैः षड्भी राजगुणैः सह सामदानभेददण्डप्रभावोत्साहमन्त्राख्यान् सप्तोपायान्, सम्यग् बलं, सम्यगबलम्, कार्यं बले अबले सति च कर्तव्यं कर्म इति दश सदा निषेवसे किम् ।

कच्चिदात्मानमन्वीक्ष्य परांश्च जयतां वर।
तथा सन्धाय कर्माणि अष्टौ भारत सेवसे ।। २३ ।।[०४]

लक्षालङ्कारः - तथा सन्धायिकर्माणि इत्यत्र सन्धायीनि सन्धिं सम्पादयन्तीति सन्धायीनि

---

(०१) (१) चरितं, चरिता, (३) कच्चिद् (for वृत्तिम्), अक्षिणां, अक्षुद्रां वर्तते वृत्तिरक्षीणा, (४) रहितां सहिता, त्रिषु, शुभां (for नृषु), धर्मकामार्थसंहितां.
(०२) (१) यद् (for वा) , कच्चिदर्थं न चाधर्मं, (२) धर्मेनार्थम्, च (for वा) (३) च वै (for वा), उभौ प्रतीतिसारेण, (४) कामे न प्रतिबाधसे, कामेन (for कामे च) न च (वि) बाधसे, विबाधसे.
(०३)(१/२)धर्मं कामं, वदतां (for जयतां), (३) धर्मज्ञः, कालज्ञः, (४) समं, सदा, सदाचारं च सेवसे.
(०४) (१) राजगुरोः, राजन्गुणैः, सद्भिः (for षड्भिः) (२) सप्तोपायैस्, रमां, सप्तोपायास्, प्राप्तोपायांस्, तथैव च (for तथानघ), (३) बलाबले तथा, बलेनथा, च तत् (for तथा), च सम्यक्च (सर्वं च), सौम्यं च), तथासवाः, सवः (for तथा सम्यक्), बलाबलेन सम्यक्त्वं(क्च),

**तानि च तानि कर्माणि च । भारतस्त्वं वर्तौ किं नु इति योजना ।**

**कच्चित्प्रकृतयः सप्त न लुप्ता भरतर्षभ।**
**आढ्यास्तथा व्यसनिनः स्वनुरक्ताश्च सर्वशः ।। २४ ।।(०१)**

**लक्षालङ्कारः - आप्ताश्चैवाव्यवसिन इत्यत्र व्यवसिनः विरुद्धः अवसः अवसायः अध्यवसायः तद्वन्तो न भवन्तीति अव्यवसिनः ।**

**कच्चिन्न कृतकैर्दूतैर्ये चाप्यपरिशङ्किताः।**
**त्वत्तो वा तव चामात्यैर्भिद्यते मन्त्रितं तथा ।। २५ ।।(०२)**

**मित्रोदासीनशत्रूणां कच्चिद्वेत्सि चिकीर्षितम्।**
**कच्चित्सन्धिं यथाकालं विग्रहं चोपसेवसे ।। २६ ।।(०३)**

**लक्षालङ्कारः - कच्चिन्न तर्कैरत्यूहैः इत्यत्र तर्कैः, एवं चेदेवं भविष्यतीत्यूहैः, दूतैः परेषां दूतैः अपरशङ्किताः परे वैरिण इति शङ्किता न भवन्तीत्यपरशङ्किताः, जात्यादिकमाच्छाद्य तव समीपे**

---

(४) चतुर्धा सं(च), कार्यं दश (for चतुर्दश), दश, समीक्षते(क्षयसे, क्ष्य च), निषेवसे, दशभिरीक्षसे.

(०१) (१) मर्थाश्च, मन्विष्य (for मन्वीक्ष्य) (२) पुत्रांश्च (for परांश्च), परांश्चैव विशेषतः,
(३) सन्धायि, कार्याणि, धर्मेण (for कर्माणि), (४) चाष्टौ, ह्यष्टौ (for अष्टौ), भारताष्टौ निषेवसे, चाष्टौ वरद सेवसे.

(०२) (१) सप्त (सत्ये) सर्वा, षड्भ्यः (for षट् ते), कच्चित्प्रकृतिषट्केषु, (२) न लु(ल)ब्धा, अलुध्धो, लप्ता, ह्य(अ)लुब्धा, पुरुषर्षभ, अलुब्धाः पुरुषर्षभ, (३)
(४) आढ्यास्तथा(अप्ताश्चैव)व्यवसिनः, अढ्याश्चा(श्च)व्यवसनिन्यश्च, आर्यश्चैवाव्यसनिनः, आत्ताश्चा(श्च)व्यसनिन्यश्च, आर्याश्चैवाव्यवसनिनः, आत्ताश्च वै व्य, अढ्याश्चाप्य(श्चैवा)व्य, ह्यनुरक्ताश्च, त्वनु, तनु, स्वानु, व्यनु, अनु, आढ्याश्चैवाव्यसनिनोप्यनुरक्ताश्च सर्वशः.

(०३) (१) कच्चित्तत् (for कच्चिन्न), धूर्तै(दूते)स्तर्कैर्वा, कृतकैर्दूतैः, तर्कितैर्दूतैः, कृतकैर्धूतैः, तर्ध्यूतैर्वा, कच्चिन्निकृतिनै(कै)र्दूतैः, कृतकैः, ये चाप्यपरिसश्चिताः, (२) ये चाप्य परिषत्कथाः, ये चान्ये(प)परिशङ्किताः, चारैर्वा(र्न)परिषस्कथा, चारैर्वापरिशङ्किताः, ये चाप्यपरिशङ्किताः (तैः)चारैर्वा परिषत्तथा, अपरिशङ्किताः,
(३) रहो, ततो, त्वया (for त्वत्तो), स तु, न तु (for तव), न तवामात्यैः (for तव वामा), चामा, वार्ता (for वामा), त्वत्तो वाथ तवामात्यैः,
(४) वेद्यते, भिद्यते, न तु तव (for जातु), मन्त्रितं तथा (for जातु मन्त्रि).

सेवकतया स्थिताः वैरिण इत्यर्थः । तैः त्वया वा तव अमात्यैर्वा तव मन्त्रितं आलोचनं न भिद्यते कच्चित् अन्यैर्न ज्ञायते कच्चिदित्यर्थः ।

कच्चिद्वृत्तिमुदासीने मध्यमे चानुमन्यसे ।। २७ ।।

लक्षालङ्कारः - उदासीनेषु त्वय्युदासीनेषु मध्यमेषु त्वयि च तव शत्रुषु च मैत्रीं दर्शयत्सु वृत्तिः तत्तदनुसारेण तव वर्तनं उपपद्यते कच्चित् युक्ता जायते कच्चित् । तत्तत्स्वभावाज्ञानात् तेष्वतिमैत्रीं न करोषि कच्चिदित्यर्थः ।

कच्चिदात्मसमा वृद्धाः शुद्धाः सम्बोधनक्षमाः।
कुलीनाश्चानुरक्ताश्च कृतास्ते वीर मन्त्रिणः ।। २८ ।।(०१)

विजयो मन्त्रमूलो हि राज्ञो भवति भारत।।

कच्चिन्मन्त्रयसे नैकः कच्चिन्न बहुभिस्सह ।

कच्चित्संवृतमन्त्रैस्तैरमात्यैः शास्त्रकोविदैः। (०२)

राष्ट्रं सुरक्षितं तात शत्रुभिर्न विलुप्यते।।

कच्चिन्मन्त्रयसे नैकः कच्चिन्न बहुभिः सह ।
कच्चित्ते मन्त्रितो मन्त्रो न राष्ट्रं परिधावति ।। २९ ।।(०३)

लक्षालङ्कारः - कच्चिन् मन्त्रयस इत्यत्र एकः स्वबन्धूनपि विहाय त्वमेक एव न मन्त्रयसे कच्चित् । बहुभिर्ज्ञाताज्ञातैर्बहुभिः ।

---

(०१) (१) तथाकालं यथान्यायं, च यानं च, २.चापि (for चोप), ३.क- विनीताश्च यत्तस्ते मन्त्रिणः क-ताः । क- नियता मन्त्रिणः क-ताः,उदासीनं(नां), उदासीनेषु वृत्तिं च (वृत्तिश्च),
(४).मध्यमां, वानुवर्तसे, चानुपद्यसे, चालक्षालङ्कारः -, नुमन्यसे, मध्यमेषूपपद्यते.

(०२) (१) वृद्धाः(वृत्ताः, वृद्धाः) (२) जीवितं क्षमाः, निर्णयक्षमाः, विगतक्लमाः, शुद्धाः संबोध(पाद)नक्षमाः, (३) कुलीनाश्च विनीताश्च, (४) वर (for वीर), नियता(नियुतां यत्नास्ते, यत्तास्ते, रक्तास्ते)मन्त्रिणः कृताः.

(०३) (१) वशे (for वशं), (२) पि, प्र (for वि), (३) कच्चिद्वा(द)पर, च्चापरराष्ट्रेषु, अर्थवित्, चितयंश्चार्थ(यन्सर्व, यस्यर्थ)निश्चयान्.

मन्त्रो विजयमूलं हि राज्ञो भवति भारत ।
**सुसंवृतो मन्त्रधरैर् अमात्यैश्शास्त्रकोविदैः** ।। ३० ।।(०१)

कच्चिन्निद्रावशं नैषि कच्चित्काले विबुद्ध्यसे।
**कच्चिच्चापररात्रेषु चिन्तयस्यर्थमर्थवित्** ।। ३१ ।।(०२)

कच्चिदर्थान्विनिश्चित्य लघुमूलान्महोदयान्।
**क्षिप्रमारभसे कर्तुं न विघ्नयसि तादृशान् ।। ३२ ।।**

कच्चिन्न सर्वे कर्मान्ताः परोक्षास्ते विशङ्किताः।(०३)
**परोक्षं वा महाराज मध्यं ह्यत्र प्रशस्यते।**
**सर्वे वा पुनरुत्सृष्टाः संसृष्टं चात्र कारणम्** ।। ३३ ।।(०४)

लक्षालङ्कारः - कच्चिन्न सर्वे कर्मान्ता इत्यत्र कर्मान्ताः कर्मकराः, 'कर्मान्तः स्यात्कर्मकरो भुजिष्यः किङ्करो मतः' इति हलायुधः । प्रत्यक्षाः कच्चित् स्वयमेव तान् दृष्ट्वा कर्मसु नियोजयसि कच्चित् । अथवा, परोक्षा वा अत्र प्रत्यक्षपरोक्षयोर्मध्यं केषुचित्प्रत्यक्षं केषुचित्परोक्षं चेति द्वेधाऽपि स्थितिः प्रशस्यते । सर्वयापि स्वमुखेनैव करणं मन्त्र्यादिष्वविश्वास-द्योतकत्वात् राज्ञो न धर्मः । सर्वेषा परमुखेनैव करणे स्वस्याप्रौढ्यूचकत्वाद्राज्ञो न धर्मः। तस्माद्दानसम्भावनादिकं स्वमुखेनैव कर्तव्यम् । बन्धनशिक्षणादिकं तु परमुखेनैव कर्तव्यमिति भावः ।

**आप्तैरलुब्धैः क्रमिकैस्ते च कच्चिदनुष्ठिताः।**

---

(०१) (१) विभवो (for विजयो, मन्त्रिमूलो, मन्त्रतुल्यो, मूलमन्त्रो, वै (for हि), मन्त्रो विज(ष)यमूलं हि, (२) राज्ञो (for राज्ञां),
(३) सुसंवृत्तो, वृत्तैर्, वृतैर्, मन्त्रिधनैर्, मन्त्रिव(प)रैर्, मन्त्रपरैर्, रवैर्, धरैर्, वरैर्,.

(०२) (१)कच्चित्संवृतमन्त्रैस्ते(स्तैर् श्च), (२).अस्त्र, मन्त्र (for शास्त्र) (४)क- मर्थवत् . अ- स्यर्थमन्त्रवित् । क- धर्मवित् .

(०३) (१) नैकैः, (३) ते मन्त्रिते, दुर्मन्त्रिणं (for ते म), (४) राष्ट्रे, प्रति (for अनु), राष्ट्रं न परिराधसे.

(०४) (१) च (for वि), (२) लघूपायान्, महाफ(ब)लान्,
(३) कच्चिन् (for कर्तुं), (४) दीर्घं (for विघ्न).

कच्चिद्राजन्कृतान्येव कृतप्रायाणि वा पुनः।। (०१)

विदुस्ते वीर कर्माणि नानवाप्तानि कानिचित् ।। ३४ ।।(०२)

लक्षालङ्कारः - नानावात्तानि इत्यत्र अनवात्तानि अनुपगृहीतानि कर्तुमनारब्धानीत्यर्थः। तानि कर्माणि न विदुः कच्चित् । कृतं वा कृतप्रायं वा कर्म सर्वैर्ज्ञातुं शक्यते, करिष्यमाणं तु केनापि न ज्ञेयमिति भावः ।

कच्चित्कारणिका धर्मे सर्वशास्त्रेषु कोविदाः।
कारयन्ति कुमारांश्च योधमुख्यांश्च सर्वशः ।। ३५।।(०३)

लक्षालङ्कारः - क्वच्चित्कारणिका इत्यत्र 'परीक्षकः कारणिकः' इति वचनात्, कारणिकाः अस्त्रशस्त्राभ्यासेषु परीक्षकाः आचार्या इत्यर्थः ।

कच्चित्सहस्रैर्मूर्खाणामेकं क्रीणासि पण्डितम्।
पण्डितो ह्यर्थकृच्छ्रेषु कुर्यान्निःश्रेयसं परम् ।। ३६ ।।

एकोऽप्यमात्यो मेधावी शूरो दान्तो विचक्षणः।

राजानं राजपुत्रं वा प्रापयेन्महतीं श्रियम् ।। ३७ ।।(०४)

कच्चिद्दुर्गाणि सर्वाणि धनधान्यायुधोदकैः।
यन्त्रैश्च परिपूर्णानि तथा शिल्पिधनुर्धरैः ।। ३८ ।।(०५)

लक्षालङ्कारः - कच्चित्सूत्राणि इत्यत्र सूचयन्ति तं तमर्थमिति सूत्राणि अश्वगजादि-

---

(०१) (१) कच्चिन्नु, कच्चित्तु, सर्व (for सर्वे),.

(०२)(२) महीपते, रिशङ्किताः (for विशङ्किताः), प्रत्यक्षास्ते नरर्षभ(विशां पते,र्षभाः) प्रत्यक्षाः, ह्यस्य (for ह्यत्र) (३) सर्वथा (उत्सृष्टाः) (for सर्वे वा), रुत्यक्ताः (for रुत्सृष्टाः), सर्वेषु वा पुनर्हृष्टाः, (४) संहृष्टाः, संसृष्टिः, संसृ(स्पृ)ष्टाः,(स्नेहाः), तत्र, यत्र, चात्र (for ह्यत्र) तत्र, तव (for ते च), दधि (for दनु).

(०३) (१).कारुणिकाः, कर, च कारुणाः, कर्मे, धर्मे, धर्मा (for सर्वे), (२) सर्वे शास्त्रेषु राजशा, सर्वश, सर्वशास्त्र विशारदाः, सर्वशास्त्रार्थकोविदाः, (३) शिक्ष, धार (for कार)कुमाराश्च, (४) योधमुख्याश्च, धर्ममुख्यांश्च यौधमुख्यां(ख्या)श्च.

(०४) (१) दुर्गा, सर्वा, गृहा (for दुर्गा), (२) धनधान्योदकायुधैः(धान्यायुधादिकैः), (४) तथा शिल्प.

(०५) (१) सहस्रे, सहस्रं, सहस्रान्, (२) इच्छसि (for क्रीणासि), (३) ह्यत्र (for ह्यर्थ), (४) निःश्रयसं,

लक्षणशास्त्राणि । ब्राह्मणदोषप्रायश्चित्ताय क्रियमाणद्रव्यदण्डो ब्रह्मदण्डः

कच्चिदष्टादशान्येषु स्वपक्षे दश पञ्च च ।
त्रिभिस्त्रिभिरविज्ञातैर्वेत्सि तीर्थानि चारकैः ।। ३९ ।।(०१)

कच्चिद्द्विषामविदितः प्रतिपन्नश्च सर्वदा।
नित्ययुक्तो रिपून्सर्वान्वीक्षसे रिपुसूदन ।। ४० ।।(०२)

कच्चिद्विनयसम्पन्नः कुलपुत्रो बहुश्रुतः।
अनसूयुरनुप्रष्टा सत्कृतस्ते पुरोहितः ।। ४१ ।।(०३)

कच्चिदग्निषु ते युक्तो विधिज्ञो मतिमानृजुः।
हुतं च होष्यमाणं च काले वेदयते सदा ।। ४२ ।।(०४)

कच्चिदङ्गेषु निष्णातो ज्योतिषः प्रतिपादकः।
उत्पातेषु च सर्वेषु दैवज्ञः कुशलस्तव ।। ४३ ।।(०५)

कच्चिन्मुख्या महत्स्वेव मध्यमेषु च मध्यमाः।
जघन्याश्च जघन्येषु भृत्याः कर्मसु योजिताः ।। ४४ ।।(०६)

अमात्यानुपधातीतान्पितृपैतामहाञ्छुचीन्।

---

नैश्रे, महत् (for परम्).

(०१) (१) एको ह्यमात्यो, (२) शूरः प्राज्ञो बहुश्रुतः, (३) राजानो(नां), च (for वा).

(०२) (१) दशान्येव, दशान्येषां (२) सपक्षो सप्त (for पञ्च), (३) अभिज्ञातैर्, अना, (४) वेत्स्यनर्थनिवारकैः.

(०३) (१) विदितं, प्रतिपन्नश्च, कृतयत्न(ज्ञ)श्च, सर्वशः, (३) नित्योद्युक्तो, विनियुक्तो, नित्ययुक्तान्, (४) ईक्षसे(सेवसे), ईक्ष्य, वीक्ष्यसे, रिपुमर्दन.

(०४) (१) संपन्नैः, (२) कुले पुत्रो, कुरुपुत्रो, युधिष्ठिर, बहुश्रुतेः, (३) अनु (for अन), अनुष्ठान, अशङ्की तु, अतिश्रेष्ठः, असङ्कीर्णः, अनुत्सृष्टा, अनुदृष्द्वा, अनुद्र(द्रे)ष्टा, अनुष्ठाता, अनुप्रष्टा.

(०५) (१) कच्चिदृत्विक्समायुक्तो (२) (३) वेदयसे यदा, हुतं च हव्यं होमाग्नौ स्वीकुर्वन्ति च देवताः.

(०६) (१) कच्चिदब्देषु, कच्चिदङ्केषु, कच्चित्षडङ्गनि(गैर्नि, गो नि, गे नि)ष्णातो) (२) ज्योतिषि, प्रतिपाठकः, (४) तथा, स (त)दा (for तव).

श्रेष्ठाञ्छ्रेष्ठेषु कच्चित्त्वं नियोजयसि कर्मसु ।। ४५ ।।(०१)

लक्षालङ्कारः - अमात्यानुपधातीतान् इत्यत्र उपध उपाधिः तेनातीतान् ।

कच्चिन्नोग्रेण दण्डेन भृशमुद्विजसे प्रजाः।
राष्ट्रं तवानुशासन्ति मन्त्रिणो भरतर्षभ ।। ४६ ।।(०२)

कच्चित्त्वां नावजानन्ति याजकाः पतितं यथा।
उग्रप्रतिग्रहीतारं कामयानमिव स्त्रियः ।। ४७ ।।(०३)

लक्षालङ्कारः - उग्रप्रतिग्रहीतारम् इत्यत्र कामयानं पुरुषमुद्दिश्य स्त्रिय इव अतिकामुकपुरुषं स्त्रिय इवेत्यर्थः । उग्रप्रतिग्रहीतारं उग्रद्रव्यादिकप्रतिग्रहीतारं त्वां यज्ञादिसत्कर्म- बहिष्कृतत्वात् पतितमिव याजकाः नावजानन्ति कच्चित् ।

कच्चिद्धृष्टश्च शूरश्च मतिमान्धृतिमाञ्छुचिः।
कुलीनश्चानुरक्तश्च दक्षः सेनापतिस्तथा ।। ४८।।(०४)

कच्चिद्बलस्य ते मुख्याः सर्वयुद्धविशारदाः।
धृष्टावदाता विक्रान्तास्त्वया सत्कृत्य मानिताः ।। ४९ ।।(०५)

लक्षालङ्कारः - दृष्टाः प्रदाना इत्यत्र दृष्टाः दिने दिने दृष्टाः, प्रदानाः 'दो अवखण्डने' इति धातोः प्रकृष्टं दानं परदलखण्डनं येभ्यस्ते कच्चित् ।

---

(०१) (१) मुख्यान्, मुख्येषु, महत्स्वेषु, सहस्रेषु, (२) मध्यमां, (३) तु (for च), ते तात, (४) ते साधु (for कर्मसु), भूयांसः साधु योजिताः, भृत्यास्ते सायुधो जि(साधु योचि)ताः.

(०२) (१) अमात्यानुपधानीतान्, नथ निर्णी, नु(न)पथानी, (२) शुभान् (for शुचीन्), पितृपैतामहोचितान् (३) कच्चिच्च, त्तु.

(०३)(२) भृशमुद्वेजयन्प्रजाः मुद्विजितप्रजाः, मुद्विजसे प्रजाः, राजन्नु(न्नो)द्वेजिताः प्रजाःभृशमुद्वेजिताः(द्वेजये द्वेजसि, द्विजितः) प्रजाः मुद्वेजितव्रजं (तः प्रजं) (३) राष्ट्रे तथानु तव प्र (for तवानु).

(०४) (१) त्वा (for त्वां), अव, नोप (for नाव), (२) याचकाः, याजकं, तथा, (३) उग्रप्रतिगृही, उग्रं(दुर्गं) प्रतिग्रही, उग्र-तारः कच्चिन्न विद्यते राष्ट्रे .

(०५) (१) कच्चिद्धृष्ण, द्ध (for ष्ण), द्धृद्ध, दृष्ट (for द्धृष्ट), कच्चिच्छूरश्च, धृष्टश्च, (२) मति, धृति, भूति (for धृति) कविः ऋजुः (for शुचिः) (३) रूपश्च (for रक्तश्च), (४) कृतः (for तव).

कच्चिद्बलस्य भक्तं च वेतनं च यथोचितम्।
**सम्प्राप्तकाले दातव्यं ददासि न विकर्षसि ।। ५० ।।** (०१)

लक्षालङ्कारः - भक्तं च इत्यत्र भक्तं अन्नम् । वेतनं जीवनार्थं दीयमानं द्रव्यम् । अन्नोपजीविनामन्नं, द्रव्योपजीविनां द्रव्यमिति यावत् ।

कालातिक्रमणादेते भक्तवेतनयोर्भृताः।
**भर्तुः कुप्यन्ति यद्भृत्याः सोऽनर्थः सुमहान्स्मृतः ।। ५१ ।।**(०२)

लक्षालङ्कारः - भृताः भटाः ।

कच्चित्सर्वेऽनुरक्तास्त्वां कुलपुत्राः प्रधानतः।
**कच्चित्प्राणांस्तवार्थेषु सन्त्यजन्ति सदा युधि ।। ५२ ।।**(०३)

लक्षालङ्कारः - कुलपुत्राः प्रधावत इत्यत्र प्रधावतः युद्धे परान् प्रति धावतः, कदाचिद दैववशात्परावृत्य प्रधावतः तव अर्थे इत्यर्थः ।

कच्चिन्नैको बहूनर्थान्सर्वशः साम्परायिकान्।
**अनुशास्ति यथाकामं कामात्मा शासनातिगः ।। ५३।।**(०४)

लक्षालङ्कारः - कच्चिन्नैको बहूनर्थान् इत्यत्र कामात्मा कामलग्नचित्तस्त्वं एक एव यथाकामं स्वेच्छानुसारेण साम्परायिकान् मोक्षोपयोगिभूतान् बहूनर्थान् शास्त्रार्थान् निरन्तरश्रवणमननादीन्, शासनानि स्मृत्युक्तनित्यनैमित्तिकादिकर्मशासनानि च नानुशाधि

---

(०१) (१) द्बलश्च(द्बले च), मुख्यास्ते (२) सर्व (for सर्वे) (३) हृष्टावदाता(ननेन वदान्या) धृष्टावदाता(ना), दृष्टा(प्ता, ष्द्वा)वदाना(प्रदाना), दृष्टाः प्रदानाः, दृष्टशौर्यातिविक्रान्ताः, दृष्द्वावदात्ता विक्रीतान्, (४) स्वयं (for त्वया), संभृत्य, विक्रान्त (for सत्कृत्य), लालिताः (for मानिताः).

(०२) (१) भक्तं त्वं, ते भक्तं, भक्तस्य, (२) विशोषं, चेतनं, यथेप्सितं, (३) संप्राप्तकाले, (४) विकर्षसे, ल्पसे, र्शसि.

(०३) (१) णादेते(णाच्चैते), णाद्धेतोर्, (२) भक्तावनतयोर्, धृताः, वृताः, (३) भर्त्रे, भेत्तुः कुर्वन्ति (for कुप्यन्ति), दौर्गत्यं, ह्र्द्यं, गत्यान्, दू(दु, पु, द्वि)ष्यन्ति (for दौर्गत्यात्), (४) भवेत् (for स्मृतः).

(०४) (१) सर्वत्र, सर्वे सु (for सर्वेऽनु), (२) कुरुपुत्राः, तनुत्यजः, प्रधावतः, कुलवंशप्रधा, (३) हृ(कृ) ष्टाः (for कच्चित्), तवार्थे च, तवैवार्थे, तथार्थेषु, (४) युधिष्ठिरः, तदा युधि.

कच्चित् न शिक्षसे कच्चित्; किमनेनेति न धिक्करोषि कच्चिदिति भावः ।

कच्चित्पुरुषकारेण पुरुषः कर्म शोभयन्।
लभते मानमधिकं भूयो वा भक्तवेतनम् ।। ५४ ।।(०१)

लक्षालङ्कारः - कच्चित्पुरुषकारेण पुरुषः कर्म शोभयन् । लभते मानमत्यन्तं भृतो वा वेतनं त्वयि इत्यत्र त्वयि वेतनं भृतो वा अन्यो वा पुरुषकारेण स्वपौरुषेण कर्म युद्धकर्म शोभयन् पुरुषः शूरपुरुषः त्वत्तः अत्यन्तं मानं सत्कारं लभते कच्चित् ।

कच्चित्पुरुषकारेण पुरुषः कर्म शोभयन्।
लभते मानमधिकं भूयो वा भक्तवेतनम् ।। ५४ ।।(०२)

कच्चिद्विद्याविनीतांश्च नराञ्ज्ञानविशारदान्।
यथार्हं गुणतश्चैव दानेनाभ्युपपद्यसे ।। ५५ ।।(०३)

कच्चिद्दारान्मनुष्याणां तवार्थे मृत्युमीयुषाम्।
व्यसनं चाभ्युपेतानां बिभर्षि भरतर्षभ ।। ५६।।(०४)

लक्षालङ्कारः - व्यसने लक्षालङ्कारः -चाभ्युपेतानाम् इत्यत्र अभ्युपेतानां स्वशरणं गतानां व्यसने सति बिभर्षि कच्चिदित्यन्वयः ।

कच्चिद्भयादुपगतं क्षीणं वा रिपुमागतम्।

---

(०१) (१) अर्थाः, सर्वान्, सर्वाः, (२) सततं,सर्वतः (for सर्वशः) (३) अनुशासि, शास्ति, शास्मि, यथाकालं, (४) शासनान्तिकः, नातिगं, नानि च कामशासनिकां गतिं.

(०२) (१) अर्थाः, सर्वान्, सर्वाः, (२) सततं,सर्वतः (for सर्वशः) (३) अनुशासि, शास्ति, शास्मि, यथाकालं, (४) शासनान्तिकः, नातिगं, नानि च कामशासनिकां गतिं.

(०३)(२) भाव (for शोभ), (३) अत्यन्तं (for अधिकं), (४) भुवो(भूयो, हृतो)वा वेतनं त्वयि(बहु).

(०४) (१)क- श्चिद्दासा भटा व ते । क- न्भटानां ते, (२) द्विजा,(जान, जना)ल् (for नराञ्) (३) यथार्हगुणतश्चैव, यथार्थं गुणतश्चापि, (४) धनेन, ज्ञा (for दा) दानेन प्रतिपद्यसे, दानेनाभ्युपपद्यसे(ते), कालेनाभ्युप, कालेनाभसिपत्स्यसे, दानेनाभ्यवपत्स्यसे.

युद्धे वा विजितं पार्थ पुत्रवत्परिरक्षसि ।। ५७ ।।[०१]

लक्षालङ्कारः - विजितं युद्धे जये सति हस्तगृहीतम् ।

कच्चित्त्वमेव सर्वस्याः पृथिव्याः पृथिवीपते।
समश्चानभिशङ्क्यश्च यथा माता यथा पिता ।। ५८ ।।[०२]

कच्चिद्व्यसनिनं शत्रुं निशम्य भरतर्षभ।
अभियासि जवेनैव समीक्ष्य त्रिविधं बलम् ।। ५९ ।।[०३]

लक्षालङ्कारः - समीक्ष्य त्रिविधं बलम् इत्यत्र स्वभुजबलं स्वसेनाबलं स्वदैवबलं चेति त्रिविधम् ।

यात्रामारभसे दिष्ट्या प्राप्तकालमरिन्दम।

पार्ष्णिमूले च विज्ञाय व्यवसायं पराजयम्।
बलस्य च महाराज दत्त्वा वेतनमग्रतः ।। ६० ।।[०४]

लक्षालङ्कारः - पार्ष्णिमूले च इत्यत्र पार्ष्णिः पार्ष्णिग्राहकः मूलं मूलभूतधनादिकं ते उभे च विज्ञायेत्यर्थः ।

कच्चिच्च बलमुख्येभ्यः परराष्ट्रे परन्तप।
उपच्छन्नानि रत्नानि प्रयच्छसि यथार्हतः ।। ६१ ।।[०५]

---

(०१) (१) कच्चिद्दारान्भटानां(द्वारार्भकाणां, द्वासा भटा वा) ते, (२) मृत्युमीयुषां(मेयुषः), भूतपार्थेप्युपेयुषां, (३) व्यसने, वाप्यु(चाप्यु, वाभ्यु, नाभ्यु)पेतानां, (४) पुरुष (for भारत).

(०२) (१) युद्धाद् (for भयाद्), उपग(र)तं, निपतितं, (२) गृहं(रिपुं) (for क्लीबं), वो (for वा), गृहम्, पुनर् (for रिपुम्), क्लीबंरिपु(वारि)मुपागतं, (३) युधा, युधि, निर्जितं,प्राप्तं (for पार्थ), (४) रक्षसे.

(०३) (१) त्वमस्याः, समोपि, त्वमेवं, सर्वस्य, सर्वस्यां, (२) पृथिव्यां, भरतर्षभ, (३) समश्च नाति, समश्चानभि, समत्वेनावि(नाभि), सुमना अ(ना)ति, (४) पुत्रो (for माता), तथा (for यथा).

(०४) (१) कच्चिद्व्यसनिनः शत्रून् (३) बलेनैव, (४) सङ्गृह्य (for समीक्ष्य) यात्रामारभसे दिष्ट्या प्राप्तकालमरिन्दम कच्चित् (for दिष्ट्या).

(०५) (१) पार्ष्णिं मूलं, पार्ष्णिर्मूलं, वार्ष्णि मूलं, पाष्णीमूलं, पार्ष्णिमूले, (२) व्यवसायपराजयं, यपुरोगमः, (३) तु (for च).

कच्चिदात्मानमेवाग्रे विजित्य विजितेन्द्रियः।
परान्जिगीषसे पार्थ प्रमत्तानजितेन्द्रियान् ।। ६२ ।।(०१)

३.क-(अधिकः पाठः)

आत्मानमुपमां कृत्वा विजयाय प्रवर्तसे ।(०२)

कच्चित्ते यास्यतः शत्रून्पूर्वं यान्ति स्वनुष्ठिताः।
साम दानं च भेदश्च दण्डश्च विधिवद्गुणाः ।। ६३ ।।(०३)

कच्चिन्मूलं दृढं कृत्वा परान्यासि विशाम्पते।
तांश्च विक्रमसे जेतुं जित्वा च परिरक्षसि ।। ६४ ।।(०४)

कच्चिदष्टाङ्गसंयुक्ता चतुर्विधबला चमूः।
बलमुख्यैः सुनीता ते द्विषतां प्रतिवर्धिनी ।। ६५ ।।

लक्षालङ्कारः - कच्चिदष्टाङ्गसंयुक्ता इत्यत्र अष्टभिरङ्गैः चतुर्विधसेनाङ्गैः यन्तृसारथिसूतचर्म० र्मशरचापायुधाख्यैः संयुक्ता चतुर्विधबला हस्त्यश्वरथपा(प)दाताख्यचतुर्विधबलवती चमूः बलमुख्या बलेन सत्वेन मुख्या।

कञ्चिवदष्टादशान्येषां स्वपक्षे दश पञ्च च ।

त्रीभिस्त्रिभिरविज्ञातैर् वेत्सितीर्थानि चारकैः ।।(०५)

---

(०१) (१) कच्चित्त्वं, प (for पु, वी)रमुख्येभ्यः (for बल), कच्चित्परममुख्येभ्यः(त्परमनुष्येभ्यः, त्पुरुषमुख्येभ्यः), (२) परन्तपः), .

(०२)उपपन्ना(कृन्ना, स्थिता)नि, अविच्छि(अहिच्छ), (४) प्रयच्छति, कुरुद्वह (for यथार्हतः).

(०३) (१) कच्चित्त्वमा(चैवा) त्मनात्मानं, (२) विजित्वा, भरतर्षभ (for विजिते), (३) (४) परा, परं, विजीगसे, जयिष्यसे, जिहीर्षसे, जिगीर्षसे, कच्चित् (for पार्थ) समस्तान्वि(र्थान, स्तान)जितेन्द्रियान्, प्रमत्तानजितेन्द्रिय, प्रमत्तानि जितेन्द्रियः, आत्मनमुपमां कृत्वा विजयाय प्रवर्तसे.

(०४)(१/२) मन्त्रयन्ति (for पूर्वं यान्ति), स्वधिष्ठिताः, सुनि, स्वनुष्ठितान्, यास्यन्त्यनुष्ठिताः, यास्यतो यात्रा नित्यं गच्छत्यनुष्ठिता, अनुष्ठिताः गच्छन्ति चाराः, साम, दानं, त्रयः, पूर्वं, समाः गुणैः, (३) दानश्च, भेदं च (४) चतुरो (for विधिवद्), दण्डं च चतुरो गुणाः(णान्).

(०५)(२) परान् (for यात्रां), यास्यसि भूमिप, (३) ततो, बलं, कच्चिद्, रिपुं,त्वं च, स्वयं, (for तांश्च), गत्वा (for जेतुं), (४) राक्ष्यं (for जित्वा), सु (for च) रक्षसे, कर्षसि.

कच्चिल्लवं च मुष्टिं च परराष्ट्रे परन्तप।
अविहाय महाराज निहंसि समरे रिपून् ।। ६६ ।।(०१)

लक्षालङ्कारः - कच्चिल्लवं च मुष्टिं च इत्यत्र 'व्रीहिशाल्यादिकं धान्यं लूयते यल्लवं तु तत्। कार्पासमाषमुद्गाद्यं मुष्टि मुष्टिग्रहं यतः' इति वचनात् लवं 'लूञ् छेदने' इति धातोः कुटेन च्छेद्यं व्रीहिशाल्याद्यं लवमित्युच्यते । कार्पासमाषमुद्गाद्यं मुष्टिनैवोन्मूल्यत्वात् मुष्टिरित्यभिधीयते । रिपून् अभियाय अभितः प्राप्य परराष्ट्रे द्विविधमिदं धान्यं विहंसि क्वच्चित् ।

कच्चित्स्वपरराष्ट्रेषु बहवोऽधिकृतास्तव ।
अर्थान्समधितिष्ठन्ति रक्षन्ति च परस्परम् ।। ६७ ।।(०२)

कच्चिदभ्यवहार्याणि गात्रसंस्पर्शनानि च ।
घ्रेयाणि च महाराज रक्षन्त्यनुमतास्तव ।। ६८ ।।(०३)

कच्चित्कोषश्च कोष्ठं च वाहनं द्वारमायुधम्।
आयश्च कृतकल्याणैस्तव भक्तैरनुष्ठितः ।। ६९ ।।(०४)

लक्षालङ्कारः - क्वच्चित्कोशम् इत्यत्र कोशं गोष्ठं वाहनं परमायुधं चोद्दिश्य योऽयं आयः द्रव्यलाभः, सोऽनुष्ठितः कच्चित् ।

कच्चिदाभ्यन्तरेभ्यश्च बाह्येभ्यश्च विशाम्पते।

(०१) (१) प्रणीता, सुनीतस्, बलमुख्य(ख्या)सुनीता ते(च),बलमुख्या, (४) प्रतिबाधिनी(घातिनीं, माथिनी, वार्धिनी, वर्धिनी, बाधनीं), संप्रधावनी, प्रतिबाधते (बाधने, परिबाधते, घातने).

(०२) (१) कच्चिद्धलं, ल्लापं, पुष्टिं (for मुष्टिं) (२) परराष्ट्रं, (३) अविहार्य, अभिज्ञाय, अविज्ञाय, अभियाय, अभिहत्य, अभियाम, अपयासि, अभिधाय, (४) विहन्सि, निहंसि, विहासि, समयं, समये (for समरे), रिपोः.

(०३) (१) कच्चिदपर, च्च परराष्ट्रेषु, त्स्वपुरराष्ट्रे, (२) वोविकृ, वोविजि (for वोऽधिकृ), त्वया (for तव), (३) समुपतिष्ठन्ति, समधि (for समनु), अर्थं समधि,अर्थं चैवानु.

(०४) (१) कच्चित्तेभ्य (त्ते व्य), (२) गात्रसंस्पर्त्रनानि(र्शनेन), सङ्घर्षणा, संहर्षणा, संहनना, संस्पर्शगा, संरक्षणा, संहनना, संस्पर्शगा, संरक्षणा, (अनुलेपनानि), (३) प्रियानि, प्रियाणि, श्रेया, प्रेया, गृहानि(णि), पेयानि, घ्रेयानि (for घ्रेयाणि), महार्हाणि, (४) रक्षन्ते, रक्षत्यविमना भिषक्.

रक्षस्यात्मानमेवाग्रे तांश्च स्वेभ्यो मिथश्च तान् ।। ७० ।।[०१]

लक्षालङ्कारः - कच्चिदाभ्यन्तरेभ्य इत्यत्र आभ्यन्तराः, सूतसेनापतिसादिनिषादिपुर-व्यावहारिकराष्ट्रान्तपालादयो बाह्याः; तेभ्यः अग्रे प्रथमं आत्मानमेव रक्षसि कच्चित् । तेषाम(भ्यु)त्युन्नतावप्यात्मक्षयः । अत्यवमानेऽप्यात्मक्षयः । अतस्तान् मध्यमपरिपाट्या पोषयसि कच्चिदित्यर्थः । तान् उभयान्, तेभ्यः आन्तरेभ्यो बाह्येभ्यश्च रक्षसि कच्चित् । आन्तरबाह्ययोरन्योन्यं कलहो यथा न भवति तथा रक्षसि किम् । तान् आन्तरान् तान् बाह्यांश्च मिथः रक्षसि कच्चित् ।

कच्चिन्न पाने द्यूते वा क्रीडासु प्रमदासु च ।
प्रतिजानन्ति पूर्वाह्णे व्ययं व्यसनजं तव ।। ७१ ।।[०२]

लक्षालङ्कारः - कच्चिन्न पाने द्यूते वा इत्यत्र अह्नः पूर्वं विद्यमाना रात्रिः पूर्वाह्णपदेनोच्यते। तत्र क्रियमाणे पाने मधुपाने व्यसनजं चित्तभ्रमाख्यव्यसनाज्जातं व्ययं राज्यमपि तवैव तिष्ठत्विति स्त्रीषु कृतं व्ययं, द्यूते अक्षक्रीडादिद्यूते क्रीडासु जलक्रीडादिक्रीडासु प्रमदासु अतिप्रियस्त्रीषु वा व्यसनजं स्त्रीव्यसनाज्जातं तव व्ययं हारकङ्कणादिव्ययं न प्रतिजानन्ति बाह्या जना न प्रतिजानन्ति कच्चित् ।

कच्चिदायस्य चार्धेन चतुर्भागेन वा पुनः।
पादभागैस्त्रिभिर्वापि व्ययः संशुद्ध्यते तव ।। ७२ ।।[०३]

कच्चिज्ज्ञातीन्गुरून्वृद्धान्वणिजः शिल्पिनः श्रितान्।

---

(०१) (१) कोशं(कोषं), कोष्टं, कोशश्च, राष्ट्रं च, कोषश्च, गोष्ठं (for कोष्ठं), कच्चित्कोष्ठं च कोषश्च, त्कोषं च (शश्च), राष्ट्रं च, द्धोषं च गोष्ठं च, (२) वाहनद्वारम्, वाहनं धारम्, वाहनं वारम्, वाहनं परमायुधं, नं च वरायुधं, (४) तव भक्तिर्, संवसक्तैर्, तव भृत्यैर्, ष्ठितं, ष्ठिताः(ता).

(०२) (१) दभ्य, (२) राज्ये (for बाह्ये), (४) तेभ्यो (for स्वेभ्यो), चरन्, चरान्, च तान्.

(०३) (१) पान (for पाने), च (for वा), (२) विविधा (for प्रमदा), वा (for च), (३) अभि (for प्रति), पूर्वाह्णे, पूर्वार्धे.

**अभीक्ष्णमनुगृह्णासि धनधान्येन दुर्गतान्   ।। ७३ ।।**(०१)

**लक्षालङ्कारः - सुदुर्गतान् सुष्ठु दुरवस्थागतान् ।**

**कच्चिदायव्ययेन युक्ताः सर्वे गणकलेखकः।**
**अनुतिष्ठन्ति पूर्वाह्णे नित्यमायं व्ययं तव   ।। ७४ ।।**(०२)

**लक्षालङ्कारः - 'आयव्ययेन' इति पाठे आयव्ययेन ज्ञापितेनेत्यर्थः ।**

**कच्चिदर्थेषु सम्प्रौढान्हितकामाननुप्रियान्।**
**नापकर्षसि कर्मभ्यः पूर्वमप्राप्य किल्बिषम्   ।। ७५ ।।**(०३)

**कच्चिदर्थेषु सम्प्रौढान्हितकामाननुप्रियान्।**

**नापकर्षसि कर्मभ्यः पूर्वमप्राप्य किल्बिषम्।**(०४)

**कच्चिद्विदित्वा पुरुषानुत्तमाधममध्यमान्।**
**त्वं कर्मस्वनुरूपेषु नियोजयसि भारत   ।। ७६ ।।**(०५)

**कच्चिन्न लुब्धाश्चौरा वा वैरिणो वा विशाम्पते।**
**अप्राप्तव्यवहारा वा तव कर्मस्वनुष्ठिताः   ।। ७७ ।।**(०६)

**लक्षालङ्कारः - अप्राप्तव्यवहारा वा इत्यत्र अप्राप्तव्यवहाराः अज्ञातव्यवहाराः ।**

---

(०१) (१) कच्चिदर्थस्य वार्धेन, (२) र्भागेण, (३) र्भागैस्त्रिभागैर्वा, (४) संशुध्यते, संसृज्यते ततः.

(०२) (३) अभि (for अनु), अभिपुष्णासि धनदो, (४) धान्यैश्च (for धान्येन) वा पुनः (for दुर्गतान्), धान्येन च सुपूजितान्, धनधान्यैरदुर्जनान्, सुदुर्गतान्.

(०३) (१) कच्चिश्चा, कच्चिदायस्य वै, व्यवमुक्ताः, (२) गुण (for गण), (३) उपा, उप (for अनु), पूर्वाह्णे, (४) आयं व्ययं, आयव्ययौ, व्यये, च ते (for तव), राजन्ननुमतास्तव, आयव्ययेन, .

(०४) (१) र्थे च, र्थेन (for र्थेषु), संमू (for संप्रौ), दर्थेष्वसंमूढान्, (२) ननुव्रतान्, (३) नावकर्षसि, कचित्कर्षसि, प्रक, नोपेक्षसे(सि)हि, नोपकर्षसि, (४) माज्ञाय(माज्ञाय, माज्ञा च) (for मप्राप्य).

(०५)(३) त्वत्, तान् (for त्वं), स्व(त्वं)कर्मस्वनुरूपेण, (४) ुत्रचित्,नित्यशः (for भारत).

(०६) (१) श्चोरा, (२) दुष्टा वापि, वारयन्ति, मन्त्रिणो वा, वैरिणोपि, (३) व्यवहारो, वै (for वा), अप्राप्तव्यसभांरावा (४) कर्मण्य (for कर्मस्व).

**कच्चिन्न चौरैर्लुब्धैर्वा कुमारैः स्त्रीबलेन वा।**
**त्वया वा पीड्यते राष्ट्रं कच्चित्तुष्टाः कृषीवलाः ।। ७८ ।।(०१)**

**कच्चिद्राष्ट्रे तडागानि पूर्णानि च बृहन्ति च।**
**भागशो विनिविष्टानि न कृषिर्देवमातृका ।। ७९ ।।(०२)**

लक्षालङ्कारः - भागशो विनिविष्टानि इत्यत्र भागशः तत्तदुचितभागैः विनि-विष्टानि विशेषेण निर्दिष्टानि तव राज्ये सर्वाऽपि कृषिः देवमातृका देवकृतवृष्टिरेव मातेव माता यस्याः सा न हि कच्चित् । किन्तु तटाकादि-मातृकाऽप्यस्ति । अतोऽयं विचार इति भावः ।

**कच्चिन्न भक्तं बीजं च कर्षकस्यावसीदति।**
**प्रत्येकं च शतं वृद्ध्या ददास्यृणमनुग्रहम् ।। ८० ।।(०३)**

लक्षालङ्कारः - प्रति गुञ्जशतं वृद्ध्या इत्यत्र प्रति एकैकं कृषीवलं प्रति गुञ्जशतं शतगुञ्जापरिमितं द्रव्यं वृद्ध्या तदुचितवृद्ध्या ऋणं ददासि कच्चित् इत्यर्थः ।

**कच्चित्ते दयितास्सर्वे कृषिगोरक्षजीविनः।**
**कच्चित्स्वनुष्ठिता तात वार्ता ते साधुभिर्जनैः ।। ८१।।(०४)**

लक्षालङ्कारः - कच्चित् स्वनुष्ठिता इत्यत्र वार्ता वृद्धिजीवनरूपा वैश्यवृत्तिः स्वनु-ष्ठिता सुष्ठु अनुष्ठिता; अल्पीयसीं वृद्धिमादाय अनुष्ठितेत्यर्थः ।

---

(०१) (१) लुब्धैः चोरैः, श्चोरैर्वा, (२) स्त्रीजनेन वा, त्रि विधैरपि, (३) तु (for वा), राजन् (for राष्ट्रं), (४) कच्चित्तु(हृ,दु,द्ध)ष्टाः.

(०२) (१) राष्ट्रः, तडाकानि, तटाका, (गा)नि, (२) बृहन्ति (for महान्ति), (३) भागशो विनिसृ(कृ) ष्टानि, शो वै निवि, शोभि(शोपि)निवि.

(०३) (१) कश्चिन्न भक्तं बीजं च, कश्चिन्न बीजं भक्तं च, (२) कार्ष, कर्षु, सीदति कर्षकस्या(कान्ना)वसीदति, (३) क-पक्रतिकुण्डशतं वाऽस्य ददास्येतदनुग्रहात्, प्रत्येकं च पश्चकं च, पादिकं च, प्रतिशक्तं प्रतिकुञ्ज(गुञ्ज्या, गुञ्ज, गुञ्जा)शतं, धृष्ट्या, चास्या (for वृद्ध्या), (४) ददास्येषाम् (for स्यृणम्), अनुत्तमं,अरिन्दम, अनुग्रहात्, ददासि ऋणमुत्तमं.

(०४) (१) कच्चित्त्वनु दनु, त्सुनु, त्त्वानु, (३) संसृतस् हि शिस् संशृतस्, संस्मृतस्, संश्रयस्, सर्वे, सर्वो (for तात).

वार्तायां संश्रितस्तात लोकोऽयं सुखमेधते ।। ८२ ।।(०१)

कच्चिच्छूराः कृतप्रज्ञाः पञ्च पञ्च स्वनुष्ठिताः।
क्षेमं कुर्वन्ति संहत्य राजञ्जनपदे तव ।। ८३ ।।(०२)

कच्चिन्नगरगुप्त्यर्थं ग्रामा नगरवत्कृताः।
ग्रामवच्च कृताः घोषा(प्रान्ता)स्ते च सर्वे त्वदर्पणाः ।। ८४ ।।(०३)

लक्षालङ्कारः - कच्चिन्नगरगुप्त्यर्थम् इत्यत्र ग्रामाः नगरस्य परितो विद्यमाना ग्रामाः, नगरवत् परिखाप्राकारादिना नगरोपमाः कृताः कच्चित् । ग्रामवत् सा ग्रामो यावदायामवान् तद्वत् जनान् सम्पूर्य रक्षा कृता कच्चित् । त्वदर्पणाः त्वत्त एव अर्पणं तत्र स्थापनं येषां ते तैतैः कृतभटाश्चेत् कदाचित् तेन सह तवैव विरोधं कुर्युरिति भावः ।

कच्चिद्बलेनानुगताः समानि विषमाणि च ।
पुराणि चौरान्निघ्नन्तश्चरन्ति विषमे(ये) तव ।। ८५ ।।(०४)

लक्षालङ्कारः - कच्चिद्बलेन इत्यत्र बलेन सदा सञ्चरणसत्वेन, अनुमताः सम्मताः, साध्यक्षाः महानगरे स्वनायकसहिताः चाराः समानि लोकसम्मतचरित्राणि, विषमाणि विषमचरित्राणि च चरन्ति आचरन्ति । पुराणि उद्दिश्य चरन्ति सञ्चरन्ति ।

कच्चित्स्त्रियः सान्त्वयसि कच्चित्ताश्च सुरक्षिताः।

---

(०१) (२) कालो (for लोको).

(०२) (१) शुचिकृतं, स्वधिकृताः, अधिष्ठिताः, स्वधिष्ठिताः, शुचिकृताः, शुचिः कृतः, कच्चिच्छूराः, (च्छुचि)कृतप्रज्ञाः, च्छुचि(द्धवि)कृतप्राज्ञाः, (३) एवं (for क्षेमं), सङ्गत्य, (४) देन वा, देषु च, देन च, दं तव.

(०३) (१) न्न पर (for न्नगर), (३) (४) ग्रामवत्सु, ग्रामाणां च (for मवच्च), राज्ञा ते, रक्षास्ते, घोषास्ते, रक्ष्यस्ते, प्रान्तास्ते (for रक्षा ते), प्रान्ताः, ग्रामाश्च कृतरक्षास्ते (for ), ५.ग्रामवत् कृत , रक्षा. तव (for ते च), त्वदर्पणाः (for र्पिताः).

(०४) (१) कच्चिद्बलेनानुमताः (मनाः, मतः, शृताः, तताः), कच्चिन्नरास्तेनुमताः, (न्नवास्तेनु न्नवास्तेनुगताः), बलेन, (२) समेषु विषमेषु च, (३) पुराणचौरा, पुराणि चाराः(रा), णपौराः, पुराण(णि)चोराः, पुरा चाराश्च, साध्यक्षा, साध्यक्ष्णः, पुराणि चौरा नि(पुरेषु चौरान्नि, णि चौरान्नि)घ्नन्तः, पुराणि चाराः सन्नद्धाः, निघ्नन्तः, (४) शिबिरे (for विषये).

**कच्चिन्न श्रद्दधास्यासां कश्चिद्गुह्यं न भाषसे** ॥ ८६ ॥[०१]

**कच्चिदात्ययिकं श्रुत्वा तदर्थमनुचिन्त्य च ।**
**प्रियाण्यनुभवञ्छेषे न त्वमन्तःपुरे नृप** ॥ ८७ ॥[०२]

लक्षालङ्कारः - कच्चिच्चारान्निशि इत्यत्र चारादिति पञ्चमी ।

**कच्चिद्द्वौ प्रथमौ यामौ रात्रेः सुप्त्वा विशाम्पते।**
**सञ्चिन्तयसि धर्मार्थौ याम उत्थाय पश्चिमे** ॥ ८८ ॥[०३]

लक्षालङ्कारः - कच्चिद् द्वौ प्रथमौ इत्यत्र 'यामात्परत एवाथ स्वपेत्' इति वचनात् पूर्वयामादुपरितनौ चतुर्थयामात्प्रथमावित्यर्थः ।

**कच्चिद्दर्श(दर्थ)यसे नित्यं मनुष्यान्समलङ्कृतः।**
**उत्थाय काले कालज्ञैः सह पाण्डव मन्त्रिभिः** ॥ ८९ ॥[०४]

**कच्चिद्रक्ताम्बरधराः खड्गहस्ताः स्वलङ्कृताः।**
**उपासते त्वामभितो रक्षणार्थमरिन्दम** ॥ ९० ॥[०५]

**कच्चिद्दण्ड्येषु यमवत्पूज्येषु च विशाम्पते।**

---

(०१) (१) नन्द, शान्त्व (for सान्त्व), (२) कच्चित्तात. (३) श्रद्दूधस्यासा, .

(०२) (१) कच्चिच्चरानिति, चारं निशि, दात्य(दात्या)यिकं, द्वारान्निशि, (चारादिति पञ्चमी), (२) तदर्थम् (for तत्कार्यम्), अनुचिन्तय (for चिन्त्य च), मित्रकार्यं विचिन्त्य च, निशि कार्यं विचिन्त्य वा(र्यमचिन्त्य च), कार्यमनुचिन्त्य च, तत्कामानविचिन्त्य च) (३) प्रिया ह्यनु,
(४) विचि(ज)त्य (for विदित्वा), त्वा ह्य (for त्वाभ्य) त्वमन्तःपुरे नृप.

(०३) (१) मध्यमौ, प्रथमं, (२) रात्रे, (त्र्याः), रात्रौ, सुप्तो, सुप्तौ, (३) विचिन्तयसि(वशी जयसि), धर्मार्था),(४) यामे चो(वो)त्थाय, यामावुत्थाय पश्चिमौ, याममुत्थाय पश्चिमं.

(०४) (१) द्वर्धतसेम,दर्थ, न्दर्शयते, (२) आत्मानं (for मनुष्यान्), समलङ्कृतः(ताः), (३) कालज्ञ, कालज्ञैः, (४) सदा (for सह).

(०५) (१) कच्चिद्रक्ताम्बरा राजन्, (२) स(स्व)कुण्डलाः (for स्वलङ्कृताः), (३) अभिवस्त्वाम्, अभितस्ताम्, अभीतास्त्वाम्, उपासन्तः, अभितस्त्वामुपा, उपासते त्वामभितः, (४) सरक्षार्थम् (for रक्षणा), अरिन्दमाः मः, मरिन्दम.

**परीक्ष्य वर्तसे सम्यगप्रियेषु प्रियेषु च ।। ९१।।(०१)**

**कच्चिच्छरीरमाबाधमौषधैर्नियमेन वा।**
**मानसं वृद्धसेवाभिः सदा पार्थापकर्षसि ।। ९२ ।।(०२)**

लक्षालङ्कारः - कच्चिच्छरीरम् इत्यत्र आबाधं दुःखम् ।

**कच्चिद्वैद्याश्चिकित्सायामष्टाङ्गायां विशारदाः।**
**सुहृदश्चानुरक्ताश्च शरीरे ते हिताः सदा ।। ९३ ।।(०३)**

लक्षालङ्कारः - कच्चिद्वैद्याश्चिकित्सायाम् इत्यत्र अष्टाङ्गायाम् औषधसङ्ग्रहः, पेषणं, अग्न्यातपाभ्यां तापः, रसयोगः, ना(डि)डीपरीक्षा, अनुपानं, औषध-दानं, पथ्यं चेति अष्टाङ्गायाम् ।

**कच्चिन्न लोभान्मोहाद्वा मानाद्वापि विशाम्पते।**
**अर्थिप्रत्यर्थिनः प्राप्तान्न पश्यसि कथञ्चन ।। ९४ ।।(०४)**

लक्षालङ्कारः - अर्थिप्रत्यर्थिन इत्यत्र अर्थिनः याचकान् प्रत्यर्थिनो वैरिणः नापास्यसि न त्यजसि । धनैरेकं तर्पयसि शरैरपरं तर्पयसि कच्चित् इति भावः ।

**कच्चिन्न लोभान्मोहाद्वा विश्रम्भात्प्रणयेन वा।**
**आश्रितानां मनुष्याणां वृत्तिं त्वं संरुणत्सि वै ।। ९५ ।।(०५)**

---

(०१) (१) गण्येषु, दण्डेषु, (२) ष्वपि (for षु च), (३) परीक्ष, परिक्ष्य, वर्तते, वर्तसे सुपरिक्ष्यैव, (४) प्रियेषु चा(परेष्वप्य)प्रियेषु च.

(०२) (१) कच्चिच्छरीरम्, शरीरम्, कच्चि रीरम्, कच्चिच्छरीरमाबद्धं - (२) अषधैर् च (for वा), (४) कच्चित् (for सदा), पार्थाव(वि)-कर्षसि.

(०३) (१) कच्चिद्वै विचिकित्सायां, (२) आष्टाङ्गायां, नष्टां, अष्टाङ्गाय गाया, गेषु, विशारद, विचक्षणाः, (३) सत्कृताश्चा (for सुहृदश्चा) (४) शारीरे.

(०४) (१) मानात् मोहात्, लोभान्, कामान् (for मानान्), मोहाच्च, (२) मानाद्वापि लोभाद्वापि, कामा वापि, वा च (for वापि) (३) (४) प्राप्तानुपाससि, प्तान्नायास्यसि(ति), प्तान्नापास्यसि, प्तान्न पश्यसि, प्तान्नापास्यसि, पार्थं, ना(न) पश्यसि, पार्थानपास्य च, प्राप्तानापास्यसि, पश्येदेव.

(०५) (१) लोभात्, मोहात्, द्वेषाद्वा (for मोहा), (२) विश्रान्धात्ते, वि(नि)ग्रहात्, विभ्रमात्, विस्रंभात्,

कच्चित्पौरा न सहिता ये च ते राष्ट्रवासिनः।
**त्वया सह विरुध्यन्ते परैः क्रीताः कथञ्चन** ।। ९७ ।।(०१)

कच्चिन्न दुर्बलः शत्रुर्बलेन परिपीडितः।
**मन्त्रेण बलवान्कश्चिदुभाभ्यां च कथञ्चन** ।। ९८ ।।(०२)

कच्चित्सर्वेऽनुरक्तास्त्वां भूमिपालाः प्रधानतः।
**कच्चित्प्राणांस्त्वदर्थेषु सन्त्यजन्ति त्वयाऽऽदृताः** ।। ९९ ।।(०३)

**कच्चिदर्थेषु सम्प्रौढानर्थकर्मविचक्षणान्।**

**नापकर्षसि कर्मभ्यो ह्यर्थयुक्ता इतीव हि।**

**कच्चित्ते सर्ववैद्येषु गुणना वा प्रवर्तते।**
**ब्राह्मणानां च तत्सुष्टु तव नैःश्रेयसी शुभा** **।। १०० ।।**(०४)

**लक्षालङ्कारः - कच्चित्ते सर्ववैद्येषु इत्यत्र सर्ववैद्येषु सकलविद्यासम्बन्धिषु नानाविधविद्या-**

---

प्रणयेण, प्रयतेन (for प्रणयेन), (३) असितानां, वर्तमानो(ने), मानुषाणां, (४) वृत्ति त्वं, वृत्तिं न, न्न (for सं), नो(सं)रुणसि च, न रुणत्सि वै, विरुणत्सि च, अनुरुध्यसे(रुन्ध्यसे, रुध्यसि)वा, वै (for च), वृद्ध्यत्वंमनुरुन्ध्यसि, वृद्धिं समनुरुध्यसि, वृत्तिं च निरणत्सि हि संप्राप्तान् (for संप्रौढान्), ऊर्थकामविचारणान्, अर्थकाम(धर्म)विचक्षणान्, अर्थं, ह्यनु (for ह्यर्थं) ह (for हि) ह्यनु(र्थ)युक्तानतीव ह.

(०१) (१) पौराण, पौराः, पौरान्न, चोरैर्न, पौरानु, पौरैस्तु, पौरास्तु (for पौरा न), (२) रात्रिसेविनः, राष्ट्रवर्धनाः(र्तिनः), ये च राष्ट्रात्प्रवासिताः, ये च राष्ट्रनिवासिनः, (३) च न,हि न (for सह), विरुन्ध्यति, (४) चा(ना)रैः (for परैः), परा(रैः)क्रान्ताः (for परैः क्रीताः), ज्ञाताः (for क्रीताः), परन्तप (for कथं).

(०२) (१) कच्चिन्न, त्ते, योऽरिर् (for शत्रुर्), (२) बलिनोपरिपीडिनः,बलेन परिपीडितः,स्वबलेनोपपी, स्वबलेनोपरिपी, बलिना विनिपीडिता, बलिनावरीपीडितः, बलिनोप(नोपि, नो वा)निपी, बलिना विरिपी, बलिनापि नि(ना परि)पी, (३) क- तन्त्रेण (for मन्त्रे), कच्चित्, (४) उभाभ्यां च लक्षालङ्कारः -कथञ्चन, त्वमुभाभ्यां (तव वाभ्यां, त्वमुपाभ्यं) तथा समः(समाः), च (for वा).

(०३) (१) सर्वानु, त्वा, ते,च (for त्वां), (३) त्वदर्थे च, तवार्थेषु(र्थाय),
(४) सन्त्यक्ष्यन्ति, त्वयादृताः, तथा भृताः, त्वया कृताः, त्वया भृताः, समाहिताः, हृताः.

(०४) (कच्चित्ते सर्ववेद्येसु गुणतोऽर्चा प्रवर्तते।ब्राह्मणानां च साधूनां तव नैःश्रेयसी शुभा-पां)
(१) सर्ववैद्येषु, (२) गुणतोर्थः, तो वा, गुणेनार्चा(र्ताः), गुणेनार्वा(अर्वा-अश्वः),
(३) क- ब्राह्मणानां हि साधूनां तव निश्श्रेयसं हि तत् । तु (for च), सर्वेषां, तत्सुष्टु (for साधुनां), ब्राह्मणेषु च विद्वत्सु, (४) नैःश्रेयसी, तव नैःश्रेयसं शुभं(सी कथा),

वस्तुष्वित्यर्थः । गुणेन वर्तते कच्चित्; बोन तानुल्लङ्घ्य न गच्छति कच्चिदित्यर्थः । सुष्ठु शोभनम्
।

कच्चिद्धर्मे त्रयीमूले पूर्वैराचरिते जनैः।
**यतमानस्तथा कर्तुं तस्मिन्कर्मणि वर्तसे ।। १०१ ।।**(०१)

कच्चित्तव गृहेऽन्नानि स्वादून्यश्नन्ति वै द्विजाः।
**गुणवन्ति गुणोपेतास्तवाध्यक्षं सदक्षिणम् ।। १०२।।**(०२)

लक्षालङ्कारः - गुणवन्ति इत्यत्र गुणेन विनयादिगुणेन उपेताः प्राप्ता इति द्विजानां विशेषणम्
।

कच्चित्क्रतूनेकचित्तो वाजपेयांश्च सर्वशः।
**पुण्डरीकांश्च कार्त्स्न्येन यतसे कर्तुमात्मवान् ।। १०३ ।।**(०३)

दक्षिणास्त्वं ददास्येषां नित्यं स्वर्गापवर्गदाः।।
**कच्चिज्ज्ञातीन्गुरून्वृद्धान्दैवतांस्तापसानपि।**
**चैत्यांश्च वृक्षान्कल्याणान्ब्राह्मणांश्च नमस्यसि ।। १०४ ।।**(०४)

कच्चिदेषा च ते बुद्धिर्वृत्तिरेषा च तेऽनघ।

---

तव निश्रेयसं च(हि) तत्, प्र (for त्वं), वर्गयोः (for वर्गदाः).

(०१) (१) त्रिमूले तु (for त्रयीमूले), (२) पूर्वैराचरितैर्जनैः, पूर्वैराजनिते जनैः, (३) वर्तमानं, यतमानस्, (४) अस्मिन्, कस्मिन्.

(०२) (१) व (प)रान्नानि (for गृहेऽन्ना), (४) तवाध्यक्षाः, क्षिणाः, क्षिणां, तिथिवद्भूरिदक्षिणाः, तवा(ताव) द्य कुरुसत्तम.

(०३) (१) त्क्रतूनैकचित्तान्, त्क्रतूनकचित्तो, त्क्रतूननेकांश्च, (३) पौण्ड (for पुण्ड), कार्त्स्नेन, (४) कर्तुमादरात्.

(०४) (१) द्विजान्(राजन्) (for ज्ञातीन्), कुरून् (for गुरून्),सर्वान् (for वृद्धान्), (२) देवतान्, दे(दै)वताः, तापसाः,तथा (for अपि), (३) चैत्यान्वृक्षांश्च(क्षान्स, क्षान्सु, चैत्यान्वृक्षान्स)कल्याणान्, (४) ब्राह्मणांस्त्वं(ज्ञातिंश्च त्वं, णांस्त्वां, पाण्डव त्वं), नमंस्यसि, ब्राह्मणान्नावमन्यसे प्रोत्साद्यते प्रोत्याद्यते, त्वया प्रोच्छा(त्सा)द्यते न च, अभि (for अपि), अभिमङ्गलहस्तस्य जनस्याङ्गं तु(गेषु, गेनु)तिष्ठतः.

आयुष्या च यशस्या च धर्मकामार्थदर्शिनी ॥ १०५ ॥(०१)

एतया वर्तमानस्य बुद्ध्या राष्ट्रं न सीदति।
विजित्य च महीं राजा सोऽत्यन्तसुखमेधते ॥ १०६ ॥(०२)

कच्चिच्छोको न मन्युर्वा त्वया प्रोत्पाद्यतेऽनघ।

अपि मङ्गलहस्तश्च जनः पार्श्र्वे नु तिष्ठति।

कच्चिदार्यो विशुद्धात्मा क्षारितश्चौरकर्मणि।
अदृष्टशास्त्रकुशलैर्न लोभाद्बध्यते शुचिः ॥ १०७ ॥(०३)

लक्षालङ्कारः - कच्चिदार्यो विशुद्धात्मा इत्यत्र अदृष्टशास्त्रकुशलैः अविवेकिभिः, चोरकर्मणीति निमित्तसप्तमी । चौर्याख्यनिमित्तात् हारितः देशान्तरं प्रापितः विशुद्धात्मा वस्तुगत्या विशुद्धात्मा इति सम्बन्धः ।

दुष्टो गृहीतस्तत्कारी तज्ज्ञैर्दृष्टः सकारणः।
कच्चिन्न मुच्यते स्तेनो द्रव्यला(लो)भान्नरर्षभ ॥ १०८ ॥(०४)

लक्षालङ्कारः - दृष्ट इत्यत्र सकारणैः पदशोधनादिकारणसहितैः तज्ज्ञैः चौर्यशोधने निपुणैः मामिकैः दृष्टः चोर इति निर्णीतः दृष्टः त्वया च दृष्टः ।

उत्पन्नान्कच्चिदाढ्यस्य दरिद्रस्य च भारत।

---

(०१) (१) (२) बुद्धिर् वृत्तिर्, धृतिर्, वृद्धिर् (for वृत्तिर्), ते सदा (for तेऽनघ), धृतिरेषा तवानघ, (३) अयुष्या वा यशस्या वा, (४) धर्मकामार्थदर्शनी, धर्मार्थसुखदर्शि(सुखदर्श, शुभदार्शि)नी.
(०२)(२) राष्ट्रेण, राज्यं न, (३) निर्जित्य च महाराज, (४) सोनन्तं(नन्त्यं, त्यन्तं)सुखमश्नुते.
(०३) (१) दार्त्तो, दाढ्यो, (२) क्षालितश्, रक्ष, साक्षि, छादि, कारि, हारि, चौर्यकर्मणि, चोरकर्मणि(णा), प्रेक्षकः शास्त्रचक्षुषा, (३) अदुष्टः शास्त्र, अदृष्टः शास्त्र, अपृष्टः(ष्ट)शास्त्र, अदृष्टशास्त्र, अपृष्टशास्त्र, (४) मोहाद् (for लोभा), विद्यते, बध्यते, बुध्यते.
(०४) (१) पृष्टे, दुष्टो, पृष्टैर्, दृष्टे, दृष्टो, वृष्टो (for पृष्टो), तत्कामी, तत्कर्ता, (२) प्राज्ञैर्, दृष्टैः, सृष्टः, सकारणं, रणैः, (४) अर्थं (for द्रव्य), परन्तप(पः).

अर्थान्न मिथ्या पश्यन्ति तवामात्या हृता जनैः ।। १०९ ।।(०१)

लक्षालङ्कारः - अर्थान्न पथ्या इत्यत्र पथ्याः त्वदमात्यत्वात् पथ्येव मार्ग एव गन्तुं योग्याः ते अमात्याः अर्थेन हृताः सन्तः तं नाशयेति केनचिद्दत्तधनैः हृताः सन्त इत्यर्थः । आढ्यस्य दरिद्रस्य वा अर्थान्न पश्यन्ति कच्चित् ।

नास्तिक्यमनृतं क्रोधं प्रमादं दीर्घसूत्रताम्।
अदर्शनं ज्ञानवतामालस्यं क्षिप्तचित्रताम् ।। ११० ।।(०२)

लक्षालङ्कारः - नास्तिक्यम् इत्यत्र दीघसूत्रता 'दीर्घसूत्रश्चिरक्रियः' इत्यभिधानात् चिरकालपर्यन्तमालोच्य कर्ता दीर्घसूत्रः तस्य भावः ।

एकचिन्तनमर्थानामनर्थज्ञैश्च चिन्तनम्।।
निश्चितानामनारम्भां मन्त्रस्यापरिरक्षणम् ।। १११ ।।(०३)

लक्षालङ्कारः - एकचिन्तनम् इत्यत्र अर्थानाम् एकचिन्तनं एकाग्रचिन्तनम् ।

मङ्गलाद्यप्रयोगं च प्रत्युत्थानं च सर्वतः।।
कच्चित्त्वं वर्जयस्येतान्राजदोषांश्चतुर्दश ।। ११२ ।।(०४)
प्रायशो यैर्विनश्यन्ति कृतमूलापि पार्थिवाः।। (०५)

---

(०१) (१) उ(व्यु)त्पन्नान्, व्यक्तं ते व्यसने, आद्यस्य, (२) च क्षि, तु (for च), वा पुनः (for भारत), (३) क-अर्थानर्थान्न सश्यन्ति तवार्थात्मा हृता धने । क- अर्थान्न मिथ्या पश्यन्ति तवार्थात्मा हृता धने । न मिथ्या, अर्थान्नापथ्या, (४) तवात्मार्था (for तवामात्या), भृता (for हृता), जनैः, यनैः, (धनैर्हृताः).

(०२)क्षि, (१) घोरं, क्रोधः, नास्तिक्यमनृतः क्रोधः, (२) प्रमादी, नास्तिक्यं, दीर्घसन्नतां, सूत्रतां, प्रमादो दीर्घसूत्रता, दीर्घसूत्रता, (४) क्षिप्तवित्ततां, अकृतज्ञतां(ता), नास्तिक्यमित्यादि सार्धश्लोकत्रयं व्याख्यातम्, एकचित्त(चिन्त)मनर्थानां, चितितं, चिनि (for निश्चि), अनारम्भो, पालनं (for रक्षणम्). (पश्चवृत्तिताम्)

(०३) (१) एकचित्त (चिंत) मनर्थानां, (२) चिंतितं, (३) चिंति (।।. निश्चि), अनारंभो), (४) पालनं (।।. रक्षणम्).

(०४) (१) मङ्गलस्य, प्रसङ्गस्य, माङ्गल्यस्य, मङ्गलस्याप्रधानत्वं, अमङ्गल्यप्रयोगं च, मङ्गल्य(ल)स्याप्रयोगश्च, (२) प्रसङ्ग, सङ्गमो, विषमेषु, विष वै, वा (for च) (३) एनान्, (४) राजन् (for गज).

(०५)शो वै विनंक्ष्यन्ति, कृत(त्त), त्व, छ्र, मूला हि, कृत्तमूलापि.

कच्चित्ते सफला वेदाः कच्चित्ते सफलं धनम्।
**कच्चित्ते सफला दाराः कच्चित्ते सफलं श्रुतम् ।। ११३ ।।**[०१]

युधिष्ठिरः-

कथं वै सफला वेदाः कथं वै सफलं धनम्।
**कथं वै सफला दाराः कथं वै सफलं श्रुतम् ।। ११४ ।।**[०२]

नारदः

अग्निहोत्रफला वेदा दत्तभुक्तफलं धनम्।
**रतिपुत्रफला दाराः शीलवृत्तफलं श्रुतम् ।।११५ ।।**[०३]

**वैशम्पायनः**

एतदाख्याय स मुनिर्नारदो वै महातपाः।
**पप्रच्छानन्तरमिदं धर्मात्मानं युधिष्ठिरम् ।। ११६ ।।**[०४]

नारदः

कच्चिदभ्यागता दूराद्वणिजो लाभकारणात्।
**यथोक्तमवहार्यन्ते शुल्कं शुल्कोपजीविभिः ।। ११७ ।।**[०५]

कच्चित्ते पुरुषा राजन्पुरे राष्ट्रे च मानिताः।
**उपानयन्ति पुण्यानि उपधाभिरवञ्चिताः ।। ११८ ।।**[०६]

---

(०१) (१) दारा (for वेदाः, (२) श्रुतं, श्रितं (for धनम्), (३) कच्चिद्वै, वेदाः (for दाराः), (४) कच्चिद्वै, धनं, युतं (for श्रुतम्), शीलवृत्तफलं श्रुतं.

(०२) वै (२) श्रुतं (for धनम्), (४) धनं (for श्रुतम्).

(०३) शीलपुत्र.

(०४) (१) एवमाख्याय, (२) वै (for सु), नारदः सर्वधर्मवित्, (४) धर्मराजं (for धर्मा).

(०५) (१) दभ्यागतान्दू(द्दू), (२) लोभ (for लाभ), मवधार्यते, मेव हा(का)र्यते, मपहा, (३) मवभा० यन्ते, (४) जीविनः.

(०६)(२) पर, पुरो, पुर (for पुरे), मानद, मानतः, पालिताः, कारिताः (for मानिताः), पुरराष्ट्रेषु(ण) पालिताः, (३) पुण्यानि, उत्पादयन्ति पुण्यानि (४) धाभिर्न वञ्चिताः, नेयानि सर्वतः, धाभीरवञ्चिताः.

कच्चिच्छृणोषि वृद्धानां धर्मार्थसहिता गिरः।
**नित्यमर्थविदां तात यथाधर्मार्थदर्शिनाम्** ।। ११९।।(०१)

**कच्चित्ते कृषितन्त्रेषु गोषु पुष्पफलेषु च ।**
**धर्मार्थं च द्विजातिभ्यो दीयते मधुसर्पिषी।।** (०२)
**नियुक्ताः कुशलास्तेषु विभागज्ञाः कुलोचिताः** ।। १२०।।(०३)

द्रव्योपकरणं किञ्चित्सर्वदा सर्वशिल्पिनाम्।
**चातुर्मास्यावरं सम्यङ्नियतं सम्प्रयच्छसि** ।। १२१ ।।(०४)

लक्षालङ्कारः - चातुर्मायादधिकृतम् इत्यत्र चातुर्मायात् मासचतुष्टयं मासचतुष्टयमतीत्य।

कच्चित्कृतं विजानीषे कर्तारं च प्रशंससि।
**सतां मध्ये महाराज सत्करोषि च पूजयन्** ।। १२२ ।।(०५)

कच्चित्सूत्राणि सर्वाणि गृह्णासि भरतर्षभ।
**हस्तिसूत्राश्वसूत्राणि रथसूत्राणि वा विभो** ।। १२३।।(०६)

लक्षालङ्कारः - कच्चित्सूत्राणि इत्यत्र सूत्राणि तत्तज्जातीनां सूचनात् गजादिशास्त्ररहस्यानि।

---

(०१)(३) नित्यं धर्मविदां नित्यमात्म, (४) तथा धर्मानुदर्शनं, यथा धर्मार्थदशिनां, तथा(थात)धर्मार्थदर्शनाः, धर्माधर्मानुशासनं(दर्शिनां).

(०२) (१) कृषिधर्मेषु, त्रिषु तन्त्रेषु, विष, ऋषि, .

(०३)(३) धर्मार्थ द्विजमुख्येभ्यो, (४) दीयेते, यजन्ते, यच्छसे, मधुसर्पिषा, षु, षः, षां, षि .

(०४) (१) अथोपकरणं, यज्ञोप, यज्ञेषु क, किञ्चित्, यज्ञेषु किञ्चित्सर्वेषु, (२) शिल्पि, सत्करो, सर्वं सर्वत्र शिल्पिनां, (३) किञ्चिद् (for सम्यङ्), चातुर्मास्यधनं सम्यङ्, चातुर्मास्यादधिकृतं(स्यान्दधिघृतं, धिकृतां, विकृतं) (४) नियतः.

(०५) (१) च, तु (for वि), विजानीते, विजानासि, (२) प्रशंशसि, स्यसिकर्तारं प्रतिशंसति, (३) सभा(भां) मध्ये(ध्य), (४) सत्कृत्य प्रतिपूज्य च, सु (for च).

(०६)(१/२) सूत्राणि, सर्वाणि, सूक्ताणि (for सूत्राणि), सर्वाणि गृह्णासि, गृह्णीषे, गृह्णासि, साराणि, गृह्णाति, (३) हस्तिसूत्राणि, हस्तसूत्राश्च सूत्रा, हस्तिसूत्राश्च(त्रांश्च)सूत्रं च, हस्तिशीक्षाश्च सूत्रं च, सूत्रं चाश्वसूत्रं ह(स्व) स्ति सूत्राणि सर्वाणि, (४) तथा (for रथ), रथसूत्रं च चा, वाविभो, चाविभो, वाभिभो, च प्रभो, चापि ते, चाविभो, चापि भो.

कच्चिदभ्यस्यते सम्यग्गृहे ते भरतर्षभ।
धनुर्वेदस्य सूत्रं वै यन्त्रसूत्रं च नागरम् ।। १२४ ।।[०१]

कच्चिदस्त्राणि सर्वाणि ब्रह्मदण्डश्च तेऽनघ।
विषयोगास्तथा सर्वे विदिताः शत्रुनाशनाः ।। १२५।।[०२]

कच्चिदग्निभयाच्चैव सर्वं व्यालभयात्तथा।
रोगरक्षोभयाच्चैव राष्ट्रं स्वं परिरक्षसि ।। १२६।।[०३]

कच्चिदन्धांश्च मूकांश्च पङ्गून्व्यङ्गानबान्धवान्।
पितेव पासि धर्मज्ञ तथा प्रव्रजितानपि ।। १२७ ।।[०४]

षडनर्था महाराज कच्चित्ते पृष्ठतः कृताः।

निद्राऽऽलस्यं भयं क्रोधोऽमार्दवं दीर्घसूत्रता।। [०५]

**वैशम्पायनः**

ततः कुरूणामृषभो महात्मा
श्रुत्वा गिरो ब्राह्मणसत्तमस्य ।
प्रणम्य पादावभिवाद्य तुष्टो

---

(०१) (१) द्दत्तश्च ते, दभ्यस्यते दभ्यस्यसे, सम्यग्, नित्यं, शब्दाः (for शश्वद्), कच्चिदभ्यस्य शक्रश्च, (२) गृहीते, गृहीत्वा, आयुधं(धे), युद्धे तु (for गृहे ते), गृहे भरतसत्तम, (३) वेंदं च, वै (for च), (४) यज्ञ (for यन्त्र).

(०२) (१) सूत्राणि (for अस्त्राणि), (२) ब्रह्मदण्डस्य, दण्डं च(दण्डाश्च), भारत, नयः, ते विभो, कृत्स्नशः (for तेऽनघ), (३) विनियोगाश्च, विषयोगां च, योगाश्च, तथा, तदा (for च ते), सर्वे ते (४) ज्ञायन्ते, वियोगात् (for विदिताः), शत्रुनाशन, तापनाः, कर्शनाः.

(०३) (१) चापि (for चैव), (२) सर्पव्याड, मृग(त्यु) व्याल, सर्वं व्याल, सर्प, व्यालः, सर्पः, तदा (for तथा), (३) रक्षोरोगभयाच्, चौररक्षो, रोगक्षोभ, रोगरक्षोभयाश्, चोररक्षो, चापि (for चैव), (४) स्वराष्ट्रं (for राष्ट्रं स्वं) .

(०४) (१) वृद्धांश्च, कुब्जां (for मूकां), (२) पशुछं मानवं धवान्, पङ्गू(कू)न्व्यङ्गांश्च मानवान्, न्व्यङ्गांस्तथा जडान्, पङ्कूङ्गाश्चाथ बान्धवान्, व्यङ्गान्पङ्कुश्च बान्ध, पङ्कून्व्यङ्गांश्च बान्ध, पङ्गून् यङ्गानुबान्ध.

(०५) वल्लब्धा, षडनाथा, निद्रालस्ये भयक्रोधौ.

राजाब्रवीन्नारदं देवरूपम् ।। १२८ ।।(०१)

युधिष्ठिरः

एवं करिष्यामि यथा त्वयोक्तं
**प्रज्ञा हि मे भूय एवाभिवृद्धा।**
**उक्त्वा तथा चैव चकार राजा**
**लेभे महीं सागरमेखलां च ।। १२९।।(०२)**

नारदः

एवं यो वर्तते राजा चातुर्वर्ण्यस्य रक्षणे।
स विहृत्येह सुसुखी शक्रस्यैति सलोकताम् ।। १३०।।(०३)

अस्मिन्५ अध्याये १३०श्लोकाः

**मन्त्रपर्वणि (५) पञ्चमोऽध्यायः ।**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि लोकपालसभाख्यानपर्वणि नारदप्रश्नमुखेन राजधर्मानुशासने पञ्चमोऽध्यायः।। ५।।

# ६.षष्ठोऽध्यायः

# 02- 01- 06

**उत्तमसभालाभतुष्टेन युधिष्ठिरेण सभाविषयकप्रश्ने कृते नारदस्य इन्द्रदिसभावर्णनप्रतिज्ञानम्**

---

(०१) (१) एतां, ततः, एवं, (२) श्रुत्वा वचो ब्रह्मर्षिसत्तमस्य त्वा वचो ब्रह्मविदुसत्त, त्वा वचो ब्रह्मविदुत्त, त्वा द्विजो ब्रह्मर्षिसत्त, (३) वभिनन्द्य, तुष्टो (for हृष्टो), (४) कर्म, काम (for देव).
(०२) (१) यथै(दे)तदुक्तं, (२) च (for हि), एवाभिरुद्धा, भिसिद्धा, इवाभिवृद्धा, एवाभिवृद्धाः, भिवृद्धिः, (३) उक्तो, उक्तांस्, तथैवापि, तथैव स, यथोक्तं च, यथा चैव, तथा च, तथैव (for चकार), (४) तां, स (for च).
(०३)(२) चातुर्वर्ण्य, वर्णस्य, (३) विहृत्येव, स सुखी, स विकृत्य ह सुमुखी, स विहृत्यैव च सुखी (त्यैव सुसुखि), त्यैव स सुखी, त्येव ससुखं, त्येव च सुखी), (४) शक्रस्येति, स्यैव, शक्रेणेति, शक्रस्यैव, स्येह.

॥ १ ॥

**वैशम्पायनः**

सम्पूज्याथाभ्यनुज्ञातो ब्रह्म(महर्षेः)वचनात्परम्।
**प्रत्युवाचानुपूर्व्येण धर्मराजो युधिष्ठिरः** ॥ १ ॥[०१]

युधिष्ठिरः

भगवन्न्याय्यमाहैतं यथावद्धर्मनिश्चयम्।
**यथाशक्ति यथान्यायं क्रियतेऽयं विधिर्मया** ॥ २ ॥[०२]

राजभिर्यद्यथा कार्यं पुरा वैतन्न संशयः।
**यथान्यायोपनीतार्थं कृतं हेतुमदर्थवत्** ॥ ३ ॥[०३]

वयं तु सत्पथं तेषां यातुमिच्छामहे प्रभो।
**न तु शक्यं तथा गन्तुं यथा तैर्नियतात्मभिः** ॥ ४ ॥[०४]

**तं तु विश्रान्तमालक्ष्य देवर्षिममितद्युतिम्।**[०५]

**वैशम्पायनः**

---

(०१) (१) युधिष्ठिरः (for वैशं उ),.संपूजार्थाभ्यनु, ज्याथाप्यनु, (२) ब्रह्मर्षेर्वचना, महर्षि(र्षी)वचना, महर्षिव(र्षिर्व)चनं परं, महर्षिसुवनात्परं, (३) नुपूर्वेण, नुरूपेण.

(०२) (१).भगवन्न्याय्यमात्थैतत्(त्थैतं), न्नाह्यमाहैतत्, भगवान्न्याय्यमाहैवं (य्यमाहैतत्, यमाहैतं), वन्न्याय्यमाहैतत्, (य्यमाहेदं, य्यमाहनं यमाहैवं), व्यक्तं तद्भगवानात्थ, भगवन्यम्ममाहैतं, वन्यन्ममैह्ये(माहै), तत्, वान्यन्ममाहैतत् (हैतं), (२) यमर्थं धर्मसंश्रयं, तऐाधर्मस्य निश्चयं, यथावद्धर्मनिश्चयः, मदर्थं धर्म(अर्थं धर्मार्थ)संहितं, (३) यथान्याय्यं, स (for ऽयं), (४) क्रियते विधिवन्मया.

(०३) (१) तु (for यद्), यथान्यायं, तथा कार्यं, राजभिजघना।।.र्मया, (२) कृतं (for पुरा), क्रतन,तकृन्न, तत्तु न, तन्न तु, तन्त्रं न, वै तन्न, चैतन्न (for तत्तन्न), कृतं तत्तु न संशयं, पुराणज्ञैर्न(क्रियते नात्र) संशयः, (३) तथा न्यायो, (४) भू, भूति, श्रुतः, भूत, कृत (for कृतं), अर्थवित् .

(०४) (१) एवं नु (for वयं तु), तस्पर्थं, सत्पथे, सत्पथः, सप्तधा, सत्पथां(था), वयं चैव यथा तेषां, (२) गन्तुम् (for यातुम्), इच्छाम वै, इच्छामि वै, तथा, ऽनघ, विभो, (३) न च, ननु, न हि, शक्यास् (for शक्यं), यथा कर्तुं (for गन्तुं), न तु कर्तुं तथा शक्यं, (४) तार्थिभिः, .

(०५) वैशं उ, विष्टरम् (for विश्रान्तम्), षिमभित.

एवमुक्त्वा स धर्मात्मा वाक्यं तदभिपूज्य च ।
**मुहूर्तात्प्राप्तकालं च दृष्ट्वा लोकचरं मुनिम्** ।। ५ ।।(०१)

नारदं सुस्थमासीनमुपासीनो युधिष्ठिरः।
**तं तु विश्रान्तमासीनं देवर्षिममितद्युतिम्।**
**अपृच्छत्पाण्डवस्तत्र राजमध्ये महाद्युतिः** ।। ६ ।।(०२)

युधिष्ठिरः-

भवान्सञ्चरते लोकान्सदा नानाविधान्बहून्।
**ब्रह्मणा निर्मितान्पूर्वं प्रेक्षमाणो मनोजवः** ।। ७ ।।(०३)

ईदृशी भवता काचिद्दृष्टपूर्वा सभा क्वचित्।
**इतो वा श्रेयसी ब्रह्मंस्तन्ममाचक्ष्व पृच्छतः** ।। ८ ।।(०४)

**वैशम्पायनः**

तच्छ्रुत्वा नारदस्तस्य धर्मराजस्य भाषितम्।
**पाण्डवं प्रत्युवाचेदं स्मयन्मधुरया गिरा** ।। ९ ।। (०५)

**नारदः**

**मानुषेषु न मे तात दृष्टपूर्वा न च श्रुता।**

---

(०१)(२).तच्चाभि, तमभि, (३) तं (for च), मुहूर्तमे(मि)व कालं च, र्तात्प्राप्य कालं च, (४) दृष्ट्वा लोकचराचरं(मुनिं).

(०२) (१) सुखम्, सुस्थम् (for स्वस्थम्), नमुपासी, (३) अपृच्छद्राजमध्ये तं(तु), (४) महामुनिं, युधिष्ठिरः, महाद्युतिं, महीपतिः, प्रीतिपूर्वमिदं तदा (मुदा, वचः), इति पूर्वमिदं वचः.

(०३)युधिष्ठिर उ(उ), (१) चरति वै, च चरति (for सञ्चरते), भगवन्सञ्चरल्लौँकान्, (३) निर्मितात्, पूर्वे, (४) प्रेक्ष्य, महाजवः, मुहुर्मुहुः.

(०४) (१) इदृशी, इदृशा, भविता, कच्चिद्, (२) भवेत् (for क्वचित्), (३) इतोपि, श्रेष्ठतमा ब्रह्मन्, (४) तां (for तन्), तत्वतः (for पृच्छतः), तन्माचक्ष्व हि पृच्छतः, ममाचक्ष्वोत पृच्छतः(दृश्यथ).

(०५) (१) त्यस्य, त्वस्य (for तस्य), ततः श्रुत्वा नरेन्द्रस्य नारदस्तस्य भाषितं, (४) स्मरन्, स्वयं, कथां, स्मयन्, गिरः.

सभा मणिमयी राजन्यथेयं तव भारत ।। १० ।।[०१]

सभां तु पितृराजस्य वरुणस्य च धीमतः।
कथयिष्ये तथेन्द्रस्य कैलासनिलयस्य च ।। ११ ।।[०२]

ब्रह्मणश्च सभां दिव्यां कथयिष्ये गतक्लमाम्।
दिव्यादिव्यैरभिप्रायैरुपेतां विश्वरूपिणीम्।

देवैः पितृगणैः साध्यैर्यज्वभिर्नियतात्मभिः।

जुष्टां मुनिगणैः शान्तैर्वेदयज्ञैः सदक्षिणैः।

यदि ते श्रवणे बुद्धिर्वर्तते भरतर्षभ ।। १२।।

वैशम्पायनः-

नारदेनैवमुक्तस्तु धर्मराजो युधिष्ठिरः।[०३]
प्राञ्जलिर्भ्रातृभिः सार्धं तैश्च सर्वैर्द्विजोत्तमैः ।। १३ ।।[०४]

नारदं प्रत्युवाचेदं धर्मराजो महामनाः।

युधिष्ठिरः-

सभाः कथय ताः सर्वाः श्रोतुमिच्छामहे वयम् ।। १४ ।।[०५]

किन्द्रव्यास्ताः सभा ब्रह्मन्किंविस्ताराः किमायताः।।

---

(०१) (१) नारद(श्री) उ, .मया (for न मे), काचिद् (for तात), (४) या चैष. याचेयं (for यथेयं).

(०२) (१) च (for तु), प्रेत, धर्म (for पितृ, (२) पाण्डव, भारत (for धीमतः), यमस्य वरुणस्य च, (३) महेन्द्रस्य, तवेन्द्रस्य, (४) कैलाश, वा (for च).

(०३) (१) ब्रह्मणस्य (for णस्तु), (२) गतव्यथ, ततः क्रमात्, गतक्लमाः(मां), कथयिष्येग्रतः क्रमात् दिव्या दिव्यैर्, विश्वकर्मणीं सार्धं (for साध्यैर्), यजूभिर्, ऋषिभिर् यज्वभिश्च महात्मभिः, यतिभिश्च यतात्मभिः, गुण, गुणि (for मुनि), सिद्धैर्, दिव्यैर् (for शन्तैर्), वंशयज्ञैः, देव, वेदैर्यज्ञैः वर्तते पुरुषर्षभ.

(०४)वैशं उ(उ), (१) नारदेनेव, च (for तु), (२) धर्मपुत्रो, राजे ष्ठिरे, (४) दृष्टपूर्वैर् (for तैश्च सर्वैर्), नृपोत्तमैः, द्विजोत्तमैः, नृपोवृतः (for नृपैर्वृतः).

(०५)(२) युधिष्ठिरः, महात्मनाः,सभामध्ये व्यवस्थितं, युधिष्ठिर उ (३) कथय नः, कथयतः, कथिताः, (४) इच्छाम वै (for इच्छामहे).

पितामहं च के तस्यां सभायां पर्युपासते ।। १५ ।।(०१)

वासवं देवराजं च यमं वैवस्वतं च के।।
वरुणं च कुबेरं च सभायां पर्युपासते ।। १६ ।।(०२)

एतत्सर्वं यथान्यायं ब्रह्मर्षे वदतस्तव।।
श्रोतुमिच्छाम सहिताः परं कौतूहलं हि नः ।। १७ ।।(०३)

एवमुक्तः पाण्डवेन नारदः प्रत्यभाषत।
क्रमेण राजन्दिव्यास्ताः श्रूयन्तामिह नः सभाः ।। १८ ।।(०४)

अस्मिन् ६ अध्याये १८ श्लोकाः सन्ति

**मन्त्रपर्वणि (६) षष्ठोऽध्यायः ।**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि लोकपालसभाख्यानपर्वणि युधिष्ठिरसभाजिज्ञासायां षष्ठोऽध्यायः।।६।।

# ७. सप्तमोऽध्यायः

# 02- 01- 07

**इन्द्रसभावर्णनम्**

**नारदः**

---

(०१) (१) राजन् (for ब्रह्मन्), (३) पितामहस्य (for महं च), (४) प्रत्यु (for पर्यु).

(०२) (१) देवराजं तु, देव(धर्म)राजानं, (२) वैश्रवणं (for वैव), मे (for के), (३) के (for च).

(०३) (१) य(त)थावृत्तं, यथान्यायं, (२) देवर्षेः, ब्रह्मर्षे(र्षेर्), वद तत्त्व(दतस्व)तः, वयं त्व(त)त्तो हि नारद, (३) इच्छामि, सह ताः, श्रोतुमिच्छामहे सर्वाः, (४) मे (for नः).

(०४) (२) ह, च (for तम्),नारदः प्रत्यभाषत, (३) ताः सर्वाः (for दिव्यास्ताः),
(४) श्रूयतां, इति (for इह),भारत, तत्सभाः, ताः सभाः (for नः सभाः).शृणु
,मत्तः शुभाः सभाः, सभाः शुभाः

शक्रस्य तु सभा दिव्या भास्वरा कर्मनिर्मिता।
**स्वयं शक्रेण कौरव्य निर्जितार्कसमप्रभा ।। १ ।।**[०१]

विस्तीर्णा योजनशतं शतमध्यर्धमायता।
**वैहायसी कामगमा पञ्चयोजनमुच्छ्रिता ।। २ ।।**[०२]

जराशोकक्लमापेता निरातङ्का शिवा शुभा।
**वेश्मासनवती रम्या दिव्यपादपशोभिता ।। ३ ।।**[०३]

तस्यां देवेश्वरः पार्थ सभायां परमासने।
**आस्ते शच्या महेन्द्राण्या श्रिया लक्ष्म्या च भारत ।। ४ ।।**[०४]

बिभ्रद्वपुरनिर्देश्यं किरीटी लोहिताङ्गदः।
**विरजोऽम्बरश्चित्रमाल्यो ह्रीकीर्तिद्युतिभिः सह ।। ५ ।।** [०५]

तस्यामुपासते नित्यं महात्मानं शतक्रतुम्।
**मरुतः सर्वशो राजन्सर्वे च गृहमेधिनः।**[०६]
**सिद्धा देवर्षयश्चैव साध्या देवगणास्तथा ।। ६ ।।**[०७]

---

(०१) (१) शक्रस्य च, शतक्रतोः(तु), (२) भासुरान्, भासुरा, कर्मनिश्चिता, कर्मनिर्जि(र्मि)ता, (४) निर्जितार्क,.

(०२) (१) विकीर्णा, (२) शतसार्धार्धमा, शतमप्यर्धमा, ध्यर्धमायतं, शतमध्यार्ध, ध्यर्धयोजना, अध्यर्धं, (४) मुन्नता.

(०३) (१) जरातङ्कक्लमा, जराशोकसमा, जराणेकक्लमा, (२) निरातङ्क, सुखा (for शुभा, (३) वेश्मासनवता, युतवती, स्वनवती.

(०४) (१) तस्याः, (२) सभायाः, (३) नद्या (for शच्या), सहेन्द्राण्या,शर्ची, (४) तथा,श्रीमान्, ह्रिया (for श्रिया), लक्ष्मी, श्रि क्ष्मीश्च भारत.

(०५)(२) लोहितांबरः, (३) विरजांबरः, सुवासाश्चि(साचि)त्रमाल्यश्च, विरजोंबरमाल्यश्च, बरचित्राङ्गो(त्राढ्यो, त्राल्यो), (४) ह्रीकीर्तिर्द्युतिभिः, मूर्तिभिः, श्रीकीर्तिद्यु.

(०६)(१) तस्यां तूपासते नित्यं, (२) महात्मानः, (३) सर्वशो, शतशो, (४) सेवका, सर्वे ते, संर्वे वा, .

(०७) (१) दिव्या (for सिद्धा), चापि (for चैव), (२) तदा (for तथा), साध्यामरगणस्तथा, मारुत(तै) श्च धनैः सह .

मरुत्वन्तश्च सहिता भास्वन्तो हेममालिनः। (०१)

एते सानुचराः सर्वे दिव्यरूपाः स्वलङ्कृताः।
उपासते महात्मानं देवराजमरिन्दमम् ।। ७ ।।(०२)

तथा देवर्षयः सर्वे पार्थ शक्रमुपासते।
अमला धूतपाप्मानो दीप्यमाना इवाग्नयः ।। ८ ।।(०३)

तेजस्विनः सोमसुतो विशोका विगतज्वराः।
पराशरः पर्वतश्च तथा सावर्णिगालवौ ।। ९ ।।

एकतश्च द्वितश्चैव त्रितश्चैव महामुनिः ।।१०।।(०४)

शङ्खश्च लिखितश्चैव तथा गौरशिरा मुनिः।
जाबालिर्वामदेवश्च शक्तिर्गार्ग्यसुवामनौ।

दुर्वासाः क्रोधनः श्येनस्तथा दीर्घतमा मुनिः ।। ११ ।।(०५)
पवित्रपाणिः सावर्णिर्याज्ञवल्क्योऽथ भालुकिः।(०६)

उद्दालकः श्वेतकेतुस्ताण्ड्यो भाण्डायनिस्तथा।। (०७)

---

(०१)(३) मरुत्वन्तस्य, मेरुत्वन्तश्च, मरुत्वतश्च, (४) भास्वतो, दिव्य (for हेम).
(०२) (१) चानुवराः, स्वानु, स्वलङ्कृताः, (२) सर्वे(तथा) सानुचरा नृप, सर्वे चानुच (द्ध स)रा नृप, (३) उपासन्ते, महात्मानं, (४) देवराजं, अरिन्दमः, दमः दमे, शतक्रतुं देवराजपुरन्दरं.
(०३) (१) तमृषयः, चैवर्षयः (for देव), चापि (for सर्वे), (२) पार्थाः, यथा, धुत, पूत, (३) अमलायुतपाप्मानो, (४) दिव्य, दीव्य (for दीप्य), समयुजो, साम, सोमसुतो, सोमभुजो, सोमसुता, सोमपाश्च, विपाप्मानो गतक्लमाः, विशोका(पापा)विगतज्वराः.
(०४) (१) परासरः, पावकश्च (for पर्व) भृतश्चैव (for एक), क्रीतश्च स (for त्रित), महामतिः, द्युतिः.
(०५) (१) दुर्वासोथ, दुर्वासान्यो, दुर्वासा, दीर्घतमाः, दुर्वासाथो(सा वै, साथ) दुर्वासा दीर्घतपमसो, दुर्वासा दीर्घतमाः, दुर्वासो-दीर्घतमसौ.
(०६) पवित्रपाणिः सावर्णिः दीर्घतपा भाल्लुकिः, भल्लुकिः, बालुकिः, भावुकः, भावुकिः, वालुकिः.
(०७) (१)ल्क्यो महामुनिः, उद्दालकः, ताल्भः, ताण्ड्यः, स्वध्यः, स्थाड्यः, ताण्डिः, शाण्ड्यः, स्वर्थ्यः (for तथा), ताण्ड्यो, चाण्डायनिः (for तथा शाठ्या), सां(सं), ख्यायनः, शाड्या, शं(शां)खा, भाण्डायणः, भां(भं) डायनिः, भाण्ड्यायनिः, शाण्ड्यायनः, प्रभो, तथा.

हविष्मांश्च गरिष्ठश्च हरिश्चन्द्रश्च पार्थिवः ।। १२ ।।

हृद्यश्च उदरशाण्डिल्यः पाराशर्यः कृषीवलः।। [०१]
जाबालिर्वामदेवश्च शाक्तिर्गार्ग्यसुवामनौ ।। १३ ।।[०२]

वातस्कन्धो विशाखश्च विधाता काल एव च ।
करालदन्तस्त्वष्टा च विश्वकर्मा च तुम्बुरुः ।। १४ ।।[०३]

अयोनिजा योनिजाश्च वायुभक्षा हुताशिनः।

ईशानं सर्वलोकस्य वज्रिणं समुपासते।[०४]

सहदेवः सुनीथश्च वाल्मीकिश्च महातपाः।

शमीकः सत्यवाक्चैव प्रचेताः सत्यसङ्गरः। [०५]

मेधातिथिर्वामदेवः पुलस्त्यः पुलहः क्रतुः।

मरुत्तश्च मरीचिश्च स्थाणुश्चात्र महातपाः।

१.क-(अधिकः पाठः)

अयोनिजा योनिजाश्च वायुभक्षा हुताशिनः ।

उंशानंसर्वलोकस्य वज्रिणं समुपासते ।।

---

(०१) (१) अविष्मांश्च, हविष्मंश्च, गभिष्ठश्च, गरिष्ठश्च, हविष्य(ष्यं, ष्या)श्च, (३) हृद्यु चोदर, कृत्यश्चोदर, कृषश्चोदर,हर्यश्चोदर, हृद्यश्चोदरशौण्डीर्यः, पाण्डिर्यः, श्चोदारशाण्डिल्यः, (४) कृषिह्वयः, कृता(शा)ह्वयः, कृषीबलः, कृषीवलः, कुशीलवःकपिष्वल :, कपिष्ठ(ष्क)लः,कपिञ्जल :, गविष्ठलः , पाराशर्यगविष्ठलौ, पाराशर्यश्च कविष्मलः.

(०२)शक्तिर्गार्ग्यः स वामनः, गर्गः(गर्भः) स वा, गांग्य(गर्ग्यः)सुवामनौ.

(०३) (१) बालस्कन्धो, (२) विधाता मालवि(गालव)स्तथा, ता कालकौशिकः, (३) करालदन्तस्, अनन्तदत्तस्, (४) विश्वकर्माथ, विश्वावसु च, स (for च), तुम्बरुः.

(०४)(२) वायुभक्ष्याः, हुताशनिः, हुतयः(हताशिषः), शनाः, शनः, शिनाः, (३) ईशानाः, (४) पर्यु (for समु).

(०५) (१) सहदेव,सुतीर्थश्च, सुनीतश्च, (२) वाल्मीकश्च, बाह्लिकिश्च, महायशाः, (३) समीपः, शमीकः, स(श)मीकः सत्यवाक्चैव, समीकः(शमाकः, शमीकः)सात्यकिश्चैव, (४) स पुनः (for प्रचेताः).

सहदेवस्सुनीथश्च वाल्मीकिश्च महातपाः ।

समीकस्सत्यवांश्चैव प्रचेतास्सत्यसङ्गरः ।

मेधातिथिर्वामदेवः पुसस्त्यः पुलहः क्रतुः ।।(०१)

कक्षीवान्गौतमस्तार्क्ष्यस्तथा वैश्वानरो मुनिः ।। १५ ।।(०२)

षडर्तुः कवषो धूम्रो रैभ्यो नलपरावसू।
स्वस्त्यात्रेयो जरत्कारुः कहोलः काश्यपस्तथा ।। १६ ।।(०३)

विभाण्डकर्ष्यशृङ्गौ च उन्मुखो विमुखस्तथा।
मुनिः कालकवृक्षीय आश्राव्योऽथ हिरण्मयः ।। १७ ।।(०४)

संवर्तो देवहव्यश्च विष्वक्सेनश्च वीर्यवान्।(०५)

कण्वः कात्यायनो राजन्गार्ग्यः कौशिक एव च।

दिव्या आपस्तथौषध्यः श्रद्धा मेधा सरस्वती ।। १८ ।।

अर्थो धर्मश्च कामश्च विद्युतश्चैव पाण्डव ।(०६)

अर्थो धर्मश्च कामश्च विद्युतश्चापि पाण्डव ।

जलवाहस्तथा मेघा वायवः स्तनयित्नवः।।

---

(०१)वासुदेवः (for वाम), (३) मार्कण्डेयो, मरु(रुं)तश्च मरीचश्च, (४) चात्र, चाद्रिर्, चित्रो, चानु (for चात्रिर्), महाशिराः, महायशाः.

(०२) (१) का(कां)क्षीवान्, गोतमस्, औतमास्, तार्क्षः, ताक्षः.

(०३) (१) षडर्तुः(सर्तु)कवचो, तुंः कषवो, (२) धौम्यो, धूतो, रैसा (for रैभ्यो), (३) जरत्कारिः, .

(०४) (१)विभण्डऋष्यशृङ्गौ च, विभाण्डऋष्यशृङ्गश्च, विभण्डकोथर्श्यशृङ्गः, विभण्डकर्श्यशृङ्गौ च ५.ऋषिः (for मुनिः), कालकनृक्षीयः, कालिकवृक्षीयः, कालकवर्षीयः, ऋषिर्वै कालवृक्षीयः, सर्वर्षीः कालवृक्षीयु, ६.आश्रव्य, बाधव्यो , सुशृतो, श्रुतपो, सुश्रु(श्रो)तो (for आश्राव्यो),हरिण्यदः, हिरण्मयः, .

(०५) (१) संवृत्तो, संवर्ते,हव्यदेवंश्च,वीतहव्यश्च, हव्यकव्यश्च,वेदहव्यश्च, संवर्ज्ञो देविहार्तश्च, (२) विश्वक्से, विष्वक्से, विस्वक्ते, विश्व(ष्व)सेन.

प्राची दिग्यज्ञवाहाश्च पावकाः सप्तविंसतिः ।। १९ ।।[०१]

अग्नीषोमौ तथेन्द्राग्नी मित्रश्च सवितार्यमा।
भगो विश्वे च साध्याश्च गुरुः शुक्रस्तथैव च ।। २० ।।[०२]

विश्वावसुश्चित्रसेनः सुमनस् तरुणस्तथा।।

यज्ञाश्च दक्षिणाश्चैवं ग्रहास्ताराश्च भारत।

यज्ञाश्च दक्षिणाश्चैवं ग्रहास्स्तोभाश्च सर्वशः ।
यज्ञवाहश्च ये मन्त्राः सर्वे तत्र समासते ।। २१ ।।[०३]

तथैवाप्सरसो राजन्गन्धर्वाश्च मनोरमाः।
घृताची पश्चचूडा च विप्रचित्तिपुरोगमाः ।। २२ ।।

विश्वावसुश्चित्रसेनः पर्वतस्तुम्बुरुस्तथा।।[०४]
विद्याधराश्च राजेन्द्र गन्धर्वाश्च मनोरमाः ।। २३ ।।

नृत्यवादित्रगीतैश्च हास्यैश्च विविधैरपि।।
रमयन्ति स्म नृपते देवराजं शतक्रतुम् ।। २४ ।।

स्तुतिभिर्मङ्गलैश्चैव स्तुवन्तः कर्मभिस्तथा।।
विक्रमैश्च महात्मानं बलवृत्रनिषूदनम् ।। २५ ।।[०५]

---

(०१) (१) जलावहास्, जलदाश्च, च मेघाश्च (for तथा मेघा), (२) वायव, वायव्यः, (३) वाहश्च, बाहुश्च.
(०२) (१) अग्निषोमौ, अग्नीसोमौ, अग्निष्टोपस्(मा),अग्नीषोमा, अग्निषोमौतथेन्द्राग्नि, (२) मित्रश्च, (३) भगौ, भागो, भभो, विश्वेथ, (४) शुको मङ्क्षिश्, शुक्रामन्थी(धी), मङ्क्षी च, सध्री च, मन्त्री च, सोमं च (for मन्थी च),गुरुः शु (मन्त्री शु, गुरुः श) क्रस्तथैव च, शुको मङ्क्षिस्तथैव च काशेयनो (for कात्या), च (for तु) .
(०३) (१) यज्ञश्च, दक्षिणाश्चैवं, णांश्चैव, णायुक्ताः, (२) ग्रहा(ग्रह, गृहा)स्ताराश्च, ग्रहास्तार्चाश्च, ग्रहा, स्तोमाश्च व, गृहा(ग्रस्ता)स्तोभाश्च, ग्रहाः स्तोभश्च स्तोभाश्च, भारत (for सर्वशः), (३) यज्ञवाटश्च, (४) सर्वे तस्यामुपा(शक्रमुपा, तस्यां समा)सते.
(०४)मान्यो (for मान्या) शंबुश्च, स्वसनस्, शमनो, पर्वतस् (for सुमनस्), तुंबुरु, वरुण, वारुण (for तरुण) र्वश्यौ च, धराश्च, धरैश्च.
(०५)(३) गीतवादित्रनृत्तैश्च, नृत्तवादित्रगीतैश्च, भावैश्च (for हास्यैश्च),धैस्तथा, भावश्चैव विधैरपि, रञ्जयन्ति,

**जलवाहाश्च मेघाश्च वायवस्स्तनयित्नवः** ।। २५ ।।

ब्रह्मराजर्षयश्चैव सर्वे देवर्षयस्तथा।।
**विमानैर्विविधैर्दिव्यैर्दीप्यमाना इवाग्नयः** ।। २६ ।।(०१)

स्रग्विणो भूषिताः सर्वे यान्ति चायान्ति चापरे।।
**बृहस्पतिश्च शुक्रश्च नित्यमास्तां हि तत्र वै** ।। २७ ।।(०२)

एते चान्ये च बहवो महात्मानो यतव्रताः।।
**विमानैश्चन्द्रसङ्काशैः सोमवत्प्रियदर्शनाः** ।। २८ ।।

ब्रह्मणः सदृशा राजन्भृगुः सप्तर्षयस्तथा ।। २९।। (०३)

एषा सभा मया राजन्दृष्टा पुष्करमालिनी।
**शतक्रतोर्महाबाहो याम्यामपि सभां शृणु** ।। ३० ।।(०४)

**अस्मिन्७ अध्याये ३०श्लोकाः**

**मन्त्रपर्वणि (७) सप्तमोऽध्यायः ।**

**इति** श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि
**लोकपालसभाख्यानपर्वणि इन्द्रसभावर्णनं नाम सप्तमोऽध्यायः।। ७।।**

---

महात्मानं (for स्म नृपते).

(०१) (१) चैव (for सर्वे), (२) देवता ऋषयस्तथा, सर्वे राजर्षयस्तथा, सर्वदेवर्षय, तथा(तथो) देवर्षयोप्यु(च्यु)त, (३) धैर्द्रव्यैः, धैरग्र्यैः(धै रम्यैः), (४) राजमानैर्, ज्वल, दीप्य, दीप्यमाना इवाग्नयः.

(०२) (१) सर्वे(चैव) (for चान्ये), (२) चायन्ति, चापरै, (३) बृहस्पति तथा शुक्रः. (४) नित्यमास्तां हि तत्र वै; नित्यमायां (नित्यमायं नित्यामायां)ति तत्र वै; नित्यमास्तां विशां पते.

(०३)(२) जितात्मानो, धृता, विपाप्मानो, महात्मानो धृतव्रताः, तपोधनाः, (३) सूर्यं, सोम, प्रियं (for चन्द्रं), (४) सोमवत्प्रियदर्शनैः, चन्द्रवत्प्रियदर्शनाः, ५.सदृशाः,(शः) (for वचनात्), तात (for राजन्), ब्राह्मण उच्चावचाद्राजन्, .

(०४) (१) सभा, मया, महाराज (for मया राजन्), (२) दृष्ट्वा (for राजन्), दृष्ट्वा, दृढा, दिव्या, मालिनि, (३) महाबाहो, होर्, हू, (४) मयानघ, याम्या(याम्यां शृणुमपि सभां शृणु; याम्यां मत्तः सभां शृणु (शृणुष्व वै, शृणु स्म वै) लोकपालसभाख्यान, शक्रसभा, इन्द्र(शक्र)सभावर्णनं, वर्णनं.

# ८. अष्टमोऽध्यायः

# 02- 01- 08

**यमराजसभावर्णनम्**

नारदः

कथयिष्ये सभां याम्यां युधिष्ठिर निबोध ताम्।
**वैवस्वतस्य यां पार्थ विश्वकर्मा चकार ह ॥ १ ॥**[०१]

तैजसी सा सभा राजन्बभूव शतयोजना।
**विस्तारायामसम्पन्ना भूयसी चापि पाण्डव ॥ २ ॥**[०२]

अर्कप्रकाशा भ्राजिष्णुः सर्वतः कामरूपिणी।
**नातिशीता न चात्युष्णा मनसश्च प्रहर्षिणी ॥ ३ ॥**[०३]

न शोको न जरा तस्यां क्षुत्पिपासे न चाप्रियम्।
**न च दैन्यं क्लमो वापि प्रतिकूलं न चाप्युत ॥ ४ ॥**[०४]

सर्वे कामाः स्थितास्तस्यां ये दिव्या ये च मानुषाः।
**रस(सार)वच्च प्रभूतं च भक्ष्यं भोज्यमरिन्दम ॥ ५ ॥**[०५]

---

(०१) (१) सभा याम्यां (for दिव्यां), निबन्धतां, नीबोधता; निबोध मे, याम्यां राजन्निबोध मे, यां(या) पार्थ; चार्थाय (for यामर्थे), यां (for ह).

(०२)(२)तेजस्वी(सी)सा; तेजस्विनी; ज्यायसी सा, विस्तार, विस्तरा, वापि (for चापि), भूयस्यपि च पाण्डव, मनोज्ञा सा(ज्ञासौ) परन्तप(भूयसी सा परन्तप), भूयसी.

(०३)(३) अर्कप्रभाभा, आभा अद्धप्रभावा, सर्वदा, कामरूपिणी, नैव शीता न चात्युष्णा, नातिशीता नात्युष्णा नातिशीता न चात्यु(वात्यु; चाप्यु)ष्णा, प्रकर्षणी (for प्रह), मनसः प्रीतिवर्धिनी(र्धनी, र्धना), मनःप्रीतिविवर्धिनी, मनसश्च प्रहर्षणी.

(०४) (४) व्याधिः (for तस्यां) क्षुत्पिपासा, तथाप्रियं, मेप्रियं, न चाप्युत, वाप्रियं, न चाप्ययं, न च श्रमः, दैन्यक्लमौ(मो) न दैन्यं न च, (च न)कार्पण्यं, प्रतिकूल्यं, वा (for चा) प्रतिकूलानि चाप्युत.

(०५)(५) सर्व (for सर्वे), सर्वकामस्थितस्, कामर्थितास्, दिव्या, ये दिव्यं, मानुषा, मानवाः, सारवच्च (for रस), प्रसूताश्च, रसवन्तः प्रभूताश्च(सूताश्च; भूताच), भक्ष, भक्षं, भक्ष्यं (for भक्ष्य), अथापि वा (for

लेह्यं चोष्यं च पेयं च हृद्यं स्वादु मनोहरम्।

पुण्यगन्धाः स्रजस्तस्य नित्यं कामफला द्रुमाः।।
**रसवन्ति च तोयानि शीतान्युष्णानि चैव हि** ।। ६ ।।(०१)

वृक्षाश्च विविधास्तत्र नित्यपुष्पा मनोरमाः।
**शीतलानि च तोयानि सुखोष्णानि च भारत** ।। ७ ।।

तस्यां राजर्षयः पुण्यास्तथा ब्रह्मर्षयोऽमलाः।
**यमं वैवस्वतं तात प्रहृष्टाः पर्युपासते** ।। ८ ।।(०२)

ययातिर्नहुषः पूरुर्मान्धाता सोमको नृगः।
**त्रसद्दस्युश्च राजर्षिः कृतवीर्यः श्रुतश्रवाः** ।। ९ ।।(०३)

अरिष्टनेमिः सिद्धश्च कृतवेगः कृतिर्निमिः।
**प्रतर्दनः शिबिर्मत्स्यः पृथुलाक्षो बृहद्रथः** ।। १० ।।(०४)

वार्तो मरुत्तः कुशिकः साङ्काश्यः साङ्कृतिर्ध्रुवः।
**चतुरश्वः सदश्वोर्मिः कार्तवीर्यश्च पार्थिवः** ।। ११ ।।(०५)

---

अरिन्दम), भक्ष्या(क्ष्य) भोज्याश्च भारत.

(०१) (१) तस्य; तस्यां, पुण्यगन्धस्रजश्चा(स्त)त्र ६ स्रजस्याश्च (for स्तत्र), चात्र, चापि.

(०२) (१)तस्यां (for तथा), राजर्षयो, पार्थ,( तत्र (for तात), प्रतिष्ठाः, तमु, समु (for पर्यु).

(०३) (१)ययातिनघु(हु)षः, पूरु, पूरूर्, पुरुर्, (२)सोमपो, सोमगो, सोमतो, सोमकान्,नृपः(प), मृगः,(३) चतुरयं, चतुरथः, च तुरगः, च राजर्षिः(करुषः), चैत्र(क)रथः,(४) श्रुतवीर्यः (for कुत), श्रुतश्रमाः, कृतश्रवाः, श्रुतश्रवा, कृतवीर्य(र) श्रुतश्रवाः.

(०४) (१)अरिप्रणुत्सः सिंहश्च, अरिश्रगुग्रसिंहश्च, अरिपुण्ड(ड्र)श्च सिंहश्च, अरिपुण्डश्च, हिंसिश्च, अरिव्रणः सुसिद्धश्च, अरिष्टसेनः सिंहश्च, अरिष्टनेमिः(सेन) सिद्धश्च, अविप्राणुत्सु(त्सुः,अरिप्रणुन्सु)सिद्धश्च, अरिपुण्ड्रः(ड्र)सुविघ्नश्च,

(२) कृतखगः, धृतवेगः, कृतवर्गः,कृतवेतः वेदः, कृतिर्निमि, कृमिर्निमिः, कृषि, कमि, कृताकृतिः,कृत वेगकृताकृतिः,

(३) प्रतर्दनः, प्रियङ्करः, शिनिर्, पृथुर् (for शिबिर्), मात्स्यः, मत्स्याः,(४) पृष्टक्षोथः, पृषध्रोथ, पृष्वद्रोथ, वृहकोथ, पृथुलाक्षो(कोथं); पृथुवक्षा(रक्षो, वक्षो), जयद्रथः, बृहद्वपुः.

(०५) (१)ऐण्डो, स्वादी, स्वर्दो, एडो, ऐन्दो, वार्तो(र्ता), वार्गो, ऐळो(लो), मरुन्तः, मरुतः, कुसिकः, कुशकः, कुषिकः, कृ(कु)तकः, कुशिकाः,

भरतः सुरथश्चैव सुनीथो निशठो नलः।
**दिवोदासश्च सुमना अम्बरीषो भगीरथः** ।। १२ ।।(०१)

व्यश्वः सदश्वो वध्यश्वः पृथुवेगः पृथुश्रवाः।
**पृषदश्वो वसुमनाः क्षुपश्च सुमहाबलः** ।। १३ ।।(०२)

रुषद्गुर्वृषसेनश्च पुरुकुत्सो ध्वजी रथी।
**आर्षि(र्ष्टि)षेणो दिलीपश्च महात्मा चाप्युशीनरः** ।। १४ ।।(०३)

औशीनरिः पुण्डरीकः शर्यातिः शरभः शुचिः।
**अङ्गोऽरिष्टश्च वेनश्च दुष्यन्तः सृञ्जयो जयः** ।। १५।।(०४)

---

(२) सङ्काश्यः, सं(शं)काशः, सं(सां)कास्यः, शार्ङ्गिकः, सकृतिर्, संकृ, साकृ, ध्रुवः, भुवः,(
३) चतुरस्यः, रस्नः, रश्व, शन्तनु(सन्तन, सन्तनु, शान्तनु)श्च, सदस्योर्मिः, श्वोर्मिः, शोर्मिः, श्वोर्मी, शतश्वोर्मिः, श्वोर्मिः, शोर्मिः श्वोर्मी, शतश्वोर्मि, सदश्वः

(४) कार्तविर्यश्च, वीर्यस्य, वीर्याश्च, पार्थिव, वीर्यवान्, पार्थिवो भरतस्तुथा.

(०१) (१)भरतस्तपोथ(स्तथा व, स्तथा च, स्तथैळः)सुरथः,भ(भा)रतः सुरथश्रैव, भारतश्च तथैळत्वः सुरथः,भ(पु)रतोथ नळः पूरुः, ऐळः सुनीथः सुरथः, सुरथो, सुनासो (for सुनीथो),

(२) निषधो, निशठो, निशथो (for नैषधो), तथा राजा तपोबलः(रथः), सुनीथो, निषधाधिपःसुरतश्चैव, सुनीथो नि(नै)षधश्चैव नलो राजा परिश्रुतः (३)दिवोदासो वसु, दासश्च सु,

(४) अम्बरीषा, रोहितः, पुरुषोद्भवः, पुरुरुद्भवः, पुरुरुद्धतः, पुरुरूहुतः.

(०२) (१)विश्वः न्यश्वः, ज्यश्वः, अश्वः, व्यवः (for व्यश्वः), सदा वा (for सदश्वो), वध्यश्वः, व्यत्ताश्वः, व्रग्रश्वः, व्रघ्नश्वः व्रद्रश्वः, बध्गश्वः, र्वध्रः, बध्रा, वद्धश्च,बाध्यश्च, वाड्श्वः,बध्रश्च, व्यसदश्वो बान्धव,

(२)पृथुकोथ, पृथुवेगः, पृथुवेदाः (for पश्च), पश्चाग्निः पृथिवीपतिः, रुषङ्गुर्, ऋषगुर्, त्रिशङ्कुर्, उषप्त, रुषद्गुर्, उषद्गुर्, (वृ) ऋषभो, माषगुर् (for रुषद्गुर्), पृषसेनश्च, पृ(ऊ)षदश्वो वसुमनाः,

(३)कृषदश्वो गयश्चैव, चक्षुषः, कृप(त)श्च, कुप(त)श्च (for क्षुप्श्च), रथिनां वरः, सुमनोजवः (for सुमहा),(४) चक्षश्चैव मनोजवः, क्षुपो राजा मनोजवः.

(०३) (१) पृषदग्यो, रुसदश्वो, अस, पृष, कुलङ्करो, उषदश्वो औषङ्गवो, वृषदश्वो, कु(कृ)शदश्वो, विसूसरः, पुरुकुत्सी कृतुद्विजः,(२) विदूरथः, ध्वजी(नी)रथः, कुरुषस्थत्सकृतध्वजः, पुरुकुत्सक्रतुध्वजा, पौरुकुत्सोकृतध्वजः,(३) आर्ष्टिसेनो, आष्णिषेणो, आर्षिणो, आर्ष्टी, आष्टि, महाराजो (for महात्मा च),(४) वा (for च), शरिथः, षीनरः, शीनराः.

(०४) (१)उसीनरः, उशीनरः(राः), औशी(षी)नरिः, औशीरवः, सर्यातिः, शर्यातीः, शर्यातिं, वामनः, शंयातिः, स(सु)रभः, सुलभः, शलभः, कुमुदः, भरतः (for म्शरभः), आङ्गिरिष्ट, अङ्गरेष्ट, अंशॅरिष्ट, अंसो दि(रि)ष्ट, अंसो मुष्टि, हङ्गोदिष्ट, असो(अंशा)दिष्ट, वेणुश्च, वेणश्च, देवाश्वः(देवो वा, देवाश्च), दुष्वन्तः, दुष्कन्तः,दुःखन्तः,

भाङ्गासुरिः सुनीथश्च निषधोऽथ वहीनरः।
**करन्धमो बाह्लिकश्च सुद्युम्नो बलवान्मधुः ।। १६ ।।**[०१]

**ऐलो मरुत्तश्च तथा बलवान्पृथिवीपतिः।**

कपोतरोमा तृणकः सहदेवार्जुनौ तथा।

व्यश्वः साश्वः कृशाश्वश्च शशबिन्दुश्च पार्थिवः।

**राजा दशरथश्चैव लक्ष्मणो(ककुत्स्थो)ऽथ प्रवर्धनः ।। १७ ।।**

अलर्कः कक्षसेनश्च गयो गौराश्व एव च।
**जामदग्न्यश्च रामश्च नाभागसगरौ तथा ।। १८ ।।**

भूरिद्युम्नो महाश्वश्च पृथाश्वो जनकस्तथा।
**राजा वैन्यो वारिसेनः पुरुजिज्जनमेजयः ।। १९।।**

ब्रह्मदत्तः त्रिगर्तश्च राजोपरिचरस्तथा।
**महाभुजो महाजानुः मायासृष्टो हयोऽनघः ।। २०।।**

**इन्द्रद्युम्नो भीमजानुर्गौरपृष्ठः अनघो लयः।**

पद्मोऽथ मुचुकुन्दश्च भूरिद्युम्नः प्रसेनजित्।
**अरिष्टनेमिः सुद्युम्नः पृथुलाश्वोऽष्टकस्तथा ।। २१ ।।**

शतं मत्स्या नृपतयः शतं नीपाः शतं गयाः।
**धृतराष्ट्राश्चैकशतमशीतिर्जनमेजयाः ।। २२।।**

---

दुष्यन्तः, दुस्वतः, दुःसूनुः, सृञ्जयो.

(०१) (१) भार्गस्वरिः(रः), भाङ्गासुरिः, भार्ङ्गसु, भङ्गस्व, भाङ्गसु(स्व)रिः, भार्गःश्वरी, भा(भ)गासुरिः, भार्ङ्गासु, भागस्वरिः(री), भार्ङ्गस्वरीः, सूनिथश्च, स्वनी, सूरि, सुनीथा, व(वि) हीनरः, द्विसीरथः, दिवीरथः, निमीरथी(रथः, निमिः कथः),(२) निषधोथार्चिषीरथः, निषधोर्थादीचीस्यतः, निमेषो धमनी रथी,(३) कारन्धचो, कबन्धमो, कवं, कुरण्ड(ड्र)मो, करन्धेमो, बाल्ही, वाहिकश्च, कम्वरश्चैव, बाह्लिक,(४) प्रद्युम्नो, सुषु(ष्व)मो (for सुद्युम्नो), मधु काशकुशोदकाः, कशकुशादयः, उपासन्ते, यमं राजन्, धर्मराजन्, मूर्तिमन्तं, कीर्तिमन्तो, युधिष्ठिर, जनाधिप(पाः) नराधिपाः(पः) (for निरामयाः).

शतं च ब्रह्मदत्तानां वीरिणामीरिणां शतम्।
भीष्माणां द्वे शते साग्रे(ऽप्यत्) भीमानां तु तथा शतम्।

शतं च प्रतिविन्ध्यानां शतं नागाः शतं हयाः।
पलाशानां शतं ज्ञेयं शतं काशकुशादयः।

शान्तनुश्चैव राजेन्द्र पाण्डुश्चैव पिता तव ।। २३ ।।

उशङ्गवः शतरथो देवराजो जयद्रथः।
वृषदर्भश्च राजर्षिर्बुद्धिमान्सह मन्त्रिभिः ।। २४ ।।(०१)

क-वृषाकपिश्च राजर्षिर्धमात्मा सह मन्त्रिभिः ।

ख-ध- पृषादव्यश्च राजर्षिः धर्मास्सर्वे समान्त्रिणः ।

अथापरे सहस्राणि ये गताः शशबिन्दवः।
इष्ट्वाश्वमेधैर्बहुभिर्महद्भिर्भूरिदक्षिणैः ।। २५ ।।

एते राजर्षयः पुण्याः कीर्तिमन्तो बहुश्रुताः।
तस्यां सभायां राजेन्द्र वैवस्वतमुपासते ।। २६ ।।

अगस्त्योऽथ मतङ्गश्च कालो मृत्युस्तथैव च ।
यज्वानश्चैव सिद्धाश्च ये च योगशरीरिणः ।। २७ ।।

अग्निष्वात्ताः च पितरः फेनपाश्चोष्मपाश्च ये।
स्वधावन्तो बर्हिषदो मूर्तिमन्तस्तथापरे ।। २८ ।।

कालचक्रं च साक्षाच्च भगवान्हव्यवाहनः।
नरा दुष्कृतकर्माणो दक्षिणायनमृत्यवः।
कालस्य नयने युक्ता यमस्य पुरुषाश्च ये ।। २९ ।।

लक्षालङ्कारः - नरा दुष्कुतकर्माण इत्यत्र सोढुमशक्यं दुस्सहमितिवत् कर्तुमशक्यं दुष्कुतं

---

(०१) अ- पृषदर्विश्च रापर्षिर्दान्नास्सर्वे समान्त्रिणः

तादृशं कर्म शुभकर्म येषां ते तथोक्ताः ।

तस्यां शिशंपपालाशास्तथा काशकुशादयः।
उपासते धर्मराजं मूर्तिमन्तो जनाधिप ।। ३०।।

एते चान्ये च बहवः पितृराजसभासदः।
न शक्याः परिसङ्ख्यातुं नामभिः कर्मभिस्तथा ।। ३१ ।।(०१)

असम्बाधा हि सा पार्थ रम्या कामगमा सभा।
दीर्घकालं तपस्तप्त्वा निर्मिता विश्वकर्मणा ।। ३२ ।।(०२)

ज्वलन्ती भासमाना च तेजसा स्वेन भारत।
तामुग्रतपसो यान्ति सुव्रताः सत्यवादिनः ।। ३३ ।।(०३)

शान्ताः सन्न्यासिनः शुद्धाः पूताः पुण्येन कर्मणा।
सर्वे भास्वरदेहाश्च सर्वे च विरजोऽम्बराः ।। ३४ ।।(०४)

चित्राङ्गदाश्चित्रमाल्याः सर्वे ज्वलितकुण्डलाः।
सुकृतैः कर्मभिः पुण्यैः पारिबर्हैश्च भूषिताः ।। ३५ ।।(०५)

गन्धर्वाश्च महात्मानः सङ्घशश्चाप्सरोगणाः।
वादित्रं नृत्यगीतं च हास्यं लास्यं च सर्वशः ।। ३६ ।।(०६)

---

(०१) (२)पितृराजसभास्थिताः, लोकसभासदः,(३) असङ्ख्याः, न शक्याः(क्या), शक्त्या अपरिसङ्ख्यान्तु,.

(०२) (१)असंबधो,समा (for हि सा),(२) कामगमा, तथा,शुभा, मुभा (for सभा).

(०३) (१)ज्वलन्ती च, ज्वलन्ती भासमाना च,(२) तेन (for स्वेन), (३) प्रभासती, प्रवासन्ती, संभाषन्ती, प्रभासन्ति,प्रभावती, पार्थिव, भास्वता, यन्ति, सुवृत्ताः.

(०४) (१)सन्तः, सन्यासिनः, राजन्, (२)शुद्धाः, पूताः (for सिद्धाः), सिद्धाः, पुण्याः, सदा (for पूताः),(३) भासु(स्क)र, वै (for च),(४) विरजोवराः, चिरजांबराः, विरजांबराः, जोबलाः.

(०५) (१)चित्रांबराश्, चित्रतुल्याः,(२) सर्वे स्खलित,(३) सत्कृतैः, स्वकृतैः, दिव्यैः (for पुण्यैः), (४) परिवारैश्च भूषिताः, पारिबर्हिश्च भू, पारि(र)बर्हैर्वि, परिबर्हैः.

(०६) (१)सगन्धाश्च (for गन्ध), गन्धर्वाश्चासते तत्र,(२) सङ्घश(सम्पूर्णा, संयम, सदृश, पयश)श्चाप्सरो, शतशोप्सरसां गणाः, (३) नृत्यगीतं, वादित्र(त्रं)नृत्यगीतानि, वादित्रनृत्तगीतं च(ताश्च),(४) हास्यलास्यं, तथैव च (for च सर्वशः), लास्यं हास्यं च सर्वतः.

पुण्याश्च गन्धाः शब्दाश्च तस्यां पार्थ समन्ततः।
**दिव्यानि चैव माल्यानि उपतिष्ठन्ति नित्यशः** ।। ३७ ।।(०१)

शतं शतसहस्राणि धर्मिणां तं प्रजेश्वरम्।
**उपासते महात्मानं रूपयुक्ता मनस्विनः** ।। ३८ ।।(०२)

ईदृशी सा सभा राजन्पितृराज्ञो महात्मनः।
**वरुणस्यापि वक्ष्यामि सभां पुष्करमालिनीम्** ।। ३९ ।।(०३)

**अस्मिन्८ अध्याये ३९श्लोकाः**

**मन्त्रपर्वणि (८) अष्टमोऽध्यायः ।**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि लोकपालसभाख्यानपर्वणि यमसभावर्णनं अष्टमोऽध्यायः।। ८।।

# ९.नवमोऽध्यायः

## 02- 01- 09

**वरुणसभावर्णनम् ।**

**नारदः**

युधिष्ठिर सभा दिव्या वरुणस्यामितप्रभा।

---

(०१) (१)गन्धाश्च (for च गन्धाः),शब्दगन्धाश्च, शिष्टाश्च (for गन्धाः शब्दाश्च), (२) तस्याः (for तस्यां), समन्विताः,(३) तस्यां पार्थिवसत्तम, माः, मः), तस्यां पार्थ उपासते, चैव माल्यानि (for माल्यानि च ताम्), (४)तानुष, तामुपा, तान्युष, तान्युपा, नित्यशः (for सर्व).

(०२) (१)शत(तं), सहस्राणां, शतशोथ सहस्राणि,(२) धर्मिणं तं, णं च, धर्मिणां तु, र्मिणीं तां, धर्मिष्ठं तं, धर्मराजं, र्मिष्ठा जि, प्रजेश्वर(रः), जनेश्वरं, महात्मानोप(तदा राजन्),(३) तपस्विनः, मनस्विनं, यशस्विनः,(४) रूपवन्तः स्वलङ्कृताः.

(०३) (१)ईदृशी महाराज (for सभा राजन्),(२) राजस्य धीमतः, नारद उ,(३) णस्य च (for णस्यापि), पश्यामि (for वक्ष्यामि),(४) काञ्चनमालिनीं, पुष्करमालिनः.

प्रमाणेन यथा याम्या शुभप्राकारतोरणा।
अन्तःसलिलमास्थाय विहिता विश्वकर्मणा ।। १ ।।(०१)

दिव्यै रत्नमयैर्वृक्षैः फलपुष्पप्रदैर्युता।
नीलपीतासितश्यामैः सितैर्लोहितकैरपि ।। २ ।।(०२)

अवतानैस्तथा गुल्मैर्मञ्जरीजालधारिभिः ।। ३ ।।(०३)

लक्षालङ्कारः - अवतानैतथा गुल्मैः इत्यत्र अव अधस्तादेव तानः विस्तारो येषां ते ।

तथा शकुनयस्तस्यां विचित्रा मधुरस्वराः।
अनिर्देश्या वपुष्मन्तः शतशोऽथ सहस्रशः ।। ४ ।।(०४)

सा सभा सुखसंस्पर्शा न शीता न च घर्मदा।
वेश्मासनवती रम्या सिता वरुणपालिता ।। ५ ।।(०५)

यस्यामास्ते च(स) वरुणो वारुण्या च समन्वितः।
दिव्यरत्नाम्बरधरो दिव्याभरणभूषितः ।। ६ ।।(०६)

द्वितीयेन तु नाम्ना वै गौरीति भुवि विश्रुता।

---

(०१) (१)सभां दिव्यां, सभा रम्या, वरुणस्य मितप्रभा,(२) णस्यामितप्रभा(भो),
(३) शुभप्रकार, शुभ्रप्रा, शुभा प्रा.

(०२) (१)नीलापीतासितश्यामैः, नीलपीतसित(पीतहरि), पीतासि(शि)तैः श्यामैः, पीताशित(तः)श्यामैः, सिताः(=बद्धाः), (१)निर्मिता (for विहि), दिव्यै रत्न, पुष्पैः (for वृक्षैः), (२)प्रदैर्मता, फलैर्युताः, प्रदैर्युतां(तं).

(०३) (१)अवतानैः, पीतैः सिताः, श्यामैः, शतैर्, शितैर्, सीतैर्, स्थितैर् बहुशाखैस्, अवदातैस्, अवतानैः, (२) मञ्जरीजालधारिभिः.

(०४) (१) ततः (for तथा), शकुन्तयस्, रम्या,तस्य (for तस्यां), तस्यां तथा शकुनयो, नानावर्णा(र्ण), मृदुस्वनाः(ष्कराः),(२) विचित्रा मधुरस्वराः,(३) अनिर्देश्य.

(०५) (१) हिमसंस्पर्शा, सुमुस्वंस्पर्शा,(२) नातिशीता न घर्मदा,(३) दिव्या, शुभा(हैमा), शता, शिता,(४) वरुणसंमता.

(०६) (१) तस्यामा(तस्य आ)स्ते, स्म, च, तु (for स), (२)वरुणे, तत्रास्ते वरुणो राजा, वरुण्यअ, भारतः, वा(व)रुण्या च समन्वितः(३) दिव्यरक्ताम्बरधरो, दिव्यमाल्यां(रत्नां)बरधरा, भूषणैरुपशोभिता, दिव्याभरण(लङ्कार)भूषितः, दिव्यरत्नविभूषिता,.

पत्न्या स वरुणो देवः प्रमोदति सुखी सुखम् ।। ७ ।।[०१]

स्रग्विणो दिव्यगन्धाश्च दिव्यगन्धानुलेपनाः।
आदित्यास्तत्र वरुणं जलेश्वरमुपासते ।। ८ ।।[०२]

वासुकिस्तक्षकश्चैव नागश्चैरावतस्तथा।
कृष्णश्च लोहितश्चैव पद्मश्चित्रश्च वीर्यवान् ।। ९ ।।[०३]

कम्बलाश्वतरौ नागौ धृतराष्ट्रबलाहकौ।
मणिनागश्च नागश्च मणिः शङ्खनखस्तथा ।। १० ।।[०४]

कौरव्यः स्वस्तिकश्चैव एलापत्रश्च वामनः।।
अपराजितश्च दोषश्च नन्दकः पूरणस्तथा ।। ११ ।।[०५]

अभीकः शिभिकः श्वेतो भद्रो भद्रेश्वरस्तथा।

अधिकपाठः-

अ-ख-व-अहिको रोहिकश्चैव मद्गो

मणिमान्कुण्डधारश्च कर्कोटकधनञ्जयौ ।। १२ ।।

---

(०१)वै (for या) विख्याता (for विश्रुता).

(०२) (१) सर्वे (for चापि) स्नग्विणो दिव्यगन्धाश्च स्रग्धरो भूषितश्चापि,(२) दिव्यगन्धराश्च, स्रग्धरो भूषितश्चापि, दिव्यमाल्यविभूषिताः, (३)माल्यप्रक(माद्या प्रकः, माल्यप्रव)र्षिणः, गन्धानुलेपनाः, माल्यपरिच्छदाः, माल्यानुलपेनाः.

(०३) (१) नागास्त्वैरा, भागश्चैरा, ऐरावणस् कृष्मश्च,(२) वृष्णश्च,(३) लोहिताश्चैव,(४) पद्मचित्रश्च, सद्मश्चित्र, पद्मपत्र, यमश्चित्र, भारत (for वीर्यवान्).

(०४) (२)वलाहकौ (३) मणिनागश्च नागश्च मणिः (for नागः), (४)शंखनक, शंखणख, .

(०५) (१) कौरव्य, एलापत्रोथ वामन, पुत्रश्च वा, पुत्रः स वा,जोष, योष्य (for दोष), अपरातो ज्योतिश्च (for पूरक, (३)अपराजितश्च दौषाचानन्दः पूरणणस्तस्था, अपराजित ऊषा च नन्दः पुरुणकस्तथा, अभिकः, अहिकः, शिभिकश्चैतो, कश्चैव, रोहिकश्चैव, शिशुकश्वेतो, शिहिक(कः)श्वेतो, शुनकश्चैव माणिमान् कुण्डलधराः, कमण्डलुधरः, कुं(दं)डधारश्च, कुण्डधरः, भिण्डिकर्मारः, पिण्डकः सारः, भिं(भं)डिकस्मारः, गणिकस्स्वारः, गण्डिकस्स्वारः, कार्कोटकः, कक्केटिक.

अ(पा)णिमान् कुण्डधारश्च बलवान्पृथिवीपते।[०१]

प्रह्रादो मूषिकादश्च तथैव जनमेजयः।।
पताकिनो मण्डलिनः फण(णा)वन्तश्च सर्वशः।
अर्थो धर्मश्च कामश्च वसुः कपिल एव च ।। १३ ।।[०२]

अनन्तश्च महानागो यं स दृष्ट्वा जलेश्वरः।
अभ्यर्चयति सत्कारैरासनेन च तं विभुम् ।। १४ ।।[०३]

वासुकिप्रमुखाश्चैव सर्वे प्राञ्जलयः स्थिताः।
अनुज्ञाताश्च शेषेण यथार्हमुपविश्य च ।। १५ ।।

एते चान्ये च बहवः सर्पास्तस्यां युधिष्ठिर ।। १६ ।।[०४]

वैनतेयश्च गरुडो ये चान्ये परिचारिणः।
उपासते महात्मानं वरुणं विगतक्लमाः ।। १७ ।।[०५]

बलिर्वैरोचनो राजा नरकः पृथिवीञ्जयः।
संह्रादो(प्रह्रादो) विप्रचित्तिश्च कालखञ्जाश्च दानवाः।
सुहनुर्दुर्मुखः शङ्खः सुमनाः सुमतिः ततः ।। १८ ।।[०६]

---

(०१) कुण्डकश्चैव, कण्डुकश्चैव, कुण्डलश्चैव (for कुण्डधारश्च), एणीमान्कुण्डकश्चैव, एणी मार्कण्डकश्चैव, एलावान्कण्डकश्चैव, मणिमान्कुण्ड(न्कण्डु)कश्चैव, मालावान्, पृथिवीपतिः, अवनीपते.

(०२) (१)प्रह्रादो, प्रसादो, मूषिकादस्तु(दैश्च),(२) प्रार्ह्रादो मूषकश्चैव, अनुह्रादो मूखिकारस् , अनुह्रद्रो मूषिकादस्, प्रह्रादो मूषिकश्चैव, पिनाकिनो, एताकिनो, मण्डिनः, मण्डलेन, मण्डलीनः, मण्डलिना, पाताकिनो मण्डलीनः,(३) पाकिनो मण्डलीनश्च,(४) फणावन्तश्च, फनावस्तश्च, पणवन्तश्च, भारत (for सर्वशः).

(०३) (१)आर्थो, अनल (for अनन्त)समं, (२) यं च (for यं स),जलेश्वरं, विभुः, भुवि, प्रभुं, तथा (for स्थिताः),(४) ज्ञाता विशे, यथार्थम्.

(०४) (२) सर्पास्तस्या, त(य)स्यां सर्पा, तत्र सर्पा, सर्पास्तत्र.

(०५) (१)वैनतेयश्च गरुडो ये चान्ये परिचारिणः (२)चास्य (for चान्ये), परिचारकाः,(४) चारणः, वारिचारिणः विगतज्वराः.

(०६) (१) चैव, राजन्, तत्र (for राजा), बडिर्वैरोचनो राजन्, बलिवै(वि)रोचनश्चैव, बलिर्विरपचनश्चैवै बलिर्वैरो(मा)चनिश्चैव, सुनरः (for नरकः),(३) प्रह्रादो, संह्रादो, प्रसादो, प्रहादो,(४) विप्रवर्तिश्च, कलङ्कञ्जाश्च,

घटोदरो महापार्श्र्वः क्रथनः पिठरस्तथा।।
विश्वरूपः स्वरूपश्च विरूपोऽथ महाशिराः ।। १९ ।।(०१)

दशग्रीवश्च वाली च मेघवासा दशावरः ।। २०।।(०२)

टिट्टिभो विटभूतश्च संह्रादश्चेन्द्रतापनः।
दैत्यदानवसङ्घाश्च सर्वे रुचिरकुण्डलाः ।। २१ ।।(०३)

अधिकपाठः- क- गोदुहो विगदूभश्च प्रवह

ख-व-गोदुहो पिटदूहश्च प्रबश्चेन्दृवाहनः ।

अ- व- गोदुहो विभ्रदूहश्च प्रशवश्चेन्दृवाहनः ।

स्रग्विणो मौलिनश्चैव तथा दिव्यपरिच्छदाः।
सर्वे लब्धवराः शूराः सर्वे विगतमृत्यवः ।। २२ ।।(०४)

ते तस्यां वरुणं देवं धर्मपाशधरं सदा।

---

कालखङ्गाश्च, कञ्जाश्च, केयाश्च, दानवाः (for सर्वशः).

(०१) सुमुखो, सुतनुर् (for सुहनुर्), शङ्खः, चैव (for शङ्खः), समुनाः सुधामा, सुनामा (for सुमनाः), सुमतिस्व(सु)नः, शुभनिस्वनः, स्वनुः पुनः, ततः (for स्वनः), सुनामा स (सं)मनिस्व(श्व)नः, सुशङ्खः सुसुख(सुखद)स्तथा, (१) घटोदयो, महापार्श्वाः, पार्श्व घटोदरमहापार्श्वः क्रथनिः, थमः, ठनः, कुथनः,कृ, क, क्रथ, कुथ, कथ, क्रत, कधश्च, (२) पिठिरस्, परवस्, पिवरस्, पठिरस्, पितरस्,(३) विकलस्, विरतस्विश्वरूपा, स्व(वि)रूपश्च, विश्वरूपश्च रूपश्च, सुरूपोथ, (४)वि(सु), रूपश्च, महासुराः, महारथः, .

(०२) (१)ग्रीवाश्च वाल्मीको, शापी च, शाली च (for वाली च), मेघवासो, दसाधरः, निशाचरः, दशाधरः, दशाननः, दिशांबरः, दिशांबरः,(२) मेघ(घा)वासश्च भारतः, मेखवाहश्च मोहनः, मेघवासा विरोचनः, वाहश्च भारत, वाहश्च मेघनः, वासी च भारतः, वासाश्च भारत.

(०३) (१)टोभाबो, टैट, टैट्ट्, टिट्टि, टिट्टवो (भो), टी(टि)टिभो, टिट्टे, दोदुहो(ही, भो), दोदूहे, गोदुहो, दोद्रुहो, विटसूदश्च, विकटस्तध्वः, विटभूतश्च, वीटदूत, विकटाभ, विपामश्च, विगदूह, बिभ्रदूह, विटदोह, घटदूष, विटदूह, विगद्रूभ, विभ्रूदूश्च, विददूह, विदुहश्चैव, प्रह्लादश्, प्रह्लादश्, संह्लादश्, स ह्लादश्, प्रभव(वह)श्,(२) चन्द्रतापनः, चण्ड, चेन्द्रपाकः, वाहनः, पातकः, ज्वलित (for रुचिर).

(०४) (१)मालिनः (for मौलि), स्रग्विणो मालिनश्चैव, णो मौलिनश्चैव,(२) दिव्यगन्धपरिच्छदाः,(३) सर्वे च चरितव्रताः, तत्र (for शूराः),(४) विगतमन्यवः, विहतमृत्यवः, समर, विजित.

**उपासते महात्मानं सर्वे सुचरितव्रताः ।। २३ ।।**[०१]

**तथा समुद्राश्चत्वारो नदी भागीरथी च सा।**
**कालिन्दी विदिशा शार्ङ्गी(वेणा) नर्मदा वेगवाहिनी ।। २४ ।।**[०२]

**विपाशा च शतद्रुश्च चन्द्रभागा सरस्वती।**
**इरावती वितस्ता च सिन्धुर्देवनदी तथा ।। २५ ।।**[०३]

**गोदावरी कृष्णवेणी कावेरी च सरिद्वरा।**
**किम्पुना च विशल्या च तथा वैतरणी नदी ।। २६ ।।**[०४]

**देविका च विपाका व तथा वैतरणी नदी ।**
**तृतीया ज्येष्ठिला चैव शोणश्चापि महानदः ।। २७ ।।**[०५]

**चर्मण्वती तथा चैव पर्णाशा च महानदी।**
**सरयूर्वारवत्याय(थ) लाङ्गली च सरिद्वरा ।। २८ ।।**[०६]

**करतोया तथात्रेयी लौहित्यश्च महानदः।।**

---

(०१) (१) तस्यां ते ते तत्र वरुणं पार्थ, (२) धर्मपाशहिताः, धर्म पाशशिनाः(नः), धरं(करं, सितः), सिताः, शा(शं)स्थिताः,(३) उपासन्ते, सपा(मा)सते, महात्मानः, (४) सर्वे दिव्यपरिच्छदाः.

(०२) (१)च सा, तथा, (२)(इ)व सा,(३) कालिनी, विशदा(विदशा), विदिषा, दिविशा, विविशा, विरिशा, वैष्णा, वेणा(श्मा), वेण्या, वेणुः, रेवा, पेण्णा, वेण्णा, बाणा, बण्णा, (४) कावेरी च सरिद्वरा, नर्मदा चैव वाहिनी, नर्मदायैश्ववाहिनी.

(०३) (१) शतक्षुश्च, शतद्रू च, शतद्रूश्च, शतर्दृश्च,(३) ईरावती, धारा, (४)देवबदू(दीस्).

(०४) (१)कृष्णवेला, कृदावेसा, कृष्णवेणाः, वेणी, वेणा, वेण्या, पेण्णा,(२) नर्मदा, वेगवाहिनी, कावेरी सरितां वरा,.

(०५) (१) विशर्या, विशाल्या, कौशी च, काशिकी, गोमतिस्, कुलिशा, गौतमी, कौमुदी (for गोमती), देवीका च, देविकापि,(२) सुवङ्गा, विशङ्का (for विपङ्का), देविका चापि वङ्गा च, (३) तृतीयज्येष्ठिलाश्चैव,(४) ऐण (for शोण), पशुपाला, फल्गुनी च, वद्गु(ल्गु) सा च, साधूश्चिरपकेला, सरयूश्चरवल्के(के)ला, यूश्चिरपकेला, यूरेकवप्रा च, कुर्याश्च, लुलिश्च, कुल्याश्च, कुलिश्च, कुल्यश्च राजेन्द्र (for सरितस्,. महाह्नदः लङ्वती, तथान्या च सरिद्वरा, सन्ध्या त्रिस्रोतसा अपि, सन्ध्या त्रिःस्रो (श्रो)तसी तथा

(०६) (१)कंपना च, कंपमाना, विशाला च, नदी वैतरणी तदा, ज्येष्ठला, वेष्टिला, श्रेष्ठिला, वामा, रामा (for चैव), शोणश्चैव, दृषद्वती (for तथा चैव),(२) पूर्णेशा च, फाल्गुनी च, सरयूर्वारवत्या(कथा) च, यूर्वीररम्या च, यूर्गेडकी चैव, शरयूर्वीचिचपला,(३) सरयूर्वालिखिल्या च, युद्धारवत्याश्च,(४) नन्दिनी, नागिनी (for लाङ्गली).

**लघन्ती गोमती चैव सन्ध्या त्रिःस्रोतसी तथा।**(०१)

एताश्चान्याश्च राजेन्द्र सुतीर्था लोकविश्रुताः।।
**सरितः सर्वतश्चान्यास्तीर्थानि च सरांसि च।**
**ह्रदाश्च वरुणं देवं सभायां पर्युपासते** ।। २९ ।।

कूपाश्च सप्रस्रवणा देहवन्तो युधिष्ठिर ।
**पल्वलानि तटाका(डागा)नि देहवन्त्यथ भारत** ।। ३० ।।(०२)

दिशस्तथा मही चैव तथा सर्वे महीधराः।।
**उपासते महात्मानं सर्वे जलचरास्तथा** ।। ३१ ।। (०३)

गीतवादित्रवन्तश्च गन्धर्वाप्सरसां गणाः।
**स्तुवन्तो वरुणं तस्यां सर्व एव समासते** ।। ३२ ।।(०४)

महीधरा रत्नवन्तो रसा ये च प्रतिष्ठिताः।
**कथयन्तः सुमधुराः कथास्तत्र समासते** ।। ३३ ।। (०५)

वारुणश्च तथा मन्त्री सुनाभः पर्युपासते।
**पुत्रपौत्रैः परिवृतो गोनाम्ना पुष्करेण च ।**
**सर्वे विग्रहवन्तस्ते तमीश्वरमुपासते** ।। ३४ ।।(०६)

---

(०१) अधिकपाठः- क- श्चीरवल्का च कुत्याश्च । ख-व- श्चित्रपक्केल लुलिश्च ।अ- सरयाश्रिरपक्केला

(०२) (१) सुप्रस्र, भद्रश्र, सप्रश्र, सप्रस्रवर्णा, कूपाः प्रस्र(श्र)वणाश्चैव, तडाकानि, तटाकानि,
(२) देहवन्ति च, वन्त्यत्र.

(०३) (१) दिशः सर्वा, दिशश्चाथ, सर्वे चैव,(२) तथैव च, विदिशश्च (for तथा सर्वे), महीरथाः (३) उपासन्ते, महात्मानः,(४) जलधरास्तथा, चराश्च ये.

(०४) (१)त्रनृत्तैश्च, त्रवादाश्च,(२) सर्वे चाप्सरसां देवं (for तस्यां), (३)स्तुवन्तस्तत्र वरुणं,(४) सर्व एवमुपासते, सभायां च समा, सभायां पर्युपा.

(०५) (१) महनीया (for मही), रत्नवहा (for वन्तो),(२) रसा ये च, रसायां सु, धरण्यां ये, अन्ये ये च (for रसा येषु) प्रतिश्रुताः.

(०६) (१)कथयन्त सुमन्धाराः, यन्तश्च मधुराः, कथास्ते तु, वरुणस्य, वारुणस्य, वरुणश्च, वरुणस्य महामन्त्री(त्रं),(२) सुनाभाः, सुनादः, सुमहाबलः,(३) परिसेवते,(४) गोम्नाम्ना, गोनात्ता पुष्करेक्षणः हवन्तश्च,

एषा मया सम्पतता वारुणी भरतर्षभ।
**दृष्टपूर्वा सभा रम्या कुबेरस्य सभां शृणु** ।। ३९ ।।(०१)

लोकपालसभाख्यान, वरुण(वारुणि)सभावर्णनं, वारनीसभा

**अस्मिन्९ अध्याये ३९श्लोकाः**

**मन्त्रपर्वणि (९) नवमोऽध्यायः ।**

**इति** श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि
**लोकपालसभाख्यानपर्वणि वरुणसभावर्णने नवमोऽध्यायः।। ९।।**

# १०.दशमोऽध्यायः

## 02- 01- 10

कुबेरसभावर्णनम् ।। १ ।।

**नारदः**

सभा वैश्रवणी राजञ्छतयोजनमायता।
**विस्तीर्णा सप्ततिश्चैव योजनानि सितप्रभा** ।। १ ।।(०२)

तपसा निर्जिता राजन्स्वयं वैश्रवणेन सा।
**शशिप्रभा प्रावरणा कैलासशिखरोपमा** ।। २ ।।(०३)

गुह्यकैरुह्यमाना सा खे विषक्तेव शोभते।

---

जले (for तमी).

(०१) (१) ते कथिता, सन्तपना, सुसश्चाराः, सश्चरता, संप्रत, संप्रगी, एषा मया (मय) सभा तात, वरुणस्य महात्मनः,(२) तु तां (for सभां).

(०२) (१)वैश्रवणि, (२)शतयोजनमायताः, मायुता,(३) विस्तरा, सप्ततीश्चैव, सप्ततिं चैव, सप्तभिश्चैव, (४) योजनानां, शतं प्रभो, शतप्रभा, शित, सितः प्रभा.

(०३) (१)निर्जिता, निर्मितो, तपसा निर्मितोग्रेण,(२) स्वया, सभा, हि (for सा),(३) खेचराणा, रणां, रणं, रणा, प्रावरणा, खेचरी(रा) सा, राणां, व्यचीराणां,(४) भूरुचिरा, खेचरा च(सा), कैलाश.

दिव्या हेममयैरुच्चैः प्रासादैरुपशोभिता ।। ३ ।।[०१]

महारत्नवती चित्रा दिव्यगन्धा मनोरमा।
सिताभ्रशिखराकारा प्लवमानेव दृश्यते ।। ४ ।।[०२]

तस्यां वैश्रवणो राजा विचित्राभरणाम्बरः।।
स्त्रीसहस्रैर्वृतः श्रीमानास्ते ज्वलितकुण्डलः ।। ५ ।।[०३]

सह पत्न्या महाराज ऋद्ध्या सह विराजते ।
सर्वाभरणभूषिण्या वपुष्मत्या धनेश्वरः ।। ६ ।।[०४]

दिवाकरनिभे पुण्ये दिव्यास्तरणसंवृते।
दिव्यपादोपधाने च निषण्णः परमासने ।। ७ ।।[०५]

मन्दाराणामुदाराणां वनानि परिलोडयन्।
सौगन्धिकवनानां च गन्धं गन्धवहो वहन् ।। ८ ।।[०६]

(०१) (१) गुह्येकैरुह्य, गुह्यकैरुष्ट, कैरुह्य, गुह्य, माना सा,(२) वसन्तीव, विभक्तैव, विवीक्तव, विभक्तेव, विसक्तेव(विशन्तीव), विशक्ता, शोभते (for दृश्य),(३) दिव्यहेम(देह)मयैरुच्चैः, दिव्या हेममयैरग्र्यैः(रङ्गैः),(४) दिव्यैर्हेममयैरग्र्यैः, प्रा(प्र), सादैरुपशोभिता(भते ), विद्युद्भिरिव चित्रिता.

(०२) (१)रश्मीवती रश्मिमती, मन्ती, अर्चिष्मती, अर्चिष्मद्भिर्, भासुरा च, भास्वरी सा, भास्व(स्म)ती च, महारत्न(थि)वती (न्ति) चित्रा, कश्मीरचित्रभानोस्तु, दिव्यगन्ध, (३)शिताभ्रसिखरा, सिताभ्रनिचया, (४) खे विभक्तेव दृ, हेमतोरणशोभिता.

(०३) दिव्यहेममयैः स्तंभैर्, दिव्य यैरङ्गैर्, दिव्यहे(व्यैर्हे)ममयैः शृङ्गैर्, दिव्यहेममयैरुच्चैः प्राप्तादैरुपशोभिता.

(०४) (१)पद्मा (for पत्न्या), महाराजा राजराजो, स हि (for सह), दिव्या (for सर्वा), वपुष्मत्या (for पुष्प) सहे (for धने) विचित्रास्तरणायुधः त्रांबरभूषणः, (३)स्त्रीसहस्रैर्वृ(स्रवृ)तः, तेजं (for आस्ते), कलित (for ज्वलित), सहित(तै)स्त्रिदशैः सार्धमास्ते रुचिरकुण्डलः, सहितस्त्रिदशै रम्यै(सभ्यो)रास्ते रुचिर, सहस्रस्त्रीगणो राजन्नास्ते रुचिर.

(०५) (१)रम्ये, दिव्ये (for पुण्ये), दिव्याकरनिभे रम्यो,(२) दिव्यास्तरणसंभृते, पुण्यास्तरणसंवृते, (३) दिव्यास्तरणसंस्कृते, भरणसंवृते, पुण्यास्तरणसंवृते, दिव्यास्तरणसंस्कृते, भरणसंवृते, स्तरणसंयुते,(४) दिव्यरागो, विषण्णः.

(०६) (२) परिलोडयन्, सुरभीनि च, भीण्यथ, पवनानि सुरभीणि च,(३) सौगं(कं)धिकवनानां च, कानामादाय, काकां चादाय वायुः,(४) गन्धं, गन्ध (for गन्धान्), गन्धवहं, शुभः, शुभाः(भा), वहन्, वहून्.

नलिन्याश्चालकाख्याया नन्दनस्य वनस्य च।
शीतो हृदयसंह्लादी वायुस्तमुपसेवते ।। ९ ।।(०१)

तत्र देवाः सगन्धर्वा गणैरप्सरसां वृताः।
दिव्यतानैर्महाराज गायन्ति स्म सभागताः ।। १०।।(०२)

मिश्रकेशी च रम्भा च चित्रसेना शुचिस्मिता।
चारुनेत्रा घृताची च मेनका पुञ्जिकस्थला ।। ११।।(०३)

विश्वाची सहजन्या च प्रम्लोचा उर्वशी इरा।
दिव्या हेममयैरङ्गैर्विद्युद्भिरिव चित्रिता ।। १२ ।।(०४)

वर्गा च सौरभेयी च समीची बुद्बुदा लता।(०५)

गोपाली पश्चचूडा च विद्युद्वर्णा सुलोचना।
चित्रदेवी च नीला च काम्या च ललिता तथा ।। १३ ।।(०६)

---

(०१) (१)नलिनाश्, नखिन्याश्, चारुमुख्यायाश्(ख्याश्च),(२) नं(चं)दनस्य, नकुलस्य, च नन्दानां (for चन्दनानां) स नो हृदय,(३) मनो(शीतो)हृदयसंह्लादी (ह्लादो, ह्लादि), शीतो हृदयसंह्लादी(दो), सतां हृदय, मनः हृदयं,(४) वायुस्तत्समुपसेवते, वायुश्च तमुपासते.

(०२) (१)य(त)त्र ते देवगन्धर्वा- प्सरसं, प्सरसा, किल, गणाः, वृता, दिव्यता(गा)नेषु, तालेन, नित्यतानेन,(२) गायन्ति (for गीतानि)(३) दिव्यतानै(लै)र्महाराज, भान्ति, शान्ति (for गान्ति), गायन्ति(ती), भरतर्षभ, गी(नी) तानि भरतर्षभ, गायन्तः (४) स्म(तश्च)समासते, गायन्ति स्म सभागताः, भाङ्गि(गाङ्गि) तव्यानि भारत.

(०३) (१)मिश्रकेशि, चित्रसेनी,(२) चित्रा चैव,(३) चक्रसेना, चारुनेत्र, चरुनेत्रा, चारुदेक्ष्णा, देष्ण, चालनेत्रा, चारुदेष्णा,(४) पुञ्जि(ज)कस्थली, पुञ्जिकस्तना, पुञ्जका(क)स्थला, पूञ्जकस्थली, तथैव च तिलोत्तमा.

(०४) (१) जन्याथ, (२) प्रक्षोचा(प्रम्लोचा), मेनका मुञ्जिकस्थला, मेनका पुञ्जिकस्थला(ली), प्रम्लोचं(म्लायं) त्युर्वशी तथा, प्रम्लोचाप्यु(चा ह्यु)र्वशी तथा.

(०५) (१)वर्मा च, वर्चाभा, चर्चा च, वत्सा च, वङ्गा च, वर्दा च, वर्णा च, वर्चा च, वर्धा च, दिव्या च,(२) सौरभी चैव, सौरभेदी च.

(०६) (२)विद्युद्ववत्रा, विद्युद्व(प)र्णा -(३) चित्रदेवा च लीला च सामीची, सामेदी, भद्रदा, चूध्दूवा, बुद्धिदा (for बुद्धुदा), (अ)लसा (for लता), समीची बुद्दुदानना, (४) काम्या च ललिता तथा (काम्या च लसिता तथा, क्रम्याक्रम्या च लालिता).

एताः सहस्रशश्चान्या नृत्यगीतविशारदाः।
**उपतिष्ठन्ति धनदं गन्धर्वाप्सरसां गणाः ।। १४ ।।**[०१]

अनिशं दिव्यवादित्रैर्नृत्यगीतैश्च सा सभा।
**अशून्या रुचिरा भाति गन्धर्वाप्सरसां गणैः ।। १५ ।।**[०२]

लक्षालङ्कारः - अनिशम् इत्यत्र गीतवादित्रैः वेण्वाद्यैः ।

गन्धर्वाणां च पतयो विश्वावसुर्हहा हुहूः।
**तुम्बुरुः पर्वतश्चैव शैलूषस्त्वथ नारतः ।। १६ ।।**[०३]

चित्रसेनश्च गीतज्ञस् तथा चित्ररथोऽपि च ।
**एतै चान्ये च गन्धर्वा धलेश्वरमुपासंते ।। १७ ।।**

विद्याघराधिपश्चैव चन्द्रापीडस्सहानुजैः ।
**उपासते महात्मानं धनानामीश्वरं प्रभुम् ।। १८ ।।**

किन्नराश्शतशस्तत्रे भगदत्तपुरोगमाः ।
**द्रुमः किम्पुरुषेशश्च उपास्ते धनदेश्वरम् ।। १९ ।।**

राक्षसानां पतिश्चैव सह सर्वैर्निशाचरैः ।
**विभीषणस्सुधर्मिष्ठ उपास्ते भ्रातरं प्रभुम् ।। २० ।।**

निधीनां प्रवरौ मुष्यौ शङ्खपद्मौ धनेश्वरम् ।
**सर्वान्निधीन् प्रगृह्यैतावुपासाते महेश्वरम् ।। २१ ।।**

किन्नरा नाम गन्धर्वा नरा नाम तथा परे।।
**मणिभद्रोऽथ धनदः श्वेतभद्रश्च गुह्यकः ।। २२ ।।**

---

(०१) (१) नृत्य (for नृत्त) उपतिष्ठन्त, उपातिष्ठन्त, उपविष्ठन्ति, सततं, राजानं (for धनदं),(३) उपनृत्यन्ति राज्ञो वै, (४) गन्धर्वा (for पाण्डवा).

(०२) (१)अङ्गिशं, गीत (for दिव्य), अनिसं दि व्यैर्, नृ(वृ)त्तैर्दिव्यैश्च, नृत्यैर्गीत, नृत्तै श्च, नृत्यगीतैश्च, दिव्यैर्नृत्तैश्च, नृत्तगीतैश्च.

(०३) किंनराश्च सगन्धर्वा, किंनरोरगगन्धर्वा, किंनराः शतशस्तत्र, बलवन्तस्तथापरे, भगदत्तपुरोगमाः.

कशेरको गण्डकण्डूः प्रद्योतश्च महाबलः।।
कुस्तुम्बुरुः पिशाचश्च गजकर्णो विशालकः ।। २३ ।।(०१)

द्रुमः गिम्पुरुषश्चैव फलभक्षः फलोदकः ।
वराहकर्णस्ताम्रोष्ठः फलकक्षः फलोदकः ।। २४ ।। (०२)

हंसचूडः शिखावर्तो हेमनेत्रो विभीषणः।
पुष्पाननः पिङ्गलकः शोणितोदः प्रवालकः ।। २५ ।।(०३)

अधिकः पाठः-

ध-ख- अङ्गडशिकावतौ हेमसकन्द्रो विभीषणः

वृक्षपार्श्र्वो निकेतश्च चीरवासास्तथैव च ।
एते चान्ये च बहवो यक्षाश्शतसहस्रशः।।
उपासते सदा श्रीश्च तथैव नलकूबरः ।। २६ ।।(०४)

हिमवान्पारियात्रश्च विन्ध्यकैलासमन्दराः ।। २७ ।।(०५)

मलयो दर्दुरश्चैव महेन्द्रो गन्धमादनः।

---

(०१) (१)कसेरको, कशेरलो,कसैरसो, कशेरणो, रदा, केशेरलो, केशेबभ्रो, केशेवलो, कशैरलो, कुशेरलो, कृशेरला, गण्डकण्डूः, कुण्डुः, कर्णः, कण्ठः,(२) मण्डकण्डः, गण्डगण्डः, केतुः, गन्धप(व)णो, गन्ध(ड) पिण्डो, वृक्षो(तो षो)दश्च (for प्रद्योतश्च),(३) कुस्तुंबरुः(स्तुंबरः, स्तंबरुः), पाशाचश्च, पिपाशश्च, विश्वावसुं, विश्व(श्वा)वसुर्, पिशाचाश्च,(४) द्रुमः किंपुरुषश्चैव, गणकश्रोत्रवीणकः.

(०२) (३)वाराहकर्णः, विशाल, व्याघ्रोष्ठः, सांद्रौ, ताम्रौ, सङ्क (साक्रु सङ्क)ष्टः, कर्णसान्द्रौष्ठः, कर्णसान्द्रो, कर्णताम्रौ(म्रो), वर्णताम्रो,(४) फलभक्तः, कर्णः, भक्ष्यः, कक्षः, भक्ष्यः, भक्ष, पुक्ष, वक्षः, दक्षः, फलादकः, फलौदनः,.

(०३) (१)अङ्गस्थलः, छलः, मूलः, शङ्खचूडः(लः), अक्ष, अंश, (२)हंस, हंसवृत्तः, अङ्गचूळः, शिखावत्तो, वार्ता,(३) शखावर्तो, शिवावर्तो, शिलापुष्पो, शिलापूषो, अङ्गचूळशिखावन्तौ, अर्कचूळशिखावर्तौ, अङ्गचूळशिलापूषो, (४) हेमनेशो, चित्रो, नेत्र, चन्द्रो, विभूषणः,हेमनेत्रोथ भूषणः.

(०४)ऊष्माननः, पुष्पासनः, नतः, पुष्पकरः, पिङ्गलाक्षी, शोणितादः, शाणितोदः, प्रणा(का)लकः, प्रबा, प्रपालिकः(पालितः, तोलिकः), शोणिताशप्रशालकः, वृक्षवास्यानिकेत, वृक्षपाल, वृक्षवास, वृकवास्य, वृकवांश्चा, वृक्षपार्श्वो(पार्श्व, वास्यो, वान्यो, पातो), निकेतश्च, चर, वीर, धीर, चित्र (for चीर), तथैव च (for च भारत).

(०५)लक्ष्मीस् (for च श्रीस्),ुपासते श्रीश्च(श्री च) सदा, तत्रैव (for तथैव) नडक्.

इन्द्रकीलः सुनाभश्च तथा दिव्यौ च पर्वतौ ।। २८ ।।[०१]

एते चान्ये च बहवः सर्वे मेरुपुरोगमाः।
उपासते महात्मानं धनानामीश्वरं प्रभुम् ।। २९ ।।

अहं च बहुशस्तत्र तथा देवर्षयोऽपरे।
भगवान्भूतसङ्घैश्च वृतस्सततमीश्वरः ।। ३० ।।

उमापतिः पशुपतिः शूलधृग्भगनेत्रहा।
कुरुभ्यः प्रस्थितास्ते तु मध्येन कुरुजाङ्गलम् ।
रम्यं पद्मसरो गत्वा कालकूटमतीत्य च ।। २७ ।।
माधवः पाण्डवेयौ च प्रतस्थुर्व्रतजारिणः ।।(०३)

सन्तीर्य सरयूं रम्यां दृष्ट्वा पूर्वांश्च कोसलान्।
गण्डकीं च महाशोणं सदानीरां तथैव च ।। २८ ।।(०४)

---

(०१) (२) राजा (for दृष्ट्वा); भीमपुरःसरौ; पुरोगमैः; पुरोगमः; (३) एकवीर्य०; एककार्ये; एजकाये; समुद्यन्तौ; (४) महीतले (for ऽपराजितौ); दृष्ट्वा कृष्णौ विनिर्ग(र्जि)तौ; दृष्ट्वा कृष्णावनिष्ठितौ; दृष्ट्वा कृष्णधनञ्जयौ; दृष्ट्वा कृष्णावनिर्जितौ; .

(०२) (१) ईशौ ड तौ; हितौ हि तौ; इमौ हि तौ; ईदृशौ तौ; अंशौ हि तौ; सुशोभितौ; ईशौ भीमो; हि तौ (अनुकूलौ); (२) प्रवर्तिनौ (प्रवृत्तिनौ); प्रवर्तनौ; प्रवर्तकौ; (३) धर्मार्थकार्यकार्याणां; धर्मकामार्थ; धर्मकामार्थलोकानां; धर्मकामार्थमोक्षाणां; धर्मार्थकाममोक्षाणां; काम(कार्य)० लौक्यानां; धर्मकामार्थलौत्त्यानां; धर्मार्थौ काममोक्षाणां; ( धर्मार्थकामा एव कार्याणि प्रयोजनानि येषां); (४) लोकानाम्; कार्याणाम्; इति विग्रहे; च विनिग्रहे; इव निग्रहः; इव विग्रहौ; च प्रवर्तकौ; अपि निर्णये (ग्रहैः); इव सश्चये; इव सङ्ग्रहे; .

(०३) कुरुभिः; आरूह्य (for कुरुभ्यः); (२) जङ्गलं(ले)(for जाङ्गलम्); (३) रम्यां; रम्य०(for रम्यं); पत्रसरो; पद्मसरो; (४) कालकूटीमू; .

(०४) (१) शोणां (for शोणं); गण्डकीयं (गणकीयां)तथा शोणं (शोणां; श्रोणं); गण्डकीं च तथा शोणं; गण्डकीयांस्तथा शोणं; गण्डकीं च (कयिं) महाशोणं (णां); सदानीरां तथा शोणं; गण्ड(कटं; कण्ठ)कमिनुरागां च; (२) सदा(प्र)नीरं; तथा नीरां शर्करावर्तमेव च; कर्करावर्तमेव च; सदानीरा; .

एकपर्वतके नद्यः क्रमेणैत्याव्रजन्त ते ।[०१]
**अतीत्य जग्मुर्मिथिलां पश्यन्तो विपुला नदीः ।। २९ ।।**[०२]

अतीत्य गङ्गां शोणं च त्रयस्ते प्राङ्मुखास्तदा ।
**कुशचीरच्छदा जग्मुर्मागधं क्षेत्रमच्युताः ।। ३० ।।**[०३]

ते श्वश्वद्गोधनाकीर्णमम्बुमन्तं शुभद्रुमम् ।
**गोरथं गिरिमासाद्य ददृशुर्मागधं पुरम् ।। ३१ ।।**[०४]

श्रीभगवान्-

एष पार्थ महान्भाति पशुमान्नित्यमम्बुमान् ।
**निरामयः सुवेश्माढ्यो निवेशो मागधः शुभः ।। ३२ ।।**[०५]

---

(०१) (१) एका; एकं (for एक)पर्वतको; चैव; सद्यः(for नद्यः); (२) अद्य; अथ; अन्ये; अनु०; अत्र; अति०(for एत्य); व्रजन्त; , (अ)व्रजन्त(तु); व्रजंश्च (for व्रजन्ति); च (for ते); व्रजन्तु मे( स्तु ते); (अ)व्रजंस्तथा , (दा)(for व्रजन्ति ते); नदीवस्य व्रजश्च ते; क्रमेणातीत्य यान्ति ते; .

(०२) (१) उत्तीर्य (for सं); शरयूं; (२) ततः (for दृष्ट्वा); पूर्वां च; पूर्वाश्च; सन्तीर्य; स(पू) र्वांश्च; पूर्वं च; पूर्वान्स (for पूर्वांश्च); कोसलां; कोश(ष)लान्(लां); कौशलां; कौसलं दशार्णांश्च सकौसलान्; (३) मिथिलां जग्मुः; विपुलां जग्मुः; (४) तथा; तदा (for नदीम्); पश्यन्ती विपुला (विविधा) नदीः (विपुलां नदीं); .

(०३) (१) सन्तीर्य; अतीत्य (for उत्तीर्य); गङ्गाशोण; भङ्गशोणं; गङ्गां शोणां; गङ्गां शोणीं; , (२) त्रयस्ते; तदा ते; सर्वे वै; ते तदा; अच्युताः(for सर्वे ते); (ऽ)वास्युखासू; तदा; स्त्रियः(for त्रयः); (३) कुरवोरच्छदं; कुशचीरच्छदा (च्छिदा; ह्रदं); कुश , (शा)म्वोरस्थलं; कुशस्थोरस्थलं; कुशांवोपस्थलं (ली) (for *कुरवोरश्छदं); रम्यं जनपदं (दो; द०)स्फीतं; (४) क्षत्रम्; जग्मुर् (for क्षेत्रम्); अच्युतः; अच्युतं; अव्यथाः; अक्षताः; अच्युत; अच्युताः; .

(०४) (१) ते सम्यगू; देशं च (तं)(for ते श्श्वद्); योजना (for गोधना); (२) अबुवतं; पशुमन्तं; मधुमन्तं (रं तं)(for अम्बूमन्तं); शुभप्रदं; शतद्रुमं; शुभं ततं; (३) जा , (गो)रूथं; गोव्रजं (वृकं) (for गोरथं); आरुह्य (for आसाद्य); जरासन्धवध (वध); राजसूय जरासन्धवध; कृष्णपाण्डवमागधयात्रा; जरासन्धो मागधपुरदर्शनं; गिरिव्रजप्रवेशः.

(०५) श्रीवासुदेवः; श्रीकृष्ण उं; श्रीभगवान्; भगवान् (for वासुदेव उं); (१) महाबाहो; महान्भाति; महास्वादुः; (२) इत्यमंशुमान्; इति बन्धुमान्; नित्य०मंशुमान्; मम्बुवान्; (३) निरामयः; अनामयः; प्रवेश्माढयो; सुवेशाढयो; सुवेश्माद्यो; द्यैर्; सुवेषाढयो; (४) मागधे; .

**पुष्पौषधिफलोपतो धनधान्यसमृद्धिमान् ।***

**वैहारो विपुलः शैलो वराहो वृषभस्तथा ।**
**तथा ऋषिगिरिस्तात शुभाश्चैत्यकपञ्चमाः ।। ३३ ।।(०१)**

**एते पञ्च महाशृङ्गाः पर्वताः शीतलद्रुमाः ।**
**रक्षन्तीवाभिसंहत्य संहताङ्गा गिरिव्रजम् ।। ३४ ।।(०२)**

**संहता गिरिषु व्रजं; पुष्पवेष्टितशाखाग्रैर्गन्धवद्भिर्मनोहरैः ।**
**निगूढा इव लोध्राणां वनैः कामिजनप्रियैः ।। ३५ ।।(०३)**

**यत्र दीर्घतमा नाम ऋषिः परमयन्त्रितः।* (०४)**

**औशीनर्यामजनयत्काक्षीवाद्यान्सुतान्मुनिः ।(०५)**
**गौतमः प्रणयात्तस्माद्यथासौ तत्र सद्मनि ।। ३७ ।।(०६)**

---

(०१) (१) विहारैर्विमलैः; विहारो विपुलः; वैहारविपुलः; स वै सो विपुलः; वैराहो वि; (२) वरोयं; वराह०; वेगहा; वाराहो; वरार्हो (for वराहो); ऋषभस्तथा; (३) तथैवर्षगिरिस्तात; तथैवार्थगिरि; ऋषिगिरि; तथैव गिरय; तथैव निरय; तथा वर्षगिरि(गिर); तथैवर्क्ष , (क; क्ष)गिरि; (४) पञ्चका (for पञ्चमाः); .

(०२) (१) शती०(for महा); (२) शीतमारुताः(for शीतलद्रुमाः); (३) क्षरन्ति (for रक्षन्ति); रक्षन्ति चाभि(पि)संह (हृ; ग)त्य; रक्षन्तो वाभिसं; रक्षन्ति वार्भिः सं; रक्षन्ति वाभि , (संहत्य); रक्षन्ति तात सम्भृ(बृ)त्य; रक्षन्ति च आहत्य; (४) संहताङ्गो; संहिताङ्गा; संहताश्च; संहतास्ते; स(सं)हिता वै; सङ्गताश्च (for संहताङ्गा); .

(०३) (१) शाखाग्रैर; (२) हरैः(for रमैः); (३) निगूढम्; निगूढाव्; निग्रन्ध; रोध्रणां; , (४) बलैः; वनं (for वनैः); .

(०४) (तत्र (for यत्र); ऋक्षः(for ऋषिः); ) शूद्रायां गौतमो यत्र महात्मा संशितव्रतः ।.

(०५) (१) शूद्राणां; शूद्रां तु; समु(तस्थो) त्पन्नस्तु (स्म)शू(भ)द्रायां; समुत्पाद्य स्वमा(जा)यायां; (२) गौतमः; गौतमान् (for महात्मा); शंसित(ते)व्रतः; संशि० सुशुभं; गौतमाद्यान्छुभावृताः; (३) उशी० (for औशी); उशीर्या० अनयामास; (४) काक्षिवादीन्; काषीवादीन्; का(क)क्षीवाद्यान्; मुनिः(प्रतिः)(for ऋषिः); पुत्रान्क , (न्का)क्षीवदा(ता)दिकान्; .

(०६) (१) गौतमो क्षयणाद्; मक्षयणात्; कारणात्; कृपणात्; मस्य क्षयात्; मः(म) प्रणयात्; मस्याज्ञया (for गौतमः क्षयणाद्); तस्माद् ( तस्या)(for अस्माद्); , (२) यथावत्; यथासौ; अयासीद् (for अथासौ); भद्र; अत्र (for तत्र); सद्मनि; समुनि; स मुनिः(for वेश्मनि); .

भजते मागधं वंशं स नृपाणामनुग्रहः(हात्) ।। ३८ ।।[०१]

अङ्गवङ्गादयश्चैव राजानः सुमहाबलाः ।
**गौतमक्षयमभ्येत्य रमन्ते स्म पुरार्जुन ।। ३९ ।।[०२]**

वनराजीस्तु पश्येमाः पिप्पलानां मनोरमाः ।
**लोध्राणां च शुभाः पार्थ गौतमौकःसमीपजाः ।**
**पुन्नागानां नगानां च गौतमौकस्समीपतः ।। ४० ।।[०३]**

अर्बुदः शक्रवापी च पन्नगौ शत्रुतापनौ ।
**स्वस्तिकस्यालयश्चात्र मणिनागस्य चोत्तमः ।। ४१ ।।[०४]**

स पारिरिहार्यो मेध्यानां मागधोयं मणेः कृते ।
**कौशिको मणिमांश्चैव चक्राते चाप्यनुग्रहम् ।। ४२ ।।[०५]**

**लक्षालङ्कारः-स पारिहार्य इत्यत्र स मागधो देशः मणेः कृते मेध्यानां ऋष्यादीनां पारिहार्यः**

---

(०१) (१) मानवं; माधवं (for मागधं); वंशे; वर्धते मागधो वसः; , (२) अनुग्रहः; हा (for ग्रहात्);

(०२) (१) अङ्गा (for अङ्ग); वङ्ग(वङ्क)मुखा (for वङ्गादय); (२) भूमिपाः(for राजानः); सुह्मकास्तथा; सुमहद्बलाः; च महाबलाः; (३) आसाद्य (for अभ्येत्य); गौतम० क्षमयत्यत्र; क्षयं गृहं; (४) रमन्ते हि; रमन्ति स्म; रमन्तेत्र; रमन्तोद्य; सहा(ततो०; सदा)र्जुन; मुदार्जुन; .

(०३) (१) वनराजिः; तु पश्यामः; च पश्येमाः; प्रियाला(ला)नां (च पश्याम); (२) पिप्पलानां; सलानां च (for प्रियालानां); रमा (for रमाः); (३) लोध्राणि; शुभः; क्षुभां; शुभा (for शुभाः); महापार्कं(र्थ); राजत्रजीवलोचन । पुंनागानां नगानां च; * , (४) गौतमोकः; मौक; समीपगाः; समीपतः; .

(०४) (१) मर्बुदः; अम्बुदः(दाः)(for अर्बुदः); शत्रुवापी; शत्रुतापी(पि); शक्रतापी; शत्रुताही; शक्रवापि; शुकवापी; शक्रवासी; चक्रवापी; चश्शवापी (for शक्रवापी); (२) शक्रवाहनौ; शत्रुतापिनौ; (३) स्वस्तिकः श्यालयशू; कार्यलयशू; कश्वालयशू; तत्र; चाथ; चायं (for चात्र); (४) माणिनागस्य; मणिनामस्य(नागस्य); मनागस्त्वस्य चोत्तमः; .

(०५) (१) परिहाय न; अपरी(री)हार्य; अपरिहर्य; अपरि(री)हार्यं; अपरिहार्याश्च; अवा , (पा)रिहार्यो; अपरिहार्यौ च; सपारिहार्यौ; पारिहार्यो (for अपरिहार्या); ननु गां; मेध्यानां (for मेघानां); (२); मागधेय०; मा (म)गधोयं; मागधो (देशः); मनःकृते; मणे कृते (०तेः); मणिकृते; महीपतेः(ते); महीपति (for मणेःकृते); मणेःमा(म)गधा मनुना (मुनिना)कृताः; मा(म)गधो

हारो विहारः परितो विहारयोग्यः । मणेः चिन्तामणित्वेन तन्निकटे दारिद्र्यादिदोषाभावादिति भावः ।

एवं प्राप्य पुरं रम्यं दुराधर्षं समन्ततः।*

पाण्डरे विपुले चैव तथा वाराहकेऽपि च ।
चैत्यके च गिरिश्रेष्ठे मातङ्गे च शिलोच्चये ।। ४३ ।।

एतेषु पर्वतेन्द्रेषु सर्वसिद्धमहालयाः ।
यतीनामाश्रमाश्चैव मुनीनां च महात्मनाम् ।। ४४ ।।

वृषभस्य तमालस्य महावीर्यस्य वै तथा।
गन्धर्वरक्षसां चैव नागानां च तथाऽऽलयाः ।। ४५ ।।

कक्षीवतस्तपोवीर्यात्तपोदा इति विश्रुताः ।
पुण्यतीर्थाश्च ते सर्वे सिद्धानां चैव कीर्तिताः ।। ४६ ।।

मणेश्च दर्शनादेव भद्रं हि शिवमाप्नुयात् ।। ४७ ।।(०१)

अर्थसिद्धिं त्वनुपमां जरासन्धोऽभिमन्यते ।
वयमासादने तस्य दर्पमद्य हरेमहि ।। ४८ ।।

---

मनुना कृतः( ताः); मनुनामागधाः कृताः; माधवो धर्मणेः कृते; मागधौ यमलौ कृते;

(३) कौशिको हिमणि(मुनि)श्चैव; को मणिमांश्चापि; शेषज(ज्ञ)श्च मणिश्चैव;

(४) चक्रातेचाप्यनुग्रहं; विदधाते (तो)अनु; कृतवन्ताव(म)नु; .

(०१) (सर्वे (for सर्व); माहा (for समा ); ०माणां च; मास्तत्र (for माश्चैव); र्वाप्सरसां (for र्वरक्षसां); पत्रगानां (for नागानां च); गन्धर्वराक्षसानां च सिद्धानां च महालयः; प्रसिद्धाश्चैव (for सिद्धानां चैव); शित्वमवा० (for हि शिवमा); )

(१) दैवं (इष्ट; देवं)(for अर्थं); च परमां; त्वनमां; धनवरं; तनुवरां; त्वनुपमां , (for त्वनपगां); (२) (ऽ)त्र मन्यते; (ऽ)नुम; हि मं; न मं; न्वम; विपद्यते (ऽ)००भिपद्यते; (ऽ)पि म; (ऽ)भि(पि)पत्स्यते (for ऽभिमन्यते); (३) साधने (for सादने); वयमासादयिष्यामो; मासाद्य चैतस्य; मासाद्य वै तस्य; मप्यासने तस्य; मासाद्य ते सर्वे; (४) पदम् (for दर्पम्); अस्य; तस्य (for अद्य); , (अ)पहर्महि; (अ)पहन्महि (हे); निहन्महे; हरेम हि; निहम्म्यहं; निहन्मि हि , (for निहन्म हि); दर्पान्निर्मध्य वै त्विह; .

वैशम्पायनः

एवमुक्त्वा ततः सर्वे भ्रातरो विपुलौजसः ।
वार्ष्णेयः पाण्डवौ चैव प्रतस्थुर्मागधं पुरम् ।। ४९ ।।(०१)

हृष्टपुष्टजनोपेतं चातुर्वर्ण्यसमाकुलम् ।
स्फीतोत्सवमनाधृष्यमासेदुश्च गिरिव्रजम् ।(०२)

पुरद्वारमपास्य त्वमद्वारेण प्रविश्य ते ।*
ततो द्वारमनासाद्य पुरस्य गिरिमुच्छ्रितम् ।। ५० ।।(०३)

बार्हद्रथैः पूज्यमानं तथा नगरवासिभिः ।(०४)
मगधानां सुरुचिरं चैत्यकान्तं समाद्रवन्।
यत्र माषादमृषभं तेनानार्घ्य बृहद्रथः ।। ५१ ।। (०५)

लक्षालङ्कारः-यत्र माषादवृषभम् इत्यत्र वृषभरूपी माषादनामकोऽसुरो माषादवृषभः।

तं हत्वा माषनालांश्च स्तिस्रो भेर्यश्चकार ह ।
अनडुच्चर्मणा तेन स्थापयामास वै पुरे ।। ५२ ।।(०६)

---

(०१) (१) मुक्तौ; मुक्तास् (for मुक्त्वा); नताः; तु ते (for ततः); सद्यो (for सर्वे); (२) भ्रातरौ; विपुलौजसौ; (३) वार्ष्णेन; कृष्णश्च; पाण्डवौ (वश्)चैव; (४) प्रस्थितौ; प्रस्थिता (for प्रतस्थुर्); वरं (for पुरम्); .

(०२) (१) तुष्पुष्य; हृष्टपुष्ट; हृष्टदुष्ट (for तुष्टपुष्ट); जनाकीर्णं (for जनोपेतं); (२) जनावृतं; विभूषुतं; समाकुलं; (३) स्थिरो; स्थितो (for स्फीतो); (४) स्ते , (for श्व); दुश्चरितव्रजं; .

(०३) (१) ततो (ते त(द्); ते तं; ते च; ते वै (for तेऽथ); समा(for अना); ते तदा द्वारमासाद्य; पुरमध्यं समासाद्य; (२) मुडिझतं; पूजितं (forमुच्छ्रितम्); .

(०४) (१) बार्हद्रथं; द्रथे; बृहद्रथै (for बार्हद्रथैः); पूज्यमाना; (२) नरैर् (for तथा); .

(०५) (१) मच्छादम्; मासादम्; मांसादम् (for माषादम्); माषाः(सा)दवृषभमू; मांसादमसुरम्; .

(०६)(३) माषनार्भौश्च; माष(मांस)तालाश्च; मां(मा)सनालाभिस्गौडपाठ मांसताला(नाना०; लाला) भिसू; मासतालाभिसू; मांषनाशश्च; माषनालेभ्यसू; माषनामानं; मांसनालीभिसू; माषनाला( शा०; ला)च्च; मांसनाले(ले)भ्यस् (for माषनालाश्च); मास तालः; (४) त्रयो भेर्यशू; त्रिस्रो भेर्यशू (for तिस्रो भेरीर्); चकार ह (सः)चकार; .

स्वपुरे स्थापयामास तेन चानह्य चर्मणा ।
यत्र ताः प्राणदन् भेर्यो दिव्यपुष्पावचूर्णिताः ।। ५३ ।।(०१)

लक्षालङ्कारः-भेर्यः त्रिभिरेतैः ताडितास्तिस्रो भेर्यः प्राणदन् । . तम् माषादं हत्वा माषनालान् शृङ्गद्वयकण्ठनालाख्यान् त्रीन्नालान् तेन चर्मणा आनह्य बद्ध्वा तिस्रो भेर्यः यथा भवन्ति तथा चकार ।

भङ्क्त्वा भेरीत्रयं तेऽपि चैत्यप्राकारमाद्रवन् ।
द्वारतोऽभिमुखाः सर्वे ययुर्नानाऽऽयुधास्तदा।*
घोरनादं नदन्त्येते परचक्रागभे सदा ।
श्रुत्वा नादं महाघोरं गिरिव्रजनिवासिनः।* (०२)

मागधानां सुरुचिरं चैत्यकं तं समाद्रवन् ।
शिरसीव समाघ्नन्तो जरासन्धं जिघांसवः ।। ५४ ।।(०३)

लक्षालङ्कारः-मागधानां सुरुचिरम् इत्यत्र 'चैत्यकं बद्धमूलं स्यात्' इत्यभिधानात् चैत्यं बद्धमूलं द्रुमं, जरासन्धजिघांसवः ते कृष्णाद्याः शिरसि जरासन्धशिरसि जिघासन्त इव घातं कुर्वन्त इव ।

स्थिरं सुविपुलं शृङ्गं सुमहत्तत्पुरातनम् ।
अर्चितं गन्धमाल्यैश्च सततं सुप्रतिष्ठितम् ।(०४)

---

(०१)(१/२) अनाह्य; विनह्य; अ(ड)वनह्य; अनडुचू; आनस्य; अवनह्य; कर्मणा; अवनह्य च नादेन; वै (for स्वे); वै पुरा; चैत्यके (for स्वे पुरे); स्वपुरे , (स पुरा)स्थापयामास तेन चानह्य (चानघ; संनह्य) चर्मणा; (३) यततः; यत्र तान् (तां); प्रणदन्; प्रणुदन्; प्राणदं; (४) पुष्प०विभूषिताः; पुष्पाववर्णिताः; पुष्पावगुण्ठिताः; पुष्पैश्च चूर्णिताः; पुष्पाभि(व)पूजिताः; पुष्पावधूलिताः; अवचूर्णिताः.

(०२)(नानाविधास्; आत्तायुधौ (for नानायुधास्); ) .

(०३) (१) च सुचिरं; तु (for सु); (२) चैत्यकं तं (for च); चैत्रकान्तं; चैत्यं कान्तं; चैत्यकं ते; चैत्यं केतुं; चैत्यकाभ्रं (for चैत्यकान्तं); चैत्यकं; चैत्यं; चैत्यकं ते; अपाद्रवन्; महाद्रुमं (for समाद्रवन्); चैत्यैरुच्चसमाद्रवत्; चैत्रकं समुपाद्रवन्; चैत्यकान्तरमाद्रवन; (३) शिरांसीव; शरसीव; जरसीव; समाघ्नतो; तदा जघ्नुर्; (४) जरासन्धं जि; .

(०४) (१) स्थितं (for स्थिरं); लिङ्गं (for शृङ्गं); सुस्थिरं विपुलं श्रृङ्गं; (२) सुमहत्तत्पुरा; ; (३) अश्चितं

**विपुलैर्बाहुभिर्वीरास्तेऽभिहत्याभ्यपातयन्** ।। ५५ ।।(०१)

**लक्षालङ्कारः-द्रुमं गिरिं च विपुलैर्बाहुभिरभि(ह)हृत्य अभ्यपातयन्निति सम्बन्धः । माल्यदामैः माल्यानां मालायोग्यपुष्पाणां दामैर्दामभिः माल्यदामभिः ।**

ततस्ते मागधं हृष्टाः पुरं प्रविविशुस्तदा ।। ५६ ।।(०२)

दृष्ट्वा तु दुर्निमित्तं तद्ब्राह्मणा वेदपारगाः ।*(०३)

लक्षालङ्कारः- दृष्ट्वा इत्यत्र दुर्निमित्तं दुःखकारणं दुर्निमित्तात्मकं च तं शृङ्गद्रुमयोः पातम् ।

**शान्तिदानजपैर्होमैर्देवानप्रणियंस्तदा ।***

**एतस्मिन्नेव काले तु ब्राह्मणा वेदपारगाः ।**

**पर्यग्नि कुर्वंश्च नृपं द्विरदस्थं पुरोहिताः** ।। ५७ ।।(०४)

**लक्षालङ्कारः-पर्यग्नि कुर्वन् इत्यत्र परितः अग्निः नीराजनरूपोऽग्निः यथा भवति तथा कुर्वन् अकुर्वन् । मङ्गलारत्या सत्कृतवन्त इत्यर्थः । जरासन्धेन सह युयुत्सव इति सम्बन्धः ।**

**ततस्तच्छान्तये राजा जरासन्धः प्रतापवान् ।***

**दीक्षितो नियमस्थोऽसावुपवासपरोऽभवत् ।**(०५)

**नीराजयन्ति दीपस्तैं कालमृत्युहरजपः ।**

---

(for अर्चितं); माल्यगन्धैश्च; गधमाल्यैश्च; गन्धपुष्पाद्यैः; (४) सुकृतं (for सततं); .

(०१) (१) बहुभिर्; वारास्; चारात् (for वीरास्); (२) निहत्य; न्यपातयन्; (अ)भिदार; , (अ) भिपात; (अ)भ्यपालयन्; ते बलादभ्यताडयैन्; .

(०२)(३) विविशुर्; मागधान् (for मागधं); वीराः; हृष्टाः; द्रष्टुं (for दृष्ट्वा); (४) हृष्टाः; दृष्ट्वा(for पुरं); तद्विविशुस्; दैववशात् (for प्रविविशुस्); च ह (for तदा); प्रहृष्ट्वा राजमार्गतः; .

(०३)(अ)थ (for तु); दुर्निमित्तानि; त्तं तं (for त्तं तद्); .

(०४) (२) समर्थयन् (समर्थं कुर्वन् मन्त्रक्रियासामर्थ्यात्); पर्यन्; अदर्शयन् (for समर्चयन्) जरासन्धः प्रतापवान् (जरासन्धं समर्थयन्); जरासन्धपुरोहिताः; (३) क-परितस्स्तुवतो वीरं, पर्यङ्यकुर्वन्; स नृप; च तदा; नृपतिं (for च नृपं); पर्यङ्कर्षन्त नृपते; आरोप्य द्विरदश्रेष्ठं; (४) समन्त्री सपुरोहितः; द्विरदा (दे)स्थं पुरोहितः; समन्त्रिसपुरोहितं; दिरस्थं ते पुरो; द्विरथस्थं पुरो; गधमाल्यैरलङ्कृतं.

(०५) (स्थश्च (for स्थोऽसौ); ).

एतस्मिन्नेव काले तु कृष्णभीमधनञ्जयाः ।*

स्नातकव्रतिनस्ते तु बाहुशस्त्रा निरायुधाः ।
युयुत्सवः प्रविविशुर्जरान्धेन भारत ।। ५८ ।।(०१)

लक्षालङ्कारः-जरासन्धेन सह युयुत्सव इति सम्बन्धः

पश्यन्तः पुरसौभाग्यमूर्जितां च पुरश्रियम् ।।*(०२)

भक्ष्यमाल्यापणानां च ददृशुः श्रियमुत्तमाम् ।
स्फीतां सर्वगुणोपेतां सर्वकामसमृद्धिनीम् ।। ५९ ।।(०३)

विपणिं रत्नवाससाम् । दिव्यनानापणानां च; *(०४)

तां तु दृष्ट्वा समृद्धिं ते वीथ्यां तस्यां नरोत्तमाः ।
राजमार्गेण गच्छन्तः कृष्णभीमधनञ्जयाः ।। ६० ।।(०५)

बलाद्गृहीत्वा माल्यानि मालाकारान्महाबलाः । (०६)

गृह्यं माल्यापणान्माल्यं बलाद्बलवतां वराः।

---

(०१) (१) स्नातका (for क); स्नातकप्रतिलिङ्गास्ते; (२) बहु; बाहुशास्त्रं; .
(०२) (३) महासत्वा; महाराज (for प्रविविशुर्); (४) पालिताः (for भारत); .
(०३) (१) भक्षमाल्या भक्षमाल्या; भक्ष्यमाल्या(ल्या) फलानां; माल्यापनानां; भक्ष्या माल्या; भक्ष्यभोज्या; तु (for च); .
(०४) (२) रत्नानां (for ददृशुः); श्रि(प्रि)यमुत्तमं; (३) पुरीं; स्थितां (for स्फीतां); गुणैर्युक्तां; गणो (for गुणो); (४) समृद्धिभिः; विवर्धिता; विवर्धिनी; .
(०५) (१) ततो दृष्ट्वा; तां च दृष्ट्वा; तं (तां)नु दृष्ट्वा; तां दृष्ट्वा सु०(स); दृष्ट्वा पुर; समृध्यन्ते; (२) वीर्यां (for वीथ्यां); तस्य; तस्या (for तस्यां); मेनिरे बलभित्पुरीं; (३) गच्छेतः; गच्छन्त; (४) पश्यन्तः परितः पुरीं; .
(०६) (१) सङ्गृह्य (for गृहीत्वा); गृह्य माल्यापणान्मा(णा मा)ल्यं; सङ्गृह्य त्वापणा , (णं)माल्यं; (२) माल्या(ला)गारान् (for मालाकारान्); च सर्वशः(for महाबलाः) बलाद्बलवतां वराः; .

कर्पूरशृङ्गं कोष्ठं च सफलं चान्तरापणे ॥ ६१ ॥(०१)

लक्षालङ्कारः- कर्पूरशृङ्गम् इत्यत्र शृङ्गं गोशृङ्गध्योद्धृतं गोरोचनम् ।

वैश्याद्बलाद्गृहीत्वा ते विहृत्य च महारथाः।*
विरागवसनाः सर्वे स्रग्विणो मृष्टकुण्डलाः ॥ ६२ ॥(०२)

निवेशनमथाजग्मुर्जरासन्धस्य धीमतः ।
गोवासमिव वीक्षन्तः सिंहा हैमवता यथा ॥ ६३ ॥(०३)

शालस्तम्भनिभास्तेषां चन्दनागुरुरूषिताः ।
अशोभन्त महाराज बाहवो युद्धशालिनाम् ॥ ६४ ॥(०४)

तान्दृष्ट्वा द्विरदप्रख्याञ्शालस्कन्धानिवोद्गतान् ।
व्यूढोरस्कान्मागधानां विस्मयः समपद्यत ॥ ६५ ॥(०५)

अद्वारेणाभ्यवस्कन्द्य विविशुर्मागधालयम् ॥ ६६ ॥ (०६)
अहङ्कारेण राजानमुपतस्थुर्गतव्यथाः ।(०७)

ते त्वतीत्य जनाकीर्णाः कक्ष्यस्थुर्महाबलाः ।

---

(०१) (भृङ्गं (for शृङ्गं); कुष्टं (for कोष्टं); पणात् (for पणे); कस्तूरीं कुङ्कुमं तथा; .

(०२) (१) तु (for ते); महापलां; बलाः; (२)पथात् (for रथाः); ) , (४) मणि (for मृष्ट); .

(०३) (१) मथो जग्मुर्; (२) पार्थिव (for धीमतः); (३) गो (गौ)वाटमिव; गोवाससह; गोलाटमिव; गोवासं; पश्यन्तः; (४) हैमवतस्तथा; वता तथा; वतांस्तथा; वतं तथा; .

(०४) (१) शल; शा(सा)ल (for शैल); सकाशास्ते; निभैस्तेषां; (२) चन्दनागरु; रूषिताः; (३) अशोभन्ताद्भुताकारा; (४) युद्धशालिनां; परिघोपमाः (for बाहु); .

(०५) (१) विप्रप्रतिमान् (for द्विरदं); (२) सालं; द्रमान् (for द्रतान्); (४) पद्यत (for जायत); .

(०६) (ण ह्यव० (for णाभ्यव); धाश्रय (for धालयम्); )
ते त्वतीत्य जनाकीर्णाः कक्षास्तिस्रो नरर्षभाः ।.

(०७) (१) न्वतीत्य; त्वमात्य; ह्यतीत्य; (२) तिस्रः कक्षा; कक्षा(क्ष्या; क्ष्थ)स्तिस्रो; कक्ष्या (क्षा) द्वाराणि; कक्षाः तिस्रःकश्चयौ नरोत्तम; (३) अपद्वारेण; अद्वारेण तु , (णौव)(for अहङ्कारेण); (४) गतव्यथाः; महारवाः (for महाबलाः); .

अद्वरेणौव राजानम् ङपतस्थुर्महाबलाः ।
भोशब्देनैव राजानमूचुस्ते तु महारथा ।। ६७ ।।(०८)

आयुष्मान्भव सौम्येति वदेद्विप्राभिवादने
विजयं बाहुजं ब्रूयाद्वैश्ये नष्ट इतीरयेत् ।
आरोग्यं पादजे ब्रूयाच्छत्रौ नोशब्दमीरे । (०९)
राजदत्तेष्वनर्घ्येषु न निषेदुस्तदासने ।
पादेनासनमाकृष्य तस्मिन्नुपविशेद्रिपुः ।
भूतले वाप्यनास्तीर्णे शत्रुवेश्मन्ययं क्रमः।*

तान्पाद्यमधुपर्कार्हान्गवार्हान्सत्कृतिं गतान् ।
प्रत्युत्थाय जरासन्ध उपतस्थे यथाविधि ।। ६८ ।।(१०)

उवाच चैतान्राजासौ स्वागतं वोऽस्त्विति प्रभुः ।
तस्य ह्येतद्भुतं राजन्बभूव भुवि विश्रुतम् ।। ६९ ।।(११)

लक्षालङ्कारः- तस्य ह्येतद् इत्यत्र एतत् एतेषां कृष्णभीमार्जुनानां आपणादिषु कृतचरित्रम्।

मौनमासीत्तदा पार्थभीमयोर्जनमेजय
तेषां मध्ये महाबुद्धिः कृष्णो वचनमब्रवीत् ।
वक्तुं नायाति राजेन्द्र एतयोर्नियमस्थयोः ।

(०८) (१) (तु (for (ए)व); स्तेन (for स्ते तु); महाबलाः; शुभाशिषा (for महारथाः); .
(०९) (२) (भो (for नो).
(१०) (१) पर्काभ्यां; पर्कार्हन्; पर्कार्घैर्; पर्कार्घ्य०; पर्काढ्यं; पर्केण (for पर्कार्हान्); तानर्घमधुपर्काघ;
(२) गामर्हान्; महार्हान्; समहान्; गवार्हान् (for मानार्हान्); सुकृतिं ग; सद्गतिं गतान्; सत्कृतिद्विजान्
(for सत्कृतिं गतान्); महा(गोर्हां) सत्कृतितां(मा)गतान्; हष्ट्वार्हान्गृहमागतान्;
(३) इत्यु (for प्रत्यु); महाराज , (for जरासन्ध); .
(११) (१) चैनान् (for चैतान्); वै (for (अ)सौ); उपस्थाय च राजासौ;
(२) यो (for वो); ब्रुवन् (for प्रभुः); .

अर्वाग्निशीथात्परतस्त्वया सार्धं वदिष्यतः।

यज्ञागारे स्थापयित्वा राजा राजगृहं गतः।

ततोऽर्धरात्रे सम्प्राप्ते यातो यत्र स्थिता द्विजाः ।।*[०१]

बार्हद्रथो वै राजेन्द्रो महाबलपराक्रमः ।*

स्नातकान्ब्राह्मणान्प्राप्ताञ्छ्रुत्वा स समितिञ्जयः ।
अत्यर्धरात्रे नृपतिः प्रत्युद्गच्छति भारत ।। ७० ।।

योषित्सङ्गगतोऽपि वा । श्रुत्वा समागतान्विप्रान्; * [०२]

तांस्त्वपूर्वेण वेषेण दृष्ट्वा स नृपसत्तमः ।
उपतस्थे जरासन्धो विस्मितश्चाभवत्तदा ।। ७१ ।।[०३]

ते तु दृष्ट्वैव राजानं जरासन्धं नरर्षभाः ।
इदमूचुरमित्रघ्नाः सर्वे भरतसत्तम ।। ७२ ।।[०४]

सत्वं तजो बलं धैर्य गाम्भीर्यमिव मूर्तिमान् ।।*[०५]

राजन्विद्ध्यतिथीनस्मानर्थिनो दूरमागतान् ।

तन्नः प्रयच्छ भद्रं ते यद्वयं कामयामहे ।

किं दुर्मर्ष तितिक्षूणां किमकार्यमसाधुभिः ।

किमदेयं वदान्यानां कः परः समदर्शिनाम् ।

---

(०१) (३) एतद्व्रतं सदा तस्य; तस्य ह्येतद्;
(४) बलस्य (for बभूव); किल; मुनि० , (for भुवि); विश्रुतः; .

(०२) (१) सादरः(for भारत); . (१)प्रा(प्र)ज्ञान्; ज्ञा(म)त्वा (for प्राप्तान्);
(२) ज्ञात्वा स; सदा स; सम्प्राप्तान्;

(०३) (१) वेशेन; सन्दृष्ट्वा (for वेषेण); (२) स नृप (for नृपतिं); गाम्भीर्यात्सागरोपमः , (४) सोभवत् (for चाभवत्); .

(०४) (१) तं (for ते); (ऽ)पि (for तु); (२) नरर्षभ; नराधिप(पाः); निस्तरङ्गमिवार्णवं; .

(०५) (पं -४) सत्तमाः; सत्तमः त्रयो यादवकौरवाः

योऽनित्येन शरीरणे सतां गेयं यशो ध्रुवम् ।
नाचिनोति स्वयं कल्पः स वाच्यः शोच्य एव सः ।
हरिश्चन्द्रो रन्तिदेव उञ्छवृत्तिः शिबिर्बलिः ।
व्याधः कपोतो बहवो ह्यधुवेण ध्रुवं गताः ।*

स्वस्त्यस्तु कुशलं राजन्निति तत्र व्यवस्थिताः ।
तं नृपं नृपशार्दूल प्रेक्षमाणाः परस्परम् ।। ७३ ।।(०१)

तानब्रवीज्जरासन्धस्तथा पाण्डवयादवान् ।
आस्यतामिति राजेन्द्र ब्राह्मणच्छद्मसंवृतान् ।। ७४ ।।(०२)

अथोपविविशुः सर्वे त्रयस्ते पुरुषर्षभाः ।
सम्प्रदीप्तास्त्रयो लक्ष्म्या महाध्वर इवाग्नयः ।। ७५ ।।(०३)

स्वरैरैकृतिभिस्तांस्तु प्रकोष्ठैर्ज्याहतैरपि।
राजन्यबन्धून्विज्ञाय दृष्टपूर्वानचिन्तयत् ।
राजन्यबन्धवो ह्येते ब्रह्मलिङ्गानि बिभ्रति ।
ददामि भिक्षितं तेभ्य आत्मानमपि दुस्त्यजम् ।
बलेर्न श्रूयते कीर्तिर्वितता दिक्षु सर्वतः ।
ऐश्वयार्द्भ्रंशितश्चापि विप्रव्याजेन विष्णुना ।

---

(०१)(२) इति तत्र; इत्युक्तवा ते (for इति सर्वे); (३) ते (for तं); पुरुषव्याघ्रा( ०घ्र; विस्मयाविष्टा) (for नृपशार्दूल); (४) विप्रेक्षं (क्ष)त; विद्रैक्षन्त; विप्रैक्षन्तं; विप्रेक्षन्तः; प्रेक्षा(क्ष्य)माणाः; विप्रक्षन्त; प्रपश्यन्ति (for विप्रैक्षन्त); नरर्षभाः(for परस्परम्); .

(०२) (२) तथा (for तदा); पाण्डवयादवान्; पश्यन्नापादमस्तकं;
(३) राजेन्द्रो; (४) ब्राह्मणान् (for ब्राह्मण); .

(०३)(२) ततस्ते (स्तु); यत्र ते (for त्रयस्ते); भरतर्षभ(भाः); केवले स्थले; पुरुषर्षभ; , (३) सम्प्रदीप्तास्त्वयो लक्ष्म्या; त्रयो लक्ष्म्या सम्प्रदीप्ता; ०प्तास्त्रयो देवा; साःसमं(समा) लक्ष्म्या; सहैव दीक्षितं लक्ष्म्या; ०प्ताः समालक्ष्या.

श्रियं जिहीर्षतेन्द्रस्य विष्णवे द्विजरूपिणे ।
जानन्नपि महीं प्रादाद्वार्यमाणोऽपि दैत्यराट् ।
विजिता ब्राह्मणार्थाय को न्वर्थः क्षत्रबन्धुना ।
देहेन तपमानेन नेहेत विपुलं यशः ।
इत्युदारमतिः प्राह कृष्णार्जुनवृकोदरान्।
हें विप्रा व्रीयतां कामो ददाम्यात्मा शिरोऽपि च ।*

तानुवाच जरासन्धः सत्यसन्धो नराधिपः ।
विगर्हमाणः कौरव्य वेषग्रहणवैकृतान् ।। ७६ ।।[०१]

हरिमिन्द्रं समीरं च लीलामानुषविग्रहान् ।।*[०२]

न स्नातकव्रता विप्रा बहिर्माल्यानुलेपनाः ।
भवन्तीति नृलोकेऽस्मिन्विदितं मम सर्वशः ।। ७७ ।।[०३]

के यूयं पुष्पवन्तश्च भुजैर्ज्याकृतलक्षणैः ।
बिभ्रतः क्षात्रमोजश्च ब्राह्मण्यं प्रतिजानथ ।। ७८ ।।[०४]

कृतश्मश्रुमुखा रक्ता रक्ततीक्ष्णनखाङ्कुराः ।
रक्तोष्णीषधरा रक्तदन्तपङ्क्तिविराजिताः ।।*[०५]

---

(०१)(२) जनाधिपः; सत्यसन्धा जयं मृधे; .

(०२)(३) कौरव्यं; व्यः; व्ये; व्यान्; (४) वेस; वेग; वेश; धारणं; कारणं; कारकं; वैकृतान् (तात्); सम्भृतान्; संवृतान्; धारणां; वेषविग्रहधारणं; .

(०३) (१) जरासन्ध उ; व्रते (for व्रता); (२) बर्हमा (for बहिर्मा); (३) त्रिलोकेस्मिन्; नृपो लोके (for नृलोकेऽस्मिन्); तथाभूता हि लोकेस्मिन्; क्षत्रिया इव लोकेषु; क्षत्रिया एव लोकेस्मिन्; भवन्तीतीन्द्रलो; (४) विदिता (for तं); साम्प्रतं (for सर्वशः); .

(०४) (१) के (for ते); वै वपुष्मन्तो; माल्यवन्तश्च; पुष्पमन्तश्च; (२) र्व्यायतलक्षणैः; ज्याकृतल०; ज्याघात (ज्याकिण)कर्कशैः; ज्यातललक्षणैः; भुजा ज्याधात०लक्षणाः; .

(०५)(३) बिभ्रन्तः; क्षत्रम्; (४) व्यमिह संशयं; ण्यमिह शंसथ; .

एवं विरागवसना बहिर्माल्यानुलेपनाः ।(०१)
**क्षत्रिया एव लोकेऽस्मिन्विदिता मम सर्वशः ॥ ७९ ॥(०२)**

सत्यं वदत के यूयं सत्यं राजसु शोभते ॥ ८० ॥

**इयं वसुमती सत्यं सत्यरूपा महीक्षितः ।**

**सत्ये स्थितो वदेत्सत्ययन्यथा विनशिष्यति ।**

चैत्यकस्य गिरेः शृङ्गं भित्त्वा किमिह छद्मना ।
**अद्वारेण प्रविष्टाः स्थ निर्भया राजकिल्बिषात् ॥ ८१ ॥(०३)**

**सोऽहं न भवतां शत्रुब्राह्मणा मम देवताः ।**

**अताडयत किं भेरीर्युद्धसंनाहलक्षणाः ।(०४)**

वरध्वमविचार्यं च ब्राह्मणस्य विशेषतः ।
**कर्म चैतद् द्विलिङ्गस्य किं वोऽद्य प्रसमीक्षितम् ॥ ८२ ॥(०५)**

**लक्षालङ्कारः-वरध्वमविचार्यम् इत्यत्र वरध्वं वरयध्वम् । कर्म चैतत् इत्यत्र द्विलिङ्गस्य द्वयोर्ब्रह्मक्षत्रयोलिङ्गं यस्य तस्य ।**

एवं च मामुपास्थाय कस्माच्च विधिनार्हणाम् ।

---

(०१) (२) ब्रर्हमा; बर्हिमा०(for बहिर्मा); लेपनैः(for लेपनाः); .

(०२)(४) साधुषु (for राजसु); शोभनं; सेवते (for शोभते); सत्यं नाम सुशोभनं; .

(०३) (१) चैत्य(त्र)कस्य; गिरौ (for गिरेः); (२) छित्वा; क्रान्त्वा (for भित्त्वा); समुपसर्पथ; किमिव सर्पथ; किमिह (for व); छद्मना; किमुप०सर्पत; किं मम सद्मनि( गाः; नः); (३) अध्वरेण (for अद्वारेण); च; स्थो; तु; हि (for स्थ); .

(०४)यूयं मया न योद्धव्या; * , (४) निर्बधा; निर्भयं; राजकिल्बिषं; किल्विषात्.

(०५) (१) कर्मचैत(व)द्विलिङ्गस्थं(त्वं); कर्म वैतद्वि(चैतद)लिङ्गस्य; कर्म चैतद्विलम्ब्यं वः; कर्मैः(किमे) त(तं) द्विजलिङ्गस्य; कर्म चैतद्विजलिङ्गस्य; कर्म चैतस्य लिङ्गस्य; विलिङ्गस्थं; ०द्विलिङ्गस्य (द्वयोः ब्रह्मक्षत्रयोर्लिंगं यस्य तस्य); (२) चाद्य; मेद्य; वोद्य; चा(वो; वा)न्यत्; वात्र (for वाद्य); समभाषितुं; प्रसमीक्षिते; मीक्ष्य तं; पृथिवीक्षितः; किमु वोथ समीक्षितं; (३) अवधू; वद त्वं; वदस्व०; बाहुवीर्यं; क्षात्रवीर्यं(र्याशू); वा विचार्य; वाचा वीर्यं; वरध्वमविचार्यं हि (for च); ब्राह्मणस्य; ब्राह्मण्यं च; विनिश्चितं; च नो हृदि; .

प्रतीतां नानुगृह्णीत कार्यं किं वास्मदागमे ।। ८३ ।।(०१)

लक्षालङ्कारः-अस्मदागम इत्यत्र अस्मदागमे अस्मान् प्रत्यागमे ।

एवमुक्ते ततः कृष्णः प्रत्युवाच महामनाः ।
स्निग्धगम्भीरया वाचा वाक्यं वाक्यविशारदः ।। ८४ ।।(०२)

श्रीकृष्णः

स्नातकव्रतिनो राजन्ब्राह्मणाः क्षत्रिया विशः ।
विशेषनियमाश्चैषामविशेषाश्च सन्त्युत ।। ८५ ।।(०३)

स्नातकान्ब्राह्मणान्राजन्विध्यस्मांस्त्वं नराधिप ।।*

विशेषवांश्च सततं क्षत्रियः श्रियमृच्छति ।
पुष्पवत्सु ध्रुवा श्रीश्च पुष्पवन्तस्ततो वयम् ।। ८६ ।।(०४)

क्षत्रियो बाहुवीर्यस्तु न तथा वाक्यवीर्यवान् ।
अप्रगल्भं वचस्तस्य तस्माद्बार्हद्रथेरितम् ।। ८७ ।।(०५)

लक्षालङ्कारः-क्षत्रियो बाहुवीर्य इत्यत्र तस्य क्षत्रियस्य । तस्मात् क्षत्रियाणामप्रगल्भवचनत्व

---

(०१) (१) समुपस्थाय; ममुपा; एवं मां समुप(पा)स्थाय; (२) न्न; त्तु; द्वा; ०द्वै (for च्च); र्हणात्; र्हणं; (णं); (३) प्रणीतां (तं) मे न (नु) गृह्णीत (थ); तमेतद्गृह्णी(ही)त; तां नानुग्!ह्णीत (ध्वं); तं नानुगृह्णीथ; प्रीणतां नानुगहीत; प्रणीतमेमन्गृह्णित; तां नोप(व)गृह्णीत; (४) च; वा; तु; नु (for च); कार्यमागमने च (नेन)किं; अस्मदागमे; .

(०२) (१) मुक्ते ततः; मुक्तवतः (for मुक्तस्ततः);
(२) त (त्व)मु (for प्रत्यु); यशाः , (for मनाः); (४) विशारदं; .

(०३) (१) स्नातका व्र; सन्ति (for राजन्); (३) विशेषा (for विशेष); चैवम् (for चैषाम्);
(४) विशेषांश्चेह (for अविशेषाश्व); स च्युतः; सन्तत (for सन्त्युत);
विशेषाश्च भवन्त्युत; अविशेषाः कृष्ण उ; कृष्ण उ .

(०४) (१) विशेषतश्च (स्तु); नियतं; नियमं (for सततं); विशेषवान्; (२) मृच्छति,; मिच्छति (सि); मर्हति (मर्छति); (३) माल्य (for पुष्प); लक्ष्मीं (for श्रीश्च); ० , (४) माल्य (for पुष्पं); .

(०५) (१) र्थश्च; र्यो हि,; र्यं तन्; (२) वाचि (for वाक्य); न तु वाक्ये स वीर्यवान्; वाक्यवीर्यो न वै तथा; (३) अप्रगल्लं; अप्रलम्भ,; अप्रलम्भं; (४) द्रथे स्थितं; द्रथे श्रुतं; द्रथेप्सितं; द्रथेरितं; .

ाात् हे बार्हद्रथ तव ईरितमपि अप्रगल्भमिति पूर्वपदावृत्त्या योजना।

स्ववीर्यं क्षत्रियाणां तु बाह्वोर्धाता न्यवेशयत् ।(०१)
**तद्दिदृक्षसि चेद्राजन्द्रष्टास्यद्य न संशयः ।। ८८ ।।(०२)**

अद्वारेण रिपोर्गेहं द्वारेण सुहृदो गृहान् ।
**प्रविशन्ति नरा धीरा द्वाराण्येतानि धर्मतः ।। ८९ ।।(०३)**

कार्यवन्तो गृहानेत्य शत्रुतो नार्हणां वयम् ।
**प्रतिगृह्णीम तद्विद्धि एतन्नः शाश्वतं व्रतम् ।। ९० ।।(०४)**

जरासन्धः

न स्मरामि कदा वैरं कृतं युष्माभिरित्युत ।
**चिन्तयंश्च न पश्यामि भवतां प्रति वैकृतम् ।। ९१ ।।(०५)**

**वैशम्पायनः**

**एवमुक्तो भगवता वृहद्रथसुतो बली ।**

**आत्मन्यौत्सुक्यमालोक्य कृष्णमाह नृपोत्तमा ।**

---

(०१) (१)क- सक्क वीर्यं । अ- स्वनीर्यं। तु (for च); स्वयं वीर्यं क्षत्रियाणां; (२) बाहोर् (for बाह्वोर्); न्यवेशयन्; ०दयत्; .

(०२) (१) तद्य द्दक्ष्यसि,; तन्नो द्रक्ष्यसि (for तद्दिदृक्षसि); चेदद्य (for चेद्राजन्) तन्द्रक्ष्यचेतद्राजन्; (२) दृष्ड्वास्थद्य; दृक्ष्यस्थद्य; द्रष्टासीह; स्येह; स्याद्यः; दृष्ड्वा सद्य ; मष्टा ह्यत्र; द्रष्टा ह्यद्य; नृत्ता ह्यत्र (for द्रष्टास्यद्य); संशयं; .

(०३) (१) अवारेण; गृहं; (२) गृहान् (for गृहम्); (३) नरा वीरा; नरा धीराः; सदा द्वारं (for सदा सन्तो); (४) द्वारं; ते (for नो); तदा (for तत); द्वारमात्मन वेस्म हि,; द्वारमा(०मारु)जनयन् स्म हि,; द्वारमारुजय स्म हि; द्वाराण्येतानि धर्म( सर्व)तः (नीतिशास्त्रविशारदाः); द्वारं नोपजितं ततः; .

(०४) (१) गृहान्येत्य (ता); ग्रहण्येत्य,; गृहाण्ये; गृहाणे; (२) नार्हणा,; ०णं; (३) प्रतिगृह्णी(०ह्णा) महे (म हे) राजन्; (४) ह्येतन्नः; राजन्नः; नैतन्नः(for एतन्नः); इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि जरासन्धवधपर्वणि कृष्णजरासन्धसंवादे जतसन्धवध( वध); कृष्णजरासन्धसंवाद,; कृष्णार्जुनभीमसेना जरासन्धनिकेतनप्रवेशः ; जरासन्धदर्शनं; .

(०५) (१) स्मरामि; स्मरेहं (for स्मरेयं); (२) इति ०रप्युत; ०रच्युत; रित्यत (for रित्युत); (३) यश्च च; (for यश्च न); (४) भवतः; भवन्तं (for भवतां); वैकृतं प्रति; .

वैकृते चासति कथं मन्यध्वं मामनागसम् ।
अरिं वै ब्रूत हे विप्राः सतां समय एष हि ।। ९२ ।।(०१)

लक्षालङ्कारः-वैकृते चासति इत्यत्र विरुद्धं कुर्वन् विकृत् विकृतो भावः वैकृतं वैरमित्यर्थः। सतां समय एष हि इत्यत्र एष हि वक्ष्यमाणो हि ।

अर्थधर्मोपघाताद्धि मनः समुपतप्यते ।
योऽनागसि प्रसृ(स)जति क्षत्रियो हि न संशयः ।। ९३ ।।(०२)

लक्षालङ्कारः-योऽनागसि इत्यत्र यः क्षत्रियः अपि अन्योऽपि अनागसि प्रसृजति आगसि न प्रसृजति तस्मात् अर्थधर्मोपघातात् अर्थधर्मयोरुपघातो यस्मात्स तथोक्तः तस्मात्पुरुषात् मनः समुपतप्यते । एष सतां समय इति पूर्वेणान्वयः।

क्षत्रिया एव लोकेऽस्मिन्विदितं मम सर्वशः*

अतोऽन्यथा चरँल्लोके धर्मज्ञः सन्महारथः ।
वृजिनां गतिमाप्नोति श्रेयसोऽप्युपहन्ति च ।। ९४ ।।

लक्षालङ्कारः-अतोऽन्यथा इत्यत्र लोकधर्मज्ञः महाव्रताश्च सन् पुरुषः अतः स्वविहितस्वभावात् अन्यथा वैपरीत्ये आचरन् ।

क्षत्रिया एव लोकेऽस्मिन् विदितं मम सर्वशः।(०३)

---

(०१) (१) विकृते; वैकृतं; वा; च (२) मन्यध्वे (for ध्वं); मामनागतं; मां; (मा; वा); कृतागसं; (३) अद्य; सत्यं (for अरिं); वै (for वि); ब्रूत; ब्रुवतो विप्राः; (for ब्रूत तद्विप्राः); विप्राः स्मो (for तद्विप्राः); मां हे; वै; तद्; अरिवद्वतू यद् (मा); विप्राः(४) स्यान्मे; (ऽ)सतां (for सतां); संशय; असम (for समय); एव (for एष); किं (for हि); .

(०२) (१) अर्थ; अथा; अर्ध; कथं (for अथ); धर्मापघाताद्धि; (२) मनः; सम्परि (समनु) तप्यते; मनः; समुपपद्यते; अनर्थ उप; (०र्थमुप) पद्यतेः; अनर्थः; समुपद्यते; (३) क-प्रसृजति क्षत्रियो वीर्यमुज्क्षितम् । अ- प्रसृजति क्षत्रियोऽपि न संशयः । नायोगसि; येनागसि; एनागसि; योगसिद्धि; ˙जने विप्रः; प्रसृजसि; प्रसजति; प्रसृजति; प्रतिसृजेत्; (४) (हि; (ऽ) सौ (for ऽपि); धार्मिकः (for संशयः); वीर्यऋद्धितः; स विन०श्यति; वार्यमुत्थितः; (for ऽपि न संशयः); .

(०३)ततो (for अतो); चरं लोके; आचरन्; (२) धर्मतश्च; धर्मजः स (for धर्मज्ञः सन्); सु० स (for सन्); सन्; ( ००सत्पुरुपः००); महाव्रतं; महारथः; (थाः); महाबलः; वृजिनं सोपि सम्प्राप्य; (४)

त्रैलोक्ये क्षत्रधर्माद्धि श्रेयांसं साधुचारिणाम् ।

नान्यं धर्मं प्रशंसन्ति ये च धर्मविदो जनाः ।

तस्य मेऽद्य स्थितस्येह स्वधर्मे नियतात्मनः।* (०१)

अनागसं प्रजानां च प्रमादादिव जल्पथ ।। ९५ ।।(०२)

लक्षालङ्कारः-त्रैलोक्य इत्यत्र क्षत्रधर्मान्निमित्तात् श्रेयासं श्रेष्ठं मां अनागसं प्रजानन्तः प्रमादात् इति उक्तप्रकारेण जल्पथ ।

श्रीकृष्णः

कुलकार्यं महाबाहो कश्चिदेकः कुलोद्वहः ।

वहते यस्तन्नियोगाद्वयमभ्युद्यतास्त्वयि ।। ९६ ।।(०३)

त्वया चोपहृता राजन्क्षत्रिया लोकवासिनः ।

तदागः क्रूरमुत्पाद्य मन्यसे किमनागसम् ।। ९७ ।।(०४)

---

श्रेयास्यभ्यु (०भ्य०; ; प्यु); पहन्ति च; श्रेयसो व्य; (भ्यु नु; ह्यु); पहन्ति च (यः); प्युपहन्यते; . (०१)(क्षत्र० (for ये च); मे सुस्थि; सत्ये स्थि०; (for मेऽद्य स्थि); स्वधर्मनियता; ) , (३) अनागसि; सः; प्र (प्रा)युजानाः; , (नः); प्रजानां० च; ०नाश्च; नन्तः; ०नाथं; नां हि, प्रजानाना इति मौलिकः; पाठः; प्रजानन्यामिति पाठे तु प्रजानन्निति मां ब्रूथेति शेषः; (४) प्रमदादिव; मन्यथ (for जल्पथ); प्रमादाद्; जल्पथ; .

(०२) (१) त्रैलोक्य०; क्षत्रधर्माश्च; क्षात्रधर्माद्धि; क्षत्रधर्मो हि; क्षत्रधर्मा नि; (त्रि?) मित्तात्; क्षात्रधर्मे वर्तमानः; (२) श्रेयसां; श्रेयान्वै; (मां); धर्मचारिणां (णं); साधु चारिहन्; ; चारिणः; चा(का)रिण; ०नाकरं; .

(०३) कृष्ण (श्री); उं ( उ); श्रीवासुदेव उ; श्रीभगवान्; (१) कुले कार्ये (for कुलकार्य); महाबाहो; राजः (for राज); (२) ०देष (for ०देकः); कुरूद्वह; ; कुलोद्वहं; (३) बिभर्ति (for वहते); तान् (for तन्); ०गाच; ०गार्थं; गाद्धि (for ०गाद्वै); अहते त्वयि निर्योगाद्; हतोतस्तन्नियोगाद्; वहते नस्त; (यस्त्व; यस्त); त्रियोगाद्; (४) मप्युच्छ्रितास्; मभ्युद्यतास्; मभ्युद्रतास् (for मभ्युत्थितास्; ); ततः; त्वयि; युधि (for त्रयः); .

(०४) (१) वयं; सर्वे (for त्वया); चापहता; चापहूता; चोपहता; उपकृताः; (२) विश्रुताः (for वासिनः); (३) तदाग्रे; ०मासाद्य (for मुत्पाद्य); (४) किमनागस; किं न; (नु); मागध; किं कथश्चन; (for किं त्वनागसम्); .

राजा राज्ञः कथं साधून्हिंस्यान्नृपतिसत्तम ।
तद्राज्ञः सन्निगृह्य त्वं रुद्रायोपजिहीर्षसि ॥ ९८ ॥(०१)

अस्मांस्तदेनो गच्छेद्धि कृतं बार्हद्रथ त्वया ।
वयं हि शक्ता धर्मस्य रक्षणे धर्मचारिणः ॥ ९९ ॥(०२)

लक्षालङ्कारः-अस्मांस्तदेन इत्यत्र बृहद्रथस्यापत्यं पुमान् बार्हद्रथिः तस्य सम्बुद्धिः हे बार्हद्रथे ।

तस्मादद्योपगच्छामः तव बार्हद्रथेऽन्तिकम्।*
मनुष्याणां समालम्भो न हि दृष्टः कदाचन ॥ १०० ॥(०३)

लक्षालङ्कारः-समालम्भः सम्यगालम्भनं हिंसा

स कथं मानुषैर्देवं यष्टुमिच्छसि शङ्करम् ।(०४)
सवर्णोपि हि सवर्णानां पशुसञ्ज्ञां करिष्यसि ॥ १०१ ॥(०५)

लक्षालङ्कारः-सवर्णोऽपि इत्यत्र सवर्णः ब्राह्मणत्वादिवर्णसहितः विवर्णानां विगतवर्णानां वर्णबाह्यानामपीत्यर्थः । हिंसनं न कुर्यात् । सवर्णानां हिंसनं न कुर्यादिति किं वाच्यमिति सम्बन्धः ।

कोऽन्य एवं यथा हि त्वं जरासन्ध वृथामतिः ।

---

(०१) (१) राजन्; ; राज्ञा (for राजा); (२) ०सत्तमः; सत्तमान्; वि (अ)हिंस्यान्नडपसत्तम; मः ताव्राज्ञः द०। ०; ०जिहर्षिसे; .

(०२) (१) अस्मात्; ; अस्मत्; तु (for तद्); गच्छेत्तु; द्धि; द्धै (त); अस्मांस्तदागो गच्छेद्यत्; अस्मास्त , (तस्मात्त)देनोपगच्छेत्; अस्मांस्तथान्ये गच्छेयुः; अस्मान्, तदेनः; गच्छेत्; एनोपगरछेत् (सन्धिरार्षः); , (२) कृतं बार्हद्रथ त्वया; बार्हद्रथे; (३) च शक्ता; हि शक्त्या; शक्ता हि; तु शक्ता; ; शक्ताः; स्म (for हि शक्ता); धर्मज्ञ (for ०स्व); (४) धर्मकारिणः; दडधारिणः; .

(०३)( दधैव (for ०दद्योप०); तं वै (for तव); ) मनुष्याणां समालम्भो न च दृष्टः कदाचन ।.

(०४) (१) मानुषाणां; समारम्भो; हिंसा; (२) हि (for च); कथ० (for कदा० ); (३) सु० (for स); मानुषे लोके (for मानुषैर्देवं); .

(०५) (१) हि; सुवर्णोपि विवर्णानां; सवर्णोपि हि ( स०); वर्णानां; सवर्णो हि सुवर्णानां; सवर्णोपि विवर्णानां; (२) ०यज्ञं (for सञ्ज्ञा); ०ष्यसि (for ०ण्यति); .

यस्यां यस्यामवस्थायां यद्यत्कर्म करोति यः ।

तस्यां तस्यामवस्थायां तत्फलं समवाप्नुयात् ।[०१]

ते त्वा ज्ञातिक्षयकरं वयमार्तानुसारिणः ।
ज्ञातिवृद्धिनिमित्तार्थं विनिहन्तुमिहागताः ।। १०२ ।।[०२]

लक्षालङ्कारः- ते त्वा इत्यत्र ते वयं त्वा त्वाम् ।

नास्ति लोके पुमानन्यः क्षत्रियेष्विति चैव तत् ।
मन्यसे स च ते राजन्सुमहान्बुद्धिविप्लवः ।। १०३ ।।[०३]

लक्षालङ्कारः-नास्ति लोक इत्यत्र सः अस्मानतीत्य नृपसिंहोद्योगः ।

को हि जानन्नभिजनमात्मवान्क्षत्रियो नृप ।
नाविशेत्स्वर्गमतुलं रणानन्तरमव्ययम् ।। १०४ ।।[०४]

स्वर्गं ह्येव समास्थाय रणयज्ञेषु दीक्षिताः ।
जयन्ते क्षत्रिया लोकांस्तान्विद्धि मनुजर्षभ ।। १०५ ।।[०५]

लक्षालङ्कारः-तान्विद्धि इत्यत्र ये पूर्वोक्तविधया जयन्ते तानस्मान्विद्धीति योजना ।

---

(०१)कथं कुर्याद्धिहिंसनं; हिंसनं न कुर्याद; (३) कोयं (for कोऽन्य); एव (for एवं); यो न (येन); स्यात्त्वमिवानार्यो (साधो); (४) यथामति; वृथामते; .

(०२) (१) ये त्वा; मत्वा; ते त्वा; (२) वयमत्रानु; वयं मार्गानुसारिणः; (०णं); (३) वृद्धं; वृत्ति; (for वृद्धि); ज्ञातिक्षयनिवृत्यर्थ; (४) ०हतुम् (२ यन्तुम्); परीप्सामो विशेषतः; .

(०३)(२) यो वेति (०येष्विति); वै च (for चैव); तत्; हि (for यत्); क्षत्रियोस्मानतीत्य च; अस्मानतीत्य; (३) मन्यते (for से); महान्बुद्धिविपर्ययः.

(०४) (१) यो हि जानात्यभि०; (२) आत्मानः; आत्मवान्; आत्मानं; (for आत्मनः); नृपः; (ऽ)त्रवः; भुवि; (for नृप); (३) स विसरत्; नाविक्षेत्; न विशेत्; न गच्छेत् (for नाविशेत्); दुर्गम् (for स्वर्गम्); .

(०५) (१) स्वर्गमेव; स्वर्गं ह्येवं; स्वर्गे मनः; स्वर्गयोनिं (for स्वर्गं ह्येव); समुद्दिश्य; समास्थाय; स्वर्गहेत्वसमुद्दिश्य; स्वर्गे हि वासमुद्दिश्य; (२) दीक्षितः; (३) यजन्ति; जयन्ते; जयति ( ती); (for यजन्ते); क्षत्रियो; लोके; लोकास्; लोकात् (for लोकान्); (४) तान् (for तद्); क्षत्रियर्षभः; मनुजाधिप; मनुजर्षभ; ; मगधेश्वर; तानस्मा० म्यिद्धि मागध; .

स्वर्गयोनिर्महद्ब्रह्म स्वर्गयोनिर्महद्यशः ।
स्वर्गयोनिस्तपो युद्धे मृत्युः सोऽव्यभिचारवान् ।। १०६ ।।(०१)

लक्षालङ्कारः-स्वर्गयोनिस्तप इत्यत्र युद्धे तपः शत्रुतपनमित्यर्थः ।

एष ह्यैन्द्रो वैजयिकः गुणैर्नित्यं समाहितः ।
येनासुरान्पराजित्य जगत्पाति शतक्रतुः ।। १०७ ।।(०२)

लक्षालङ्कारः- विजयसम्बन्धी वैजयिकः।

अस्य स्यात् स्वर्गमास्थाय निग्रहीतुं यथा तव ।। १०८ ।।(०३)

लक्षालङ्कारः-अस्य स्यात् स्वर्गं इत्यत्र यथा तव भुवि निग्रहीतुं शत्रुनिग्रहणं कर्तुं मनः स्यात्, तथा अस्य इन्द्रस्य स्वर्गमास्थाय निग्रहीतुं त्वदादिशत्रुसंहारं कर्तुं मनः स्यात् ।।

मागधैर्विपुलैः सैन्यैर्बाहुल्यबलदर्पितः ।(०४)
मावमंस्थाः परान् राजन्नस्ति वीर्यं नरे नरे ।। १०९ ।।(०५)

---

(०१) (१) महान्ब्रह्म; महद्ब्रह्म; भयो राजन्; जयो राजा; तपो युद्धे; जयः; (२) स्वर्गयोनि; ; स्वर्गयोगं (for योनिर्); महेश्वरः; (for महद्यशः); (३) लयो (for तपो); युद्ध; लोके; बुद्धिद्; युद्धो (for युद्धे); (४) मृत्युः; (for मार्गः); सत्यश्चैव विचारितः; मृत्युश्चैव० विचारितः; (तं); मार्गसव० यभि०; मार्गः सोप्यभि; ; मार्गस्याव्यभिं.

(०२) (१) वैजयन्तो; (२) गुणैट् (णं); (for गुणो); नित्य (for नित्यं);
(३) परित्यज्य (for पराजित्य); .

(०३) (१) क- कल्यस्स्याद्रथमास्थाय निगृहीतुं, ग- कस्य स्याद्रर्व,घ-कालस्स्याद्रथमास्थाय निगृहीतुं.

(०४) (१) स्वर्गमार्गाय; ०मार्गे हि; ०मार्गाच्च; मास्थाय स्वर्गमार्गहेतो; स कस्माद्दृढमास्थाय; तस्य स्याद्गर्वमास्थाय; कस्य (स कः; अस्य यस्य); स्यात्स्वङ्ग; (र्दथ)०मास्थाय; (२) विग्रहत्वं; विग्रहो ( हे) वै; विगृहीतुं; विग्रहीतुं; निग्रहीतुं; सूत्त्रशह्मष्ठत; विग्रहीतं; विग्रहस्तु (०हीतुं); निगृहीतुं; विग्रहो; कथं बलं; यथा तव (३) बहुलै बहुभिः; (for विपुलैः); (४) बाहुल्याद् (बाल्यात्त्वं) (for बाहुल्य०); बलदर्पितः; बहुदर्पितः; अतिदर्पितैः; .

(०५) (१) नावं(for माव०); मावसंस्थाः; (२) अस्ति (for नास्ति); नास्ति नरेश्वरे; जने जने; नरेश्वर (for नरे नरे); .

समं तेजस्त्वया चैव विशिष्टं वा नरेश्वर ।।(०१)
यावदेतदसम्बद्धं तावदेव भवेत्तव ।। ११० ।।(०२)

विषह्यमेतदस्माकमतो राजन् ब्रवीमि ते ।(०३)

जहि त्वं सदृशेष्वेव मानं दर्पं च मागध ।
मा गमः ससुतामात्यः सबलश्च यमक्षयम् ।। १११ ।।(०४)

लक्षालङ्कारः- विषह्यमेतत् इत्यत्र 'विर्निषेधे पृथग्भावे' इति वचनात् विषह्यम् असह्यम् ।

दम्भोद्भवः कार्तवीर्य उत्तरश्च बृहद्रथः ।
श्रेयसो ह्यवमन्येह विनेशुः सबला नृपाः ।। ११२ ।।(०५)

लक्षालङ्कारः-श्रेयसो ह्यवमत्य इत्यत्र श्रेयसः श्रेष्ठान् ।

युयुक्षमाणास्त्वत्तो हि न वयं ब्राह्मणा ध्रुवम् ।
शौरिरस्मि हृषीकेशो नृवीरौ पाण्डवाविमौ ।। ११३ ।।(०६)

---

(०१) (१) तथा (for त्वया); देवः; लोके (for चैव); (२) विशिष्टं; वरिष्ठं (for केवलं); वा (वै); नरेश्वर (for मनुजे० ); बलं च (तु); मनुजर्षभ (०भः); .

(०२) (१) तावदेव; यावदेतन्; ०देवं; सम्बुद्धं; संविद्धि; सम्बन्धम्; सम्बद्धं (for सम्बुद्धं); यावदेतदसम्बु (व)द्धं; यावदेतौ समबुद्धः (२) तावदेवं; तावद्दर्पो; .

(०३)(३) विसह्यम्; विषस्यम्; एततः तव दीर्य; विषहेदेतमस्माकम्; अविषन्दृं तदस्माकम्; (४) ततो; इतो (for अतो); ब्रवीहि मे (for ब्रवीमि ते); .

(०४) (१) न हि; जनिम् (for जहि); सदृशेश्चेव; जनितं मानं; (२) मानदपं; दर्पं मोहं; दर्पं मानं; दर्पमानं; दर्पमानं; मागधः (ध) (for मा गमः); सबलामास्यः; स्वं सुता; स्वसुता०; सहिता (for ससुता); ससुतश; सुहृद्भिस्तु (for सबलश्च); मा गमंस्ते च सबलामा त्यास्तव यमक्षयं; ससुतामात्यसबलो मा याहि त्वं यमक्षयं.

(०५) (१) हम्भो (डिबो)द्भवः; सिँभोद्भवत्; कार्यवर्यिः; (२) मरुत्तश्च; उत्तरं च; द्युत्तरश्च; जयद्रथ; बृहद्रथ; (३) श्रेयसोप्यवमन्येह; ०सो ह्येवम०; श्रेष्ठान० ष्यवम०; श्रेयसोथावम०; ०सो ह्यवमत्येह; (०त्यैव; त्येव); श्रेयसः (४) सकला; सबलाः सबलान्; सबलं (for सबला; नृप; ; नृपः; (for नृपाः) .

(०६) (१) युयुक्ष० युयुत्स०; बुभुक्ष; मुमुक्ष० ; ०त्तो हि; (for तश्च); (२) ब्राह्मणव्रताः;

(अनयोर्मातुलेयं च कृष्णं मां विद्धि ते रिपुम् ।।)(०१)

त्वामाह्वयामहे राजन्स्थितो युध्यस्व मागध ।
मुञ्च वा नृपतीन्सर्वान्गच्छ वा त्वं यमक्षयम् ।। ११४ ।।

वैशम्पायनः

एतच्छ्रुत्वा जरासन्धः क्रुद्धो वचनमब्रवीत् ।। ११५ ।।

जरासन्धः

नाहं कंसः प्रलम्बो वा न बाणो न च मुष्टिकः ।
नरको नेन्द्रतपनो न केशी न च पूतना ।। ११६ ।।(०२)

न कालयवनो वाऽपि ये त्वया निहता युधि ।
त्वं तु गोपकुलोत्पन्नो जातिं वै पूर्विकां स्मर ।। ११७ ।।

योऽस्मद्भयादपक्रम्य सागरानूपमाश्रितः ।
जन्मभूमिं परित्यज्य मधुरां प्राकृतो यथा ।। ११८ ।।

लक्षालङ्कारः-सागरानूपम् इत्यत्र सागरस्य अनूपं अनु अनूकूलं उपम् उपकण्ठम् ।

सोऽधुना कत्थसे शौरे शरदीव यथा घनः ।
अद्यानृण्यं करिष्यामि भोजराजस्य धीमतः ।। ११९ ।।

जामातुरौग्रसेनेश्च त्वां निहत्याद्य माधव ।
चिरकाङ्क्षितो मे सङ्ग्रामः त्वां हन्तुं ससुहृद्गणम् ।। १२० ।।

दिष्ट्या मे सफलो यत्नः कृतो देवैस्सवासवैः।
क्लीबाविमौ च गोविन्द भीमसेनार्जुनावुभौ ।

---

ब्राह्मणसत्तमाः; ब्राह्मणा ध्रुवाः; ब्राह्मणा ध्रुवं (नृप); ब्राह्मणबुवाः; (३) सौरि० (for शौरि); (४) नृवरौ (for नृवीरौ); ०रौ पाण्डवा वयं; इमौ भीमधनञ्जयौ; .

(०१) ( जानीहि; वै विद्धि (for मां विद्धि); ).

(०२) (४) क- वानरः-इति वर्तते (वारण इति तुयुक्तमुत्पश्यामः).

हिंस्यामि युधि विक्रम्य सिंहः क्षुद्रमृगानिव ॥ १२१ ॥

वैशम्पायनः

तस्य रोषाभिभूतस्य जरासन्धस्य गर्जतः ।
सर्वभूतानि वित्रेसुः ये तत्रासन्समागताः ॥ १२२ ॥

लक्षालङ्कारः-वित्रेसुः विशेषेण त्रासं प्रापुः ।

श्रीभगवान्

किं गर्जसि जरासन्ध कर्मणा तां समाचर ।**
मम निर्देशकर्तृभ्यां पाण्डवाभ्यां नृपाधम ॥ १२३ ॥

सामात्यं ससुतं चाद्य घातयिष्याम्यहं रणे ।
न कथञ्चन जीवन्वै प्रवेक्ष्यसि पुरोत्तमम् ॥ १२४ ॥(०१)

जरसन्धः

नाजितं वै नरपतीनहमादद्मि कश्चन ।
अजितः पर्यवस्थाता कोऽत्र यो न मया जितः ॥ १२५ ॥(०२)

लक्षालङ्कारः-अहमादद्मि कश्चन इत्यत्र जयतीति जित् अजितम् अजयशीलं न आदद्मि 'दद दाने' इति धातोः युद्धाय नाङ्गीकरोमि । जितः जयशीलस्य मम अग्रे ।

क्षत्रियस्यैतदेवाहुर्धर्म्यं कृष्णोपजीवनम् ।

(०१) (२) स्थितौ; स्थित्वा; (for स्थिरो); मागधः; भारत; भारतं (for मागध); (३) मुञ्चैतान्; मुञ्चेमान् (for मुञ्च वा); (४) मा वा गमस्त्वं; गास्त्वं वै; गच्छ वा त्वं; मा च (मात्र); गास्त्वं; (for मा गमस्त्वं); .

(०२) (१) नाजित्वा; नाजितो; नाजितं; (for नाजितान्); वैरिनृपतीन्; वै नरपतिम्; (२) क-अहं पश्यामि । ०माहन्मि; मादास्मि; किञ्चन; कञ्चन (for कांश्चन); न ददामि कथञ्चन; अहं पश्यामि कञ्चन; अहं वेद्मि कथञ्चन; (३) यतः कः; जितः स; अजितः ( अतः कः); (for जितः कः); जितः प्रत्यव०; पर्यव; (४) जितो मया पराजितः; को नृपो न जितो मया; कोत्र न विजितो मया; कोत्र यो नाजितो मया; को मया पराजितः.

विक्रम्य वशमानीय कामतो यत्समाचरेत् ।। १२६ ।।(०१)

लक्षालङ्कारः-कृष्णोपजीवनम् इत्यत्र एतत् वक्ष्यमाणं, हे कृष्ण इति सम्बुद्धिः । कामतः स्वेच्छानुसारेण ।

देवतार्थमुपाहृत्य राज्ञः कृष्ण कथं भयात् ।
अहमद्य विमुच्येयं क्षात्रं व्रतमनुस्मरन् ।। १२७ ।।(०२)

सैन्यं सैन्येन व्यूढेन एक एकेन वा पुनः ।
द्वाभ्यां त्रिभिर्वा योत्स्येऽहं युगपत्पृथगेव वा ।। १२८ ।।(०३)

वैशम्पायनः

एवमुक्त्वा जरासन्धः सहदेवाभिषेचनम् ।
आज्ञापयत्तदा राजा युयुत्सुर्भीमकर्मभिः ।। १२९ ।।(०४)

तौ तु सेनापती राजा सस्मार भरतर्षभ ।
कौशिकं चित्रसेनं च तस्मिन्युद्ध उपस्थिते ।। १३० ।।(०५)

लक्षालङ्कारः-तौ तु सेनापती इत्यत्र हंसेति डिभकेति च पूर्वं विद्यमानौ तौ तु जरासन्धस्य सेनापती कालो अतीतकालो कथितौ मृताविति कथितौ ।

ययोस्ते नामनी राजन्हंसेति डिभिकेति च ।

---

(०१)(२) कर्म; धर्मः धैर्यं; धर्म्म कृष्णोपजीविन; क्षत्रोपजविनं; कृष्णोपजीविनः; (३) च समां; (for वशमा० ); (४) यः (for यत्); .

(०२) (१) ०हृत्या; कृत्य; (२) कृष्णः; धनं (for कथं); भवान्; भवेत् (for भयात्); (३) विमुच्येयं (for क्षात्रं); (४) क्षात्रं वृत्तं; क्षात्रव्रत०; ०; क्षत्रं व्रतं; क्ष (क्षा)त्रधर्मँ; क्षात्रं धर्मँ; .

(०३)(१/२) सैन्येन सैन्यं; ब्यूहेन; व्याहन्; (for व्यूढेन); सैन्याङ्कः; सह सैन्येन; व्यूढेन सैन्येन सैन्यं; सैन्यं व्यूढेन सैन्येन; सैन्येन स् व्यूढेन; सैन्यव्यूहेन; एकमेकोपि (for एक एकेन); सैन्येन सैन्यं व्यूढ्हमेकेन वा पुनः; (३) बहुभिर् (for त्रिभिर्वा); (४) च(for वा); .

(०४)(३) राजन् (for राजा); आज्ञापयामास तदा; आज्ञापयय विप्रान्वै; (४) भीमवित्त्यः (०मैः); मत्रिवृद्धान्पुरोहितान्; ०रथ कर्मभिः; .

(०५) (१) स तौ; ततः; तौ तु (for स तु); सेनापतिं; राजन् (for राजा); (२) सस्मरे (for सस्मार); पुरुषर्षभः ; (भ); मनुज० (for भरतं); (४) युद्धमुपं; .

पूर्वं स्तः कथितौ काले नृलोके लोकसत्कृतौ ।। १३१ ।।(०१)

लक्षालङ्कारः-प्राक् तौ सेनापती, इदानीं कौशिकचित्रसेनाविति भावः ।

निशश्वास जरासन्धो दिष्टं सञ्चिन्तयंस्तदा ।*

तं तु राजन्विभुः शौरी राजानं बलिनां वरम् ।
स्मृत्वा पुरुषशार्दूलं शार्दूलसमविक्रमम् ।। १३२ ।।(०२)

लक्षालङ्कारः- तर्हि जरासन्धोऽपि प्रागेव कृष्णेन कस्मान्न हत इत्यत आह – स्मृत्वा पुरुषशार्दूलम् इत्यादि ।।

सत्यसन्धो जरासन्धं भुवि भीमपराक्रमम् ।
भागमन्यस्य निर्दिष्टमवध्यं मधुभिर्मृधे ।। १३३ ।।(०३)

नात्मनाऽऽत्मवतां मुख्य इयेष मधुसूदनः ।
ब्राह्मणाज्ञां पुरस्कृत्य हन्तुं हलधरानुजः ।। १३४ ।।

लक्षालङ्कारः-ब्राह्मणाज्ञां ब्रह्मणश्चतुर्मुखस्य सम्बन्धिनी ब्राह्मणी सा च सा आज्ञा च। 'वायुर्भीमो भूत्वा जरासन्धं घातयतु' इति चतुर्मुखस्याज्ञां पुरस्कृत्येत्यर्थः ।

अस्मिन् पर्वणि २१अध्याये १३४ श्लोकाः सन्ति

---

(०१) पूर्वं सङ्कथितं पुम्भिर्नृलोके लोकसत्कृते -पां
(१) तयोस्ते; ययोस्तन्; ययोस्तु (for ययोस्ते); राजन् (for लोके); तौ (यौ); तु सेनापती लेभे (काले; लोके); (२) डिफिके; डिभके०; डिभिके०; डिम्बके०; डिबके०; डिभगें; (३) पूर्वसङ्कथिते; पूर्वं सङ्कथितं; पूर्वं सङ्कथ्यते; पूर्व स्तः (तौ); कथितौ; (०तं); पूर्व नः कथितौ; पूर्वं, काले (for पुम्भिर्,); कथितौ पूर्वं; पुभिङर् (for पुम्भिर्);
(४) संस्कृत; ०सत्कृतः; ०सत्कृतौ; लोके त्रैलोक्यसत्कृतौ; .
(०२) वैशम्पायनः (१) ते तु; ते स; ते च; तत्तु (for तं तु); सौरी (२) बालिनं;
(३) कृत्वा; स्मृत्वा शार्दूलं; शार्दूलं; ०ला; (४) विक्रमः,.
(०३) (१) जरासन्धो (for धं); (३) भीमस्य (for अन्यस्य); (४) वध्यं सू ( भू ); रिभिरित्युत (रच्युतं); वध्यं इति विचित्य तु; अवध्यं मधु (भूरि; यद रिपु); भिर्मृधे; वध्यं मत्वा तदाच्युतः; मन्यमानो हि चा (वा) च्युतः; वध्यं भूः (सू)रि भिरच्युतः.

जरासन्धवधपर्वणि (१) प्रथमोऽध्यायः

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि एकविंशोऽध्यायः।। २१।।

# २२. द्वाविंशोऽध्यायः

श्रीमन्महाभारततात्पर्यनिर्णये एकविंशाध्याये

तथाऽऽपणेभ्यो बहुमाल्यगन्धान् प्रसह्य संगृह्य शुभांश्च दध्रुः ।
अद्वारतस्तस्य गृहं च सस्रुर्भोशब्दतस्तं च नृपं प्रसस्रुः।।११९।।
तान् विप्रवेषान् स निशाम्य राजा
महाभुजान् स्नातकवेषयुक्तान् ।
द्वितीयवर्णान् प्रविचिन्त्य बाहून्
ज्याकर्कशान् वीक्ष्य बभाष एतान् ।।१२०।।
के स्थाथ किं हेतुत आगताश्च कुतश्च मे पर्वतलिङ्गभेदनम् ।
कृतं भवद्भिः कुत एव दुर्नयाः कृतास्तथाऽन्ये द्विजवर्यवेषैः ।।१२१।।
इति ब्रुवाणं भगवानुवाच कार्यं हि शत्रोरखिलं प्रतीपम् ।
इत्युक्त ऊचे न हि विप्रशत्रुरहं कुतो वो मम शत्रुता भवेत् ।।१२२।।
इत्युक्तवाक्यं नृपतिं जगाद जनार्दनो नैव हि तादृशा द्विजाः ।
अहं रिपुस्तेऽस्मि हि वासुदेव इमौ च भीमार्जुननामधेयौ।।१२३।।
यद् बान्धवान् नः पिशिताशिधर्मतो रौद्रे मखे कल्पयितुं पशुत्वे ।
इच्छस्यरे वेदपथं विहाय तं त्वां बलाच्छास्तुमिहाऽगता वयम् ।।१२४।।
विमोक्षयामः स्वजनान् यदि त्वं न मोचयस्यद्य निगृह्य च त्वाम् ।
मुञ्चाथवा तानभियाहि वाऽस्मान् रणाय मर्तुं कृतनिश्चयोऽत्र ।।१२५।।
इतीरितोऽसौ मगधाधिपो रुषा
जगाद नाहं शिवयागयुक्तान् ।
मोक्ष्ये पशून् युगपद् वा क्रमेण

योत्स्ये च वोऽथापि चमूसहायान् ।।१२६।।
निरायुधः सायुधो वा युष्मदिष्टायुधेन वा ।
एकोऽपि सकलैर्योत्स्ये ससेनो वा ससैनिकान् ।।१२७।।
इत्युक्तवन्तमवददजितोरुबलो हरिः ।
एह्येकमेको वाऽस्मासु ससैन्यो वा रणे नृप ।।१२८।।
येन कामयसे योद्धुं तं न आसादय द्रुतम् ।
निरायुधः सायुधो वा त्वदभीष्टायुधेन वा ।
इत्याऽह भगवाञ्छत्रुं यशो भीमे विवर्द्धयन् ।।१२९।।
घातयित्वा स्वशत्रुं च भीमेनानुग्रहं परम् ।
भीमस्य कर्तुमिच्छंश्च भक्तिज्ञानादिवर्द्धनम् ।।१३०।।
तृणीकर्तुं रिपुं चैव निरायुधतयाऽगमत् ।
कृष्णभीमार्जुनास्तेन विप्रवेषाश्च तेऽभवन् ।।१३१।।
निरायुधः क्षत्रवेषो नैव योग्यः कथञ्चन ।
ततो जग्मुर्विप्रवेषास्तृणीकर्तुं हि मागधम् ।।१३२।।

# 02- 02- 22

कृष्णजरासन्धयोर्द्वेषकारणकथनम् ।। १ ।। जरासन्धभीमसेनयोः स्वस्त्ययनपूर्वकं युद्धारम्भः ।। २ ।। श्रीकृष्णाप्रोत्साहितस्य भीमस्य जरासन्धवधोद्यमः।। ३ ।।

जनमेजयः-

किमर्थं वैरिणावास्तामुभौ तौ कृष्णमागधौ ।
कथं च निर्जितः सङ्ख्ये जरासन्धेन माधवः ।। १ ।।

कश्च कंसो मागधस्य यस्य हेतोः स वैरवान् ।

एतदाचक्ष्व मे सर्वं वैशम्पायन तत्त्वतः ।। २ ।।

वैशम्पायनः

यादवानामन्ववाये वसुदेवो महामतिः ।
उदपद्यत वार्ष्णेयो ह्युग्रसेनस्य मन्त्रभृत् ।। ३ ।।

उग्रसेनस्य कंसस्तु बभूव बलवान्सुतः ।
ज्येष्ठो बहूनां कौरव्य सर्वशस्त्रविशारदः ।। ४ ।।

जरासन्धस्य दुहिता तस्य भार्यातिविश्रुता ।
राज्यशुल्केन दत्ता सा जरासन्धेन धीमता ।। ५ ।।

तदर्थमुग्रसेनस्य मथुरायां सुतस्तदा ।
अभिषिक्तस्तदामात्यैः स वै तीव्रपराक्रमः ।। ६ ।।

लक्षालङ्कारः-तदर्थम् इत्यत्र तदर्थं प्रबलजरासन्धप्रियार्थम् ।।

ऐश्वर्यबलमत्तस्तु स तदा बलमोहितः ।
निगृह्य पितरं भुङ्क्ते तद्राज्यं मन्त्रिभिः सह ।। ७ ।।

वसुदेवस्य तत्कृत्यं न शृणोति स मन्दधीः ।
स तेन सह तद्राज्यं धर्मतः पर्यपालयत् ।। ८ ।।

प्रीतिमान्स तु दैत्येन्द्रो वसुदेवस्य देवकीम् ।
उवाह भार्यां स तदा दुहिता देवकस्य या ।। ९ ।।

तस्यामुद्वाह्यमानायां रथेन जनमेजय ।
उपारुरोह वार्ष्णेयं कंसो भूमिपतिस्तदा ।। १० ।।

ततोऽन्तरिक्षे वागासीद्देवदूतस्य कस्यचित् ।
वसुदेवश्च शुश्राव तां वाचं पार्थिवश्च सः ।। ११ ।।

यामेतां वहमानोऽद्य कंसोद्वहसि देवकीम् ।

अस्या यश्चाष्टमो गर्भः स ते मृत्युर्भविष्यति ।। १२ ।।

सोऽवतीर्य ततो राजा खड्गमुद्धृत्य निर्मलम् ।
इयेष तस्या मूर्धानं छेत्तुं परमदुर्मतिः ।। १३ ।।

स सान्त्वयंस्तदा कंसं हसन्क्रोधवशानुगम् ।
राजन्ननुनयामास वसुदेवो महामतिः ।। १४ ।।

अहिंस्यां प्रमदामाहुः सर्वधर्मेषु पार्थिव ।
अकस्मादबलां नारीं हन्तासीमामनागसीम् ।। १५ ।।

यच्च तेऽत्र भयं राजन्शक्यते बाधितुं त्वया ।
इयं च शक्या पालयितुं अयशस्यं च रक्षितुम् ।। १६ ।।

लक्षालङ्कारः-इयं च शक्या इत्यत्र अयशस्यम् अयशस्करकर्मोद्युक्तं त्वां च रक्षितुं शक्नोमीति सम्बन्धः ।।

अस्यास्त्वमष्टमं गर्भं जातमात्रं महीपते ।
विध्वंसय तदा प्राप्तमेवं परिहृतं भवेत् ।। १७ ।।

एवं स राजा कथितो वसुदेवेन भारत ।
तस्य तद्वचनं चक्रे शूरसेनाधिपस्तदा ।। १८ ।।

ततस्तस्यां सम्बभूवुः कुमाराः सूर्यवर्चसः ।
जाताञ्जातांस्तु तान्सर्वाञ्जघान मधुरेश्वरः ।
अथ तस्यां समभवद्बलदेवस्तु सप्तमः ।। १९ ।।

याम्येन मायया राजा नियमो तं विशाम्पते ।
देवक्या गर्भमतुलं रोहिण्या जठरेऽक्षिपत् ।। २० ।।

लक्षालङ्कारः-याम्येन मायया इत्यत्र याम्येन मायया, याम्यानां यमभटानां इना समर्था या माया दुर्गा सा तथोक्ता । गर्भस्रवणे सति कुतो जीवो नीत इति शङ्कापरिहारार्थमिदं विशेषणम्

। नियमयति सर्वमिति नियमो राजा नारायणः।

आकृष्य कर्षणात्सम्यक्सङ्कर्षण इति स्मृतः ।
बलश्रेष्ठतया तस्य बलदेव इति स्मृतः ।। २१ ।।

लक्षालङ्कारः-आकृष्य कर्षणात् इत्यत्र देवक्युदराद्गर्भमाकृष्य रोहिण्युदरं प्रत्याकर्षणादित्यर्थः।

पुनस्तस्यां समभवदष्टमो मधुसूदनः ।
तस्य गर्भस्य रक्षां तु चक्रे सोऽभ्यधिकं नृपः ।। २२ ।।

ततः काले रक्षणार्थं वसुदेवस्य सात्वतः ।
उग्रः प्रयुक्तः कंसेन सचिवः क्रूरकर्मकृत् ।। २३ ।।

विमूढेषु प्रभावेन बालस्योत्तीर्य तत्र वै ।
उपागम्य स घोषे तु जगाम स महाद्युतिः ।। २४ ।।

जातमात्रं वासुदेवमथाकृष्य पिता ततः ।
उपजह्रे परिक्रीतां सुतां गोपस्य कस्यचित् ।। २५ ।।

लक्षालङ्कारः-जातमात्रम् इत्यत्र अपकृष्य गोकुलं प्रति नीत्वा ततः गोकुलात् परिक्रीतां स्वसुतं दत्वा तत्क्रयरूपेणेव स्वीकृताम् ।

मुमुक्षमाणस्तं शब्दं देवदूतस्य पार्थिवः ।
जघान कंसस्तां कन्यां प्रहसन्ती जगाम सा ।। २६ ।।(०१)

लक्षालङ्कारः-देवदूतस्य तं शब्दम् अष्टमो गर्भः तव मृत्युरिति शब्दं मुमुक्षमाणः मोचयितुमिच्छन् ।

आर्येत्युवाच तं शब्दं तस्मादार्येति कीर्तिता ।। २७ ।।

लक्षालङ्कारः-आर्येत्युवाच इत्यत्र तां प्रति आर्येति शब्दमुवाच । प्राक् शिशुरूपा इदानीम्

(०१) (१) क- दिदृक्षमाण.

आर्या स्थूलेत्युवाचेत्यर्थः ।

एवं तं वञ्चयित्वा च राजानं स महामतिः ।
वासुदेवं महात्मानं वर्धयामास गोकुले ।। २८ ।।

वासुदेवोऽपि गोपेषु ववृधेऽब्जमिवाम्भसि ।
अज्ञायमानः कंसेन गूढोऽग्निरिव दारुषु ।। २९ ।।

विप्रचक्रेऽथ तान्सर्वान्वल्लवान्मधुरेश्वरः ।
वर्धमानो महाबाहुस्तेजोबलसमन्वितः ।। ३० ।।

ततस्ते क्लिश्यमानास्तु पुण्डरीकाक्षमच्युतम् ।
भयेन कामादपरे गणशः पर्यवारयन् ।। ३१ ।।

स तु लब्ध्वा बलं राजन्नुग्रसेनस्य सम्मतः ।
वसुदेवात्मजः सर्वैर्भ्रातृभिः सहितं पुनः ।। ३२ ।।

निर्जित्य युधि भोजेन्द्रं हत्वा कंसं महाबलः ।
अभ्यषिञ्चत्ततो राज्य उग्रसेनं विशाम्पते ।। ३३ ।।

ततः श्रुत्वा जरासन्धो माधवेन हतं युधि ।
शूरसेनाधिपं चक्रे कंसपुत्रं तदा नृपः ।। ३४ ।।

स सैन्यं महदुत्थाप्य वासुदेवं प्रसह्य च ।
अभ्यषिञ्चत्सुतं तत्र सुताया जनमेजय ।। ३५ ।।

उग्रसेनं च वृष्णींश्च महाबलसमन्वितः ।
स तत्र विप्रकुरुते जरासन्धः प्रतापवान् ।। ३६ ।।

एतद्वैरं कौरवेय जरासन्धस्य माधवे ।
आशासितार्थे राजेन्द्र संरुरोध विनिर्जितान् ।। ३७ ।।

लक्षालङ्कारः- आशासितार्थ इत्यत्र आशासितः अर्थः धनं शिवप्र ादश्च येन सः ।

पार्थिवैस्तैर्नृपतिभिर्यक्ष्यमाणः समृद्धिमान् ।
**देवश्रेष्ठं महादेवं कृत्तिवासं त्रियम्बकम्** ॥ ३८ ॥

एतत्सर्वं यथा वृत्तं कथितं भरतर्षभ।
**यथा तु स हतो राजा भीमसेनेन तच्छृणु** ॥ ३९ ॥[०१]

वैशम्पायनः

ततस्तं निश्चितात्मानं युद्धाय यदुनन्दनः ।
**उवाच वाग्मी राजानं जरासन्धमधोक्षजः** ॥ ४० ॥[०२]

श्रीभगवान्-

त्रयाणां केन ते राजन्योद्धुमुत्सहते मनः ।
**अस्मदन्यतमेनेह सज्जीभवतु को युधि** ॥ ४१ ॥[०३]

**त्वया मायाविना कृष्ण न योत्स्येऽहं कदाचन ।**

**भयेन मे योजितानां यदूनां च पलायतः ।**

**अर्जुनो न भवेद्योद्धा न च तुल्यबलो मम ।**

**भीमः क्षणं क्षणार्धं वा क्षमः स्यादिति मे पुरः ।**

एवमुक्तः स नृपतिर्युद्धं वव्रे महाद्युतिः ।
**जरासन्धस्ततो राजा भीमसेनेन मागधः ।**[०४]

---

(०१) (१) श्रेष्ठ; ; मुख्यम् (for मुख्य); (३) ब्राह्मीमाज्ञां; ब्राह्मणाज्ञां;
(४) अजः; ; ०युधः (for ०नुजः); .

(०२) (१) सु; तु (for तं); (२) मधुसूदनः; यदुनन्दन; यदुपुङ्गवः; श्रीकृष्णः.

(०३) (१)कृष्ण उ ( श्रीकृष्ण उ); कं नु; येन (for केन); (२) योधं; वितनुते; विरमते; हि रमते; वै रमते; उत्सहते; हि लभते; वि (व)कुरुते (for वितरते); योद्धं समनुसृज्य च; (३) यस्मद्; अस्माद् ९२ अस्यद्); तमसत (तमस्त्व)त्र; तमेनैव; तमो राजन्; तमो (तमे) द्येह (for तमेनेह); (४) सो (for को); .

(०४) (१) तु (for स); नृपतिर् नृपते (for कृष्णेन); (२) मतिः; रथः; मुनिः; (०क्य०द्युतिः); (३) तदा (for ततो); राजा (for राजन्); (४) ०सेनं तु(for सेनेन); .

न त्वया भिरुणा योत्स्ये युधि वुक्लवचेतसा।
मथुरां स्वपुरीं त्यक्तवा समुद्रं शरणं गतः।
अयं तु वयसातुल्यो नातिसत्वो न मे समः।
अर्जुनो नो भवेदद्योद्धा भिमस्तुल्यबलो मम।
इत्युक्तवा भिमसेनाय प्रदाय महतीं गदाम्।
द्रितीयं स्वयमादाय निर्जगाम पुराद्धहिः।*
आदाय रोचनां माल्यं मङ्गल्यान्यपराणि च ।
धारयन्नगदान्मुख्यान्निर्वृतीर्वेदनानि च ।। ४२ ।।(०१)
अर्जुनं वासुदेवं च वर्जयामास मागधः।
मत्वा देवं गोप इति बालोऽर्जुन इति स्म ह ।। ४३ ।।(०२)
उपतस्थे जरासन्धं युयुत्सुं वै पुरोहितः ।। ४४ ।।
युयुत्सुःकृतस्वस्त्ययनो राजा ब्राह्मणेन यशस्विना ।
समनह्यज्जरासन्धः क्षात्रं धर्ममनुस्मरन् ।। ४५ ।।(०३)
अवमुच्य किरीटं स केशान्समनुगृह्य च ।

---

(०१) (१) धारयन्नङ्गदान्; ०यस्तान्गदान्; ०यस्तां गदां; यन्तं गदां (for ०यद्ध्यादान्); अगदान्; तस्य; मुख्यं; मुख्यां; श्रुत्वा; दिव्यां; क-दिव्यां (ख) दिव्यां निर्वृतिं च जनाधिपम् । दृष्ट्वा; मुख्यान् अगदा० न्निर्वृतीश्चैव; (२) निवृत्ती; ऋचस्ता; निवृति; निवृती (for निर्वृतीद्); नव्यतीर्थोदकानि च; विश्मोग्निरिव ज्वलन्; बलं श्रुत्वा च निर्वृतः (निवृत्ति च जनाधिपः); निर्वृताः; वेदनानि च ऋग्मन्त्रविशेषं । अथ वा निर्वृतीराह्लादकानि, .

(०२)(३) जरासन्धो; ध; (४) युयुत्सर्वै पुरोहितं ( तः); मुख्यान्कत्वा पुरोहितः; विवादस्थं पुरोहित; जरासन्धो,.

(०३) (१) राजा (for विद्वान्, ); (२) तप (for यश); (३) समनह्य; स (for सु); संनह्य; संनह्यत; , (for समनह्यन्); स गाढं वसनं बद्धा समनह्यत (त्); (४) क्षात्रं; क्षेत्र०; क्षात्र (for क्षत्र०); स्मरन् (for ०व्रतः) .

उदतिष्ठज्जरासन्धो वेलातिग इवार्णवः ।[०१]
उवाच मतिमान् राजा भीमं भीमपराक्रमः ।। ४६ ।।

जरासन्धः-

भीम योत्स्ये त्वया सार्धं श्रेयसा निर्जितं वरम् ।। ४७ ।।[०२]

लक्षालङ्कारः- भीम योत्स्य इत्यत्र श्रेयसा श्रेष्ठेन, 'भावे क्तः' इति वचनात् निर्जितं निर्गतो जयः पराजयः वरं श्रेष्ठम् ।

क्षेत्रोदये ततः कृष्ण बालोऽयमनुजोऽर्जुनः ।

वैशम्पायनः-

एवमुक्त्वा जरासन्धो भीमसेनमरिन्दमः ।
प्रत्युद्ययौ महातेजाः शक्रं बल इवासुरः ।। ४८ ।।[०३]

ततः सम्मन्त्र्य कृष्णेन कृतस्व त्ययनो बली ।
भीमसेनो जरासन्धमाससाद युयुत्सया ।। ४९ ।।[०४]

ततस्तौ नरशार्दूलौ बाहुशस्त्रौ समीयतुः ।
वीरौ परमसंहृष्टावन्योन्यजयकाङ्क्षिणौ ।। ५० ।।[०५]

करग्रहणपूर्वं तु कृत्वा पादाभिवन्दनम् ।

---

(०१) (१) अवमृष्य (०मध्य); अनुबध्य; अवमुश्र्य; अविमुच्य; च (for स); (२) समनुसृज्य; नुमृद्य; समँसृज्य ०वसज्य; ०वसृज्य; नुगृह्य; गाढं निबध्य; संयम्य चैव; समनुसृत्य (बद्ध्) (for समनुमृज्य); ह; हि (for च) (३) उपा०; उप० (for उद); (४) वेलातीत; .

(०२) (१) वचनं राजा; च महाबाहुद्; (for मतिमात्राजा); परात्त्य;
(३) योत्स्ये भीम; (४) श्रेयः स्थान्निर्जितं; परं; वरं.

(०३) (२) अरिन्दमं; म; महाबलः (for अरिन्दमः); (३) महाबाहुः;
(४) बल इवासुरः; बलिरि ( ०ल इ )वापरः; .

(०४) (१) ततस्त्वां (for ततः सं); (२) युवा (for बली); .

(०५) (२) शस्त्रं; युद्धं; ०शस्तौ (for ०शस्त्रौ); (३) वीर०; समर (for परमं); परस्परं तु (सु०);
संहृष्टौ; वीरौ परस्परं दृष्ट्वा; (४) अन्योन्यं (for अन्योन्य०); .

कक्षैः कक्षां विधुन्वानावास्फोटं तत्र चक्रतुः ।
स्कन्धे दोर्भ्यां समाहत्य निहत्य च मुहुर्मुहुः ।
अङ्गमङ्गैः समाश्लिष्य पुनरास्फालनं विभो ।
चित्रहस्तादिकं कृत्वा कक्षाबन्धं च चक्रतुः ।
गलगण्डाभिघातेन सस्फुलिङ्गेन चाशनिम् ।
बाहुपाशादिकं कृत्वा पादाहतशिरावुभौ ।
उरोहस्तं ततश्चक्रे पूर्णकुम्भौ प्रयुज्य तौ ।
करसम्पीडनं कृत्वा गर्जन्तौ वारणाविव ।
नर्दन्तौ मेघसङ्काशौ बाहुप्रहरणावुभौ ।
तलेनाहन्यमानौ तु अन्योन्यं कृतवीक्षणौ ।
सिंहाविव सुसङ्क्रुद्धावाकृष्याकृष्य युध्यताम् ।
अङ्गेनाङ्गं समापीड्य बाहुभ्यामुभयोरपि ।
आवृत्य बाहुभिश्चापि उदरं च प्रचक्रतुः ।
उभौ कट्यां सुपार्श्वे तु तक्षवन्तौ च शिक्षितौ ।
अधोहस्तं स्वकण्ठे तूदरस्योरसि चाक्षिपत् ।
सर्वातिक्रान्तमर्यादं पृष्ठभङ्गं च चक्रतुः ।
सम्पूर्णमूर्च्छां बाहुभ्यां पूर्णकुम्भं प्रचक्रतुः ।
तृणपीडं यथाकामं पूर्णयोगं समुष्टिकम् ।
एवमादीनि युद्धानि प्रकुर्वन्तौ परस्परम् ।
तयोर्युद्धं ततो द्रष्टुं समेताः पुरवासिनः ।
ब्राह्मणा वणिजश्चैव क्षत्रियाश्च सहस्रशः ।
शूद्राश्च नरशार्दूल स्त्रियो वृद्धाश्च सर्वशः ।

निरन्तरमभूत्तत्र जनौघैरभिसंवृतम् ।

तयोरथ भुजाघातान्निग्रहप्रग्रहात्तथा ।
आसीत्सुभीमसम्पातो वज्रपर्वतयोरिव ॥ ५१ ॥[०१]

उभौ परमसंहृष्टौ बलेन बलिनां वरौ ।
अन्योन्यस्यान्तरं प्रेप्सू परस्परजयैषिणौ ॥ ५२ ॥[०२]

अन्योन्यं तौ करतलैर्योधयामासतुर्भृशम् ।[०३]
शिरोभिरिव तौ मेषौ वृक्षैरिव निशाचरौ ॥ ५३ ॥

पदैरिव शुभावश्वौ तुण्डाभ्यां तित्तिराविव ।[०४]

तद्युद्धमुत्सार्य जनं युद्धमासीदुपप्लवे ।
बलिनोः संयुगे राजन्वृत्रवासवयोरिव ॥ ५४ ॥[०५]

लक्षालङ्कारः-तद्युद्धमुत्सार्य जनम् इत्यत्र उप समीपे ह्वये द्रष्टृजनानामन्योन्यमाह्वाने सति तं जनं उत्सार्येत्यर्थः ।

प्रकर्षणाकर्षणाभ्यामनुकर्षविकर्षणैः ।

---

(०१) (१) तरोरश्व; ततो (रथो) रथ (for तयोर); (२) निग्रहाव (य) ग्रहात् (हौ; हस्) तथा; निग्रहात्प्रग्रहात्त (स्त)था; निग्रहः प्तग्रहस्तथा; निग्रहाप्रग्रहत्तथा; निग्रहावग्रहास्थिता; (३) सुभीमः; (for सुभीम); सम्पातो; संह्वादौ; संह्लादो; संनादो; .

(०२) (१) ऊचतुः; (for उभौ); (२) बलेन बलिनां वरौ; ० बलेन बलिनावुभौः; बलादतिबलाबुभौ (४)क- वारयामासतुः । क- पोथयामासतुः ।.

(०३) (१) कर्णतले (for करतलैर्); योजया; पोढया; वारया०; पोथयां (for योधयां);
(३) स्थातर(रे) प्रेप्सूः; (४) ०जयेषिणौ; .

(०४) (१) पादै० (for पदैं); तुडस्यां; तुडैवै; ) .

(०५) (१) तद्यिद्धं; संयुद्धं; तं भीमं (for तद्भीमं); (२) भीमं (for युद्धं); भयङ्करं; उपप्लवे; उपह्लये; (रहसि) उपह्वरे; (३/४) बलिनां (for नो); हृष्टयोर् (for संयुगे); वालिसुग्री वयोर्भ्रात्रोः पुरेव कपिसिंहयोः; .

**विकर्षतां तथान्योन्यं जानुभिश्चावजघ्नतुः ।। ५५ ।।**(०१)

लक्षालङ्कारः- विकर्षतां आकर्षताम् इति लङि लुङि वा द्विवचनम् ।

ततः शब्देन महता भर्त्सयन्तौ परस्परम् ।
**पाषाणसङ्घातनिभैः प्रहारैरभिजघ्नतुः ।। ५६ ।।**(०२)

ततो भीमं जरासन्धो जघानोरसि मुष्टिना ।
**भीमोऽपि तं जरासन्धं वक्षस्यभिजघान ह ।। ५७ ।।**

व्यूढोरस्कौ दीर्घभुजौ नियुद्धकुशलावुभौ ।
**बाहुभिः समसज्जेतामायसैः परिघैरिव ।। ५८ ।।**(०३)

कार्तिकस्य तु मासस्य प्रवृत्तं प्रथमेऽहनि ।
**तदा तद्युद्धमभवद्दिनानि दश पञ्च च ।। ५९ ।।**(०४)

अनाहारं दिवारात्रमविश्रान्तमवर्तत ।(०५)
**घोरं विस्मापनतरमभूत्पञ्चदशेऽहनि ।। ६० ।।**(०६)

**तद्वृत्तं तु त्रयोदश्यां समवेतं महात्मनोः ।**

---

(०१) (१) प्रकर्षणाकर्षणयोर्; आकर्षणाकर्षणाभा; आकर्षणं प्रकर्षणं; (२) अभ्याकर्षविकर्षिणौः; ०र्षणात्( न्); अनुकर्षविकर्षणै; अत्याकर्षविकर्षणात्; उत्कर्षणविकर्षणे; णौ; विचक्षणे; (३) अथ (for तथा); आ(अ)कर्षतामथान्योन्यं; अवकर्क्षमथा; आकर्षयेताम; अपकर्षत्तथा; आचकर्षतुर; आकर्षतोस्तथा; अ(व्य)कर्षतां तथा; विकर्षतां तदा; विकर्षतां तथा (ततो); विकर्षतां; (अकर्षतां); (४) ०श्चाभिजग्मतुः; ०श्चावजघ्नतुः; श्रनु; ०श्चान्व०; ०श्च नि; ०श्चापि जघ्नतुः; .

(०२) (३) पात० (for ०घात० ); (४) जग्मतुः; (for ०जघ्नतु); प्रहरैराभिज०; प्रहारैरिव जं; प्राहारैरभिज; .

(०३) (३) सभयभेजेतां; समसज्येतां; परिसजैता (for समसज्जे० ); (४) बाहुभिः (for आयसैः); .

(०४) (२) प्रयुक्तं; प्रवृत्ते; प्रवर्तै; प्रवृत्तिः; .

(०५) (३) अनारमं; हारं (रत०); रक०; अनारमत् (for रतं); दिवा राजन्; अविश्रान्तं (for दिवारात्रम्); (४) विस्मापनक (ग)रं महत्; अविश्रः त उ वर्तते; अविश्रान्तं; .

(०६) ( अतिघोरं दिवारात्रम्; अभवत्वश्चमेहनि; )

चतुर्दश्यां निशयां तु निवृत्तो मागधः क्लमात् ॥ ६१ ॥(०१)

गात्रं गात्रेण सम्पीड्य विश्राममगमद्द्वयोः ।

वायुना ह्यमृतश्वासादाप्यायत वृकोदरः ।*(०२)

तं राजानं तथा क्लान्तं दृष्ट्वा राजञ्जनार्दनः ।
उवाच भीमकर्माणं भीमं सम्बोधयन्निव ॥ ६२ ॥(०३)

समयुद्धे नृणां मध्यात्पाटयन्वोधयन्निव ओ;

शत्रोर्जन्ममृती विद्वम्भीवितं च जराकृतम् ।

पार्थमभ्याययन्त्येन तेजसाचिन्तयद्धरिः ।

सञ्चिन्त्यारिवधोपायं भीमस्यामोघदर्शनः ।

दर्शयामास विटषपाटयन्निब सञ्ज्ञया ।*

क्लान्तः शत्रुर्न कौन्तेय लभ्यः पीडयितुं रणे ।
पीड्यमानो हि कात्स्न्र्येन जह्याज्जीवितमात्मनः ॥ ६३ ॥(०४)

तस्मात्ते नैव कौन्तेय पीडनीयो जनाधिपः ।
सममेतेन युध्यस्व बाहुभ्यां भरतर्षभ ॥ ६४ ॥(०५)

---

(०१) (१) वृद्ध तं; तद्वर्तँ (for तद्धत्तं); तद्रुत्तं नु; तद्युद्धमासीच्च तयोः;
(२) सममेव; समवृत्तं; समवेत्तं; समवेतां; समवेतं; समवेतौ महात्मानौ; .
(०२) (३) पञ्चदश्यां (for चतुर्द० ); नु (for तु); प्रहीणो (for निवृत्तो); माधवा; क्रमात् (for कु);
सस्पृ; (सम्पृ)ष्टो मागधः; स्थ्यैः; मागध क्लममीयिवान्; प्रहीणात्माभवक्तमात् (०त्मा यथान्नं,);
(०३) (१) जरासन्धं (for तं राजानं); यथाः; तदा; ततः; समा (for तथा);
(२) विद्वाम् (for राजन्); .
(०४) (१) क्लात; त्वां तु (for क्लान्तः); सधनो (for शत्रुर्न); च; तु; हि (for न); कौतेयः; (२) शक्यः; शक्तिः; शक्यं; ; शक्तः; (for लभ्य); भृशं (for रणे); (३) (ऽ)पि (for हि); .
(०५) (१) ते नैष; यत्नेन; अनेन; ; तेद्यैव; तथैव; त्वयैव (for ते नैव); ते ( त्वया); (२) जनाधिपः; जनाधिप; (३) समवेतेन; युज्यस्व; युद्धं च; (४) भुजाभ्यां (for बाहुं); पुरुषर्षभ; भरतर्षभः; च नरर्षभ०.

**वैशम्पायनः-**

एवमुक्तः स कृष्णेन पाण्डवः परवीरहा ।
**जरासन्धस्य तद्रूपं ज्ञात्वा चक्रे मतिं वधे ॥ ६५ ॥**[०१]

ततस्तमजितं जेतुं जरासन्धं वृकोदरः ।
**संरम्भं बलिनां श्रेष्ठो जग्राह कुरुनन्दनः ॥ ६६ ॥**[०२]

**अस्मिन् पर्वणि २२अध्याये ६६श्लोकाः सन्ति**

**जरासन्धवधपर्वणि (२) द्वितीयोऽध्यायः**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि जरासन्धवधपर्वणि जरासन्धक्लान्तौ द्वाविंशोऽध्यायः॥२२॥

# २३. त्रयोविंशोऽध्यायः

श्रीमन्महाभारततात्पर्यनिर्णये एकविंशाध्याये
मागधस्य ससैन्यस्य स्वगृहे संस्थितस्य च ।
निरायुधेन भीमेन समाह्वाने कृतेऽमितम् ।
धर्मं यशश्च भीमस्य वर्द्धयामास केशवः ॥१३३॥
तृतीयमर्जुनं चैव समादाय ययौ रिपुम् ।
हरिस्तस्माच्च भीमस्य महाधिक्यं प्रकाशयन् ।
मुखेन मागधस्यैव वृण्वेकं न इति ब्रुवन् ॥१३४॥
वृण्वेकमस्मास्विति स प्रोक्त आह जरासुतः ।
कुर्यां नैवार्जुनेनाहमबलेनैव सङ्गरम् ॥१३५॥

---

(०१) (१) उक्तस्तु ( उक्तेन); (for उक्तः स); (३) तद्रूपं ( तद्रोधं); ; तद्युद्धं; तं रन्ध्रं; (४) तस्य (for चक्रे); मतिं (०ति०); मृधे मतिं युधि; वधे मतिं (तिः); .
(०२) (१) तु गर्हितं; (for तमजितं); (३) संरम्भं; संरम्भाद् (सम्भ्रमाद्); श्रेष्ठो(for मुख्यो); (४) कुरुनन्दन; बलिनां वरः; .

पञ्चपञ्चाशदब्दोऽद्य ह्ययमेवं च बालवत् ।
अबलत्वाद् युवाऽप्येष बाल एव मतो मम ।।१३६।।
इत्युक्तोऽप्यर्जुनो नाऽह कुरु तर्हि परीक्षणम् ।
बाहुभ्यां धनुषा वेति शङ्कमानः पराजयम् ।।१३७।।
अतो भीमे बलाधिक्यं सुप्रसिद्धमभून्महत् ।
एतदर्थं हि कृष्णेन सहाऽनीतः स फल्गुनः ।।१३८।।
जानन् कृष्णे बलं घोरमविषह्यं स मागधः ।
कुत्सयन् गोप इति तं भयान्नैवाऽह्वयत् प्रभुम् ।।१३९।।
आह्वयामास भीमं तु स्याद् वा मे जीवनं त्विति ।
हनिष्यत्येव मां कृष्ण इत्यासीन्नृपतेर्भयम् ।
तस्मात् तं नाऽह्वयामास वासुदेवं स मागधः ।।१४०।।
अर्जुने तु जिते कृष्णभीमौ मां निहनिष्यतः ।
त्रयाणां दुर्बलाह्वानान्नश्येत् कीर्तिश्च मे ध्रुवा ।।१४१।।
इति मत्वाऽऽह्वयामास भीमसेनं स मागधः ।
कथञ्चिज्जीवितं वा स्यान्न तु नश्यति मे यशः ।।१४२।।
इति स्म भीमं प्रतियोधनाय संगृह्य राजा स जरासुतो बली ।
राज्ये निजं चाऽत्मजमभ्यषिञ्चत् पुरा ख्यातं पत्रतापाख्यरुद्रम् ।।१४३।।
बलं भीमे मन्यमानोऽधिकं तु गदाशिक्षामात्मनि चाधिकां नृपः ।
भीतो नियुद्धेऽस्य ददौ गदां स भीमाय चान्यां स्वयमग्रहीद् बली ।।१४४।।
तदर्थमेवाऽशु गदां प्रगृह्य भीमो ययौ मागधसंयुतो बहिः ।
पुरात् सकृष्णार्जुन एव तत्र त्वयुद्ध्यतां केशवपार्थयोः पुरः ।।१४५।।
वाचाऽजयत् तं प्रथमं वृकोदरः शिवाश्रयं विष्णुगुणप्रकाशया ।
ततो गदाभ्यामभिपेततुस्तौ विचित्रमार्गानपि दर्शयन्तौ।।१४६।।
तयोर्गदे तेऽशनिसन्निकाशे चूर्णीकृते देहमहाद्रढिम्ना ।

अन्योन्ययोर्वक्षसि पातिते रुषा यथाऽश्मनोः पांसुपिण्डौ सुमुक्तौ ।।१४७।।
सञ्चूर्णितगदौ वीरौ जघ्नतुर्मुष्टिभिर्मिथः ।
ब्रह्माण्डस्फोटसङ्काशैर्यथा केशवकैटभौ ।।१४८।।
चचाल पृथ्वी गिरयश्च चूर्णिताः कुलाचलाश्चेलुरलं विचुक्षुभुः ।
समस्तवारां पतयः सुरासुरा विरिञ्चिशर्वादय आसदन्नभः।।१४९।।
सुरास्तु भीमस्य जयाभिकाङ्क्षिणस्तथाऽसुराद्या मगधाधिपस्य ।
पश्यन्ति सर्वे क्रमशो बलं स्वं समाददे मारुतनन्दनोऽपि।।१५०।।
मानयित्वा वरं धातुर्दिवसान् दश पञ्च च ।
वासुदेवाज्ञया भीमः शत्रुं हन्तुं मनो दधे ।।१५१।।
स प्रणम्य हृषीकेशं हर्षादाश्लिष्य फल्गुनम् ।
रिपुं जग्राह मुकुटे वारणं मृगराडिव ।।१५२।।
पृष्ठेऽस्य जानुमाधाय कूर्मदेशं बभञ्ज च ।
मृतिकाले पुनर्देहं विददार यथा पुरा ।।१५३।।
मर्मण्येव न हन्तव्यो मयाऽयमिति मारुतिः ।
स्वपौरुषप्रकाशाय बभञ्जैनममर्मणि ।।१५४।।
भज्यमाने शरीरेऽस्य ब्रह्माण्डस्फोटसन्निभः ।
बभूव रावो येनैव त्रस्तमेतज्जगत्त्रयम् ।।१५५।।
निहत्य कृष्णस्य रिपुं स भीमः समर्पयामास तदर्चनं हरेः ।
कृतां हि भीमेन समर्चनां तां समक्षमादातुमिहाऽगतो ह्यजः ।।१५६।।
स्वीकृत्य पूजां च वृकोदरस्य दृढं समाश्लिष्य च तं जनार्दनः ।
प्रीतो नितान्तं पुनरेव कृष्णं ननाम भीमः प्रणतोऽर्जुनेन ।।१५७।।
जग्मुः सुराश्चातितरां प्रहृष्टा ब्रह्मादयो दीनतराश्च दैत्याः ।
बलादुमेशस्य वरे प्रभग्ने वृकोदरेणाच्युतसंश्रयेण ।।१५८।।
सुतो ययौ शरणं तान् रमेशभीमार्जुनान् सहदेवोऽस्य धीमान् ।

रथं स्वसारं च ददौ स मारुतेर्ननाम कृष्णं परया च भक्त्या ।।१५९।।
रथो ह्यसौ वसुना वासुदेवाच्छक्रान्तराऽऽप्तो वसुवंशजत्वात् ।
जरासुतस्याऽस वृकोदरस्तं हरे रथं प्रार्पयामास तस्मै।।१६०।।
कृष्णोऽस्मरद् गरुडं स ध्वजेऽभूद् रथं कृष्णोऽथाऽरुहत् पाण्डवाभ्याम् ।
भीमः कन्यां सहदेवस्य हेतोः समग्रहीदनुजस्याऽत्मनः सः ।।१६१।।
नकुलस्याऽदान्माद्रराजो हि पूर्वं स्वीयां कन्यां सा तथैषाऽप्युषा हि ।
एका पूर्वं ते अश्विनोश्चैव भार्या यमौ रेमाते यदुषा अश्विभार्या
ततः कृष्णायामग्रजभ्रातृभार्यावृत्तिं हि तौ चक्रतुर्माद्रिपुत्रौ ।।१६२।।
जरासुतस्याऽत्मजः केशवादीन् रत्नैः समभ्यर्च्य ययावनुज्ञया ।
तदाज्ञया पितृकार्याणि कृत्वा तदाज्ञयैवामुचत् तान् नृपांश्च ।
तैः संस्तुतः केशवो भीमपार्थयुक्तो ययौ भक्तिनम्रैर्यथावत् ।।१६३।।
सम्भावितास्ते सहदेवेन सम्यक् प्रशस्य कृष्णं भीमसेनं च सर्वे ।
ययुर्गृहान् स्वानपतत् केशवद्विड् जरासुतोऽन्धे तमसि क्रमेण ।।१६४।।

# 02- 02- 23

**भीमसेनकर्तृको जरासन्धवधः ।। १।। कारागृहबद्धनृपाणा□ मोचनम् ।।२ ।। श्रीकृष्ण-प
-भृतीनामुपहारमादायेन्द्रप्रस्थे समागमनम् ।। श्रीकृष्णस्य द्वारका□ प्रति गमनम् ।।**

वैशम्पायनः

भीमसेनस्ततः कृष्णमुवाच यदुनन्दनम् ।
**बुद्धिमास्थाय विपुलां जरासन्धवधेप्सया ।। १ ।।**(०१)

अयं पापो मया कृष्ण युक्तः स्यान्नानुरोधितुम् ।

(०१) (१) तदा (for ततः); (४) जिगीषया; ०वधेच्छया; वधेप्सया; .

प्राणेन यदुशार्दूल बद्धकक्षेण वाससा ।। २ ।।[०१]

लक्षालङ्कारः-अयं पाप इत्यत्र अनुरोधितुम् अनुकूलं कर्तुम्

वैशम्पायनः-

एवमुक्तस्ततः कृष्णः प्रत्युवाच वृकोदरम् ।
त्वरयन्पुरुषव्याघ्रो जरासन्धवधेप्सया ।। ३ ।।[०२]

श्रीभगवान्-

यत्ते दैवं परं सत्त्वं यच्च ते मातरिश्वनः ।
बलं भीम जरासन्धे दर्शयाशु तदद्य वै (नः) ।। ४ ।।[०३]
बले तुभ्यं महाबाहो तमिमं जहि मागधम् ।

तवैष वध्यो दुर्बुद्धिः जरासन्धो महारथः ।
इत्यन्तरिक्षे त्वश्रौषं यदा वायुरपोह्यते ।। ५ ।।

गोमन्ते पर्वतश्रेष्ठे येनैष परिमोक्षितः ।
बलदेवबलं प्राप्य कोऽन्यो जीवेत मागधात् ।। ६ ।।

तदस्य मृत्युर्विहितः त्वदृते न महाबल।
वायुं चिन्त्य महाबाहो जहीमं मगधाधिपम् ।। ७ ।।[०४]

एवमुक्तस्तदा भीमो जरासन्धमरिन्दमः।

---

(०१) (१) अयं (for नायं); (२) क- सक्यादतिरोधितुम् । युक्तं (क्तश्) चिरमुपेक्षितुं; युक्तः स्यान्नानुरोधितुं; युक्तः स्यादतिरो; अनुबोधितु (निबोद्धुं); अनुरो (३) प्रायेण (प्रयाणे); नर० (for यदु); (४) बाह्वावेक्षणवाससा; बद्धूलक्षण०; बद्धो (बुद्धु) वङ्क्षण०; बद्धकक्षेण वाससा (वामया; न शक्योयं व्यपोहितुं); बान्धव (बाणस्या०; बाणस्य) क्षयकृत्तव; बद्धुं रक्षणवाससा कटिवस्त्रेण, ०वक्षण० ०वङ्क्षण०; .
(०२) (१) तदा (for ततः); (३) त्वरस्व; त्वरयत्; त्वरया (for त्वरयन्); व्याघ्र; ०व्याघ्रं; (४) मरिन्दमः; वधेच्छया; जिघांसया; .
(०३) (१) यच्च; यत्तु; यत्व(द्) (for यत्ते); यत्तदेवं; परं तत्त्वं; (२) यत्सत्वं; पितुस्ते; वत्स त्वं (for यच्च ते); (४) दर्शयस्व (यस्वे०) (for चाशु); नः; वै (for नः); .
(०४) (२) क- को महाबलः.

जनार्दनं नमस्यैव परिष्वज्य च फल्गुनम् ।। ८ ।।(०१)

प्रभञ्जनबलाविष्टो जरासन्धमरिन्दमः ।
उत्क्षिप्य भ्रामयामास बलवन्तं महाबलः ।। ९ ।।(०२)

भ्रामयित्वा शतगुणं जानुभ्यां भरतर्षभ ।
बभञ्ज पृष्ठे सङ्क्षिप्य निष्पिष्य विननाद च ।(०३)
करे गृहीत्वा चरणं द्वेधा चक्रे महाबलः ।। १० ।।(०४)

प्रफल्य पादौ भूमौ च जानुनाऽऽक्रम्य सत्वरः ।
सन्धिं विश्लेषयामास सतटिद्घननिस्वनम् ।
मध्ये विदारयामास कर्तव्यमुपशस्य च ।।११।।

लक्षालङ्कारः-कर्तव्यम् इत्यत्र कर्तव्यं स्वस्यैव कर्तुं योग्यं कर्म उपशस्य समीपस्थकृष्णार्जुनौ प्रति स्तुत्वा ।

(अयं श्लोकः वावीळ्ळपाठे नास्ति । मुद्रिते-लक्षालङ्कारपुस्तके (भाग१-पृ-५४५-) अयं श्लोकः नोपलभ्यते इति मुद्रितम् । मातृकायामयं श्लोकः उपलभ्यते)

तस्य निष्पिष्यमाणस्य पाण्डवस्य च गर्जतः ।
अभवत्तुमुलो नादः सर्वप्राणिभयङ्करः ।। ११ ।।

---

(०१) (१) त्वयैव (तवैष); बलः (for रथः); श्रोष्यामो; घोषेण; श्रौषं स्म (for त्वश्रौषं); अवाप्यते (for अपोह्यते); यदा रामेण युध्यता; यदा वा वागपोह्यति; तेनैव (for येनैष); बलदेवबलं; ०भद्रभुजं; जीवति; जीवेत्तु (for जीवेत); महाबलः; त्वं तु वायुसुतः प्राप्य महाबल पराक्रमं; हनस्व; जहीमं (for जहि त्वं); .

(०२) (१)क- उत्क्षिप्य भ्रमयामास जरासन्धं अ- उत्क्षिप्य भ्रामयन् राजन् प्रभञ्जनबलाविष्टो; (२) अरिन्दम दमं; महाबलः (for अरिन्दमः); (३) (अ)भ्रा (भ्र) मयद्रा (०त्रा) जन्; भ्रामयत्राजन्; भ्रामयामास; अक्षष्याभ्रा; (४) जरासन्धं; बलवन्तो (for बलवन्तं); बलं (for बलः); .

(०३) (१) गुणशतं; दश (for शत); (२) पूजाभ्यां; जानु; द्विजा (for भुजा० ); भरत , (पुरुष) र्षभः; (३) पृष्टि; पृष्ठं (for पृष्ठे); जानुभ्यां (for सङ्क्षिप्य); (४) निक्षिप्य; निर्विष्य (for निष्पिष्य); ह (for च); विनिष्पिष्य ननाद च; निष्पिष्य च ननाद च; .

(०४)( द्विधा (for द्वेधा); ) .

वित्रेसुर्मागधास्सर्वे स्त्रीणां गर्भाश्च सुस्रुवुः ।। १२ ।।

भीमसेनस्य नादेन जरासन्धस्य चैव ह ।
किं नु स्विद्धिमवान्भिन्नः किन्नुस्विद्दीर्यते मही ।
इति स्म मागधा जल्पन्भीमसेनस्य निस्वजात् ।। १३ ।।

ततस्तु भगवान्कृष्णो जरासन्धजिघांसया ।
भीमसेनं समालोक्य नलं जग्राह पाणिना ।। १४ ।।(०१)

द्विधा चिच्छेद वै तत्तु जरासन्धवधं प्रति ।। १५ ।।

ततस्त्वाज्ञाय तस्यैव पादमुत्क्षिप्य मारुतिः।
द्विधा बडञ्च द्रात्रं प्रक्षिपाद्विननाद च ।। १६ ।।

पुनः सन्धाय तु तदा जरासन्धः प्रतापवान् ।
भीमेन च समागम्य बाहुयुद्धं चकार ह ।। १७ ।।

तयोः समभवद्युद्धं तुमुलं रोमहर्षणम् ।
सर्वलोकक्षयकरं सर्वभूतभयावहम् ।। १८ ।।

पुनः कृष्णस्तमिरिणं द्विधा विच्छिद्य माधवः ।
व्यत्यस्य प्राक्षिपत्तत्तु जरासन्धवधेप्सया ।। १९ ।।

भीमसेनस्तदा ज्ञात्वा निर्बिभेद च मागधम् ।
द्विधा व्यत्यस्य पादेन प्राक्षिपच्च ननाद ह ।। २० ।।

शुष्कमांसास्थिमेदस्त्वग्भिन्नमस्तिष्कपिण्डकः।
शवभूतस्तदा राजन्पिण्डीकृत इवाबभौ ।। २१ ।।

तस्य निष्पिष्यमाणस्य पाण्डवस्य च गर्जतः ।

---

(०१) (१) क- इत आरभ्य सार्धश्लोकसप्तकमत्यावश्यकम्। परन्तु क- कोशेषु न दृश्यते । मुद्रितग्रन्थलिपिकोशादुद्धृतमिदम् ।.

अभवत्तुमुलो नादः सर्वप्राणिभयङ्करः ।।(०१)
स वामपादं सङ्कृष्य गृहीत्वा दक्षिणे महे ।
द्विधा चकार तं पार्थो जरासन्धं महाबलम् । (०२)
भीमसेनस्य नादेन जरासन्धस्य चैव ह ।(०३)
किं नु स्याद्धिमवान्भिन्नः किं नु स्विद्दीर्यते मही ।
इति वै मागधा जज्ञुर्भीमसेनस्य निःस्वनात् ।(०४)
गृहीत्वा पादयोः शत्रुं पातयामास भूतले ।
एकं पादं पदाक्रम्य दोर्भ्यामन्य प्रगृह्य च ।
गुदतः पाटयामास शाखामिव महागजः ।
एकपादोरुवृषणकटिहृत्पृष्ठनासिके ।
एकबाह्वक्षिभ्रूकर्णे शकले ददृशुः प्रजाः ।

ततो राज्ञः कुलद्वारि प्रसुप्तमिव तं नृपम् ।
रात्रौ गतासुमुत्सृज्य निश्चक्रमुररिन्दमाः ।। २२ ।।(०५)

जरासन्धरथं कृष्णो योजयित्वा पताकिनम् ।
आरोप्य भ्रातरौ चैव मोक्षयामास बान्धवान् ।। २३ ।।(०६)

---

(०१) (३) ०त्तुमलो; .
(०२)( तं (for स), संश्लिष्य (for ०कृष्य); ) वित्रेसुर्मागधाः सर्वे स्त्रीणां गर्भाश्च सुस्रुवुः ।.
(०३)(२) प्र० (for च); शुश्रुवुः (४) हि (for ह); .
(०४) (१) किं नु स्याद्; किं स्विद्धि (for किं नु स्विद्); हि महान् (for हिमवान्); विद्धः (for भिन्नः);
(२) आहो स्विद्; किं स्विद्धि; किं स्विन्न । किं नु स्विद्;
(३) वै (for स्म); जहुर्; जग्मुर्; सर्वे; (जल्पन्) (for जहुर्);
(४) विक्रमात्; गर्जनात्; निःस्वनात् (for निस्वनात्); जज्ञिरे भमिनिस्वनात्; **.
(०५) (१) राज्ञः (for राज); (२) विसुप्तम् (for प्रसुप्तम्); (३) गतासुम् (for परासुम्); .
(०६) (१) क- यश्चासौवीर्यवान्नाम । ख-तयोस्सोदर्ययोर्नाम, वधं कृत्वा (for रथं कृष्णो);
(२) पताकिनीं; नः; (३) क- अभ्याशपातिसन् दृश्यो । अ- अभ्याशायात्यसाद्दृश्यो,राज्ञो

ते वै रत्नभुजं कृष्णं रत्नार्हाः पृथिवीश्वराः ।
**राजानश्चक्रुरासाद्य मोक्षिता महतो भयात्** ।। २४ ।।(०१)

लक्षालङ्कारः-ते वै रत्नभुजम् इत्यत्र 'भुज पालनाभ्यवहारयोः' इति धातोः स्वजीवरत्नपरिपालकं कृष्णं त्नार्हं स्वमौलिरत्नयोग्यपादपीठं पार्थिवं स्वेषां राजानं चक्रुः ।

अक्षतः शस्त्रसम्पन्नो जितारिः सह राजभिः ।
**रथमास्थाय तं दिव्यं निर्जगाम गिरिव्रजात्** ।। २५ ।।(०२)

**उष्ट्राणां शतसाहस्रं वाहयित्वा धनं बहु ।**
**महार्हाणि च रत्नानि रजतं काञ्चनं तथा ।**
**सहदेवं प्रतिष्ठाप्य स्वाधीनं च गिरिव्रजे ।**
**चतुरङ्गबलैः सार्धं निर्जगाम गिरिव्रजात् ।**

तयोः सोन्दर्यवान्नाम विधेयः कृष्णसारथिः ।
**अभ्यासघाती सन्दृश्यो दुर्जयः सर्वराजभिः** ।। २६ ।।(०३)

लक्षालङ्कारः- तयोः सौन्दर्यवान् इत्यत्र तयोः भीमार्जुनयोः विधेयः इदं कुर्विति विधातुं योग्यः किङ्कर इत्यर्थः । 'विधेयः किङ्कर मतः' इत्यमरः ।

**भीमार्जुनाभ्यां योधाभ्यामास्थितः कृष्णसारथिः ।**

---

(for चैव); (४) मोचयामास; बन्धनं; बधनात्; पार्थिवान् (for बान्ध०); .

(०१) (१) तं (for ते); ते वै कृष्णं रत्नभाजं; (२) रत्नार्हाः; चैव पार्थिवाः; आभासा पृथिवी०धराः; (३) पूजयां०; राजानं (for राजानश्); (४) रक्षिता (for मो); च महद्भ० (for महतो भं);

(०२) (१) अच्युतः सत्वसम्पन्नो; सर्वं; शज्ञसम्भिन्नो; (२) वाजिभिः (for राज); .

(०३) (१) यस्तु; यश्च; तस्य; योः तयोः (for यः स); सोदर्यवन्; सौदर्यवान्; सौदर्यवान्; सोदर्ययोर् (for सोदर्यवान्); समो दर्पवान्नाम; यश्चासौ बीर्यवान्नाम; (२) द्वियोधीः दुर्योधः; विधेयः (for द्वियोधः); अर्जुनः (for कृष्णं); (३) अभ्याशसाति; ; अभ्याशघाती; सन्दृष्टो; सदृशो; संस्पृश्यो (for सन्दृश्यो); अधृक्षः शत्रुसङ्घातैर्; अम्यासर्वाती सदृशो; शुशुभे रथवर्योसौ; अभ्याशायाति मुख्योसौ; अभ्यायत्याव०भिमुखो; (४) सह राजभिः; सर्वधन्विभिः; सर्वशत्रुघ्निः (forराजभिः); .

शुशुभे रथवर्योऽसौ दुर्जयः सर्वधन्विभिः ।। २७ ।।(०१)

शक्रविष्णू हि सङ्ग्रामे चेरतुस्तारकामये ।
रथेन तेन वै कृष्ण उपारुह्य ययौ तदा ।। २८ ।।(०२)

लक्षालङ्कारः-चेरतुः तारकामय इत्यत्र शक्रविष्णू इन्द्रोपेन्द्रौ शत्रुनेत्रतारकाणामामयो यस्मात्तस्मिन् देवासुरसङ्ग्रामे येन रथेन चेरतुः तेनेति सम्बन्धः ।

एवमेतौ महाबाहू तदा दुष्करकारिणौ ।
कृष्णप्रणीतौ लोकेऽस्मिन् रथे को दुष्टुमर्हति ।। २९ ।।(०३)

इत्यवोचन्व्रजन्तं तं जरासन्धपुरालयाः ।
वासुदेवं नरश्रेष्ठं युक्तं वायुजवैर्हयैः ।। ३० ।।(०४)

तप्तचामीकराभेण किङ्किणीजालमालिना ।
मेघनिर्घोषनादेन जैत्रेणामित्रघातिना ।। ३१ ।।(०५)

येन शक्रो दानवानां जघान नवतीर्नव ।
तं प्राप्य समहृष्यन्त रथं ते पुरुषर्षभाः ।। ३२ ।।(०६)

ततः कृष्णं महाबाहुं भ्रातृभ्यां सहितं तदा ।
रथस्थं मागधा दृष्ट्वा समपद्यन्त विस्मिताः ।। ३३ ।।(०७)

---

(०१) (१) वीराभ्यां; यौधाभ्यां; (२) सहितः (for आस्थितः); (३) अभ्यासघाती सन्दृश्यो; (४) सर्वराजभिः; ०सारथिः (for ०धन्विभिः); .

(०२) (१) (ए)तेन; येन (तेन); वै; (अ)यं; यं (for तं); तं कृष्णम्; कृष्णस्तम्; कृष्णस्तु; कृष्णः स; तं कृष्णाम् (for तं कृष्ण); कृष्णो रथवरं तं वै; (४) उप०; समाः तूपा (for उपा०); (उ) पयात्तदा (for ययौ तदा); .

(०३) (१) मेतान् (for मेतौ); तावेक(त)स्मिन् (for तौ लोके स्मिन्);

(०४) (१) पुनस्तत्वं (for व्रजन्तं तं);

(०५) (१) कराभेन; करां (करा) तेन; (४) जैत्रिणा (for जैत्रेणा); .

(०६) (२) जघान दशतीर्दश; अनीकानि जघान सः; (३) समदृश्यन्त; (४) र्षभ (for र्षभाः); .

(०७) (१) ततः कृष्ण महाबाहो; (३) रथस्थौ; स्थान्; माधवं (for मागधा);

हयैर्दिव्यैः समायुक्तो रथो वायुसमो जवे ।
अधिष्ठितः स शुशुभे कृष्णेनातीव भारत ।। ३४ ।।(०१)

असङ्गो देवविहितस्तस्मिन् रथवरे ध्वजः ।
योजनाद्ददृशे श्रीमानिन्द्रायुधसमप्रभः ।। ३५ ।।(०२)

चिन्तयामास कृष्णोऽथ गरुत्मन्तं स चाभ्ययात् ।
क्षणे तस्मिन्स तेनासीच्चैत्ये यूप इवोच्छ्रितः ।। ३६ ।।(०३)

लक्षालङ्कारः-क्षणे तस्मिन् इत्यत्र चैत्ये बद्धभूमिके यूपे देवालयध्वज इत्यर्थः ।

व्यादितास्यैर्महानादैः सह भूतैर्ध्वजालयैः ।
तस्मिन्रथवरे तस्थौ गरुत्मान्पन्नगाशनः ।। ३७ ।।(०४)

दुर्निरीक्ष्यो हि भूतानां तेजसाभ्यधिकं बभौ ।
आदित्य इव मध्याह्ने सहस्रकिरणावृतः ।। ३८ ।।(०५)

न स सज्जति वृक्षेषु शस्त्रैश्चापि न विध्यते(रिष्यते) ।
दिव्यो ध्वजवरो राजन्दृश्यते चेह मानुषैः ।। ३९ ।।(०६)

---

(४) विस्मयं (for विस्मिताः); .

(०१) (२) वातसमो (मैर्); (३) युधिष्ठिरः (for अधिष्ठितः); तु (for स); (४) नानाभातीव भारत;

(०२) (१) असङ्गो (for असङ्गी); असङ्गिने च विहितस्;
(३) योजनान् (for ०नाद्); दृश्यते (for ददृशे); स योजनद्वये दृश्यः (०श्यात्);
(४) श्रीमानिंद्रारयुधप्रभः (०द्रध्वजोपमः); .

(०३) (१) कृष्णोपि; कृष्णोघ; कृष्णाय (for कृष्णोऽथ); (२) गरूत्मानं; च साभ्ययात्; स चाम्भगात; (३) गते नासीच्; स तत्रासीचू (त्रासौ) , (for स ते नासीचू); क्षणेन तस्मिंस्तेनासौ; क्षणे तस्मिंस्तु तेनासौ; (४) चैत्ययूपम्; चैत्य यूप; चैत्ये यूप; चैद्ययूप; चैत्यवृक्ष; यूथ; इवोच्छ्रितं; च्छृतः; त्थितः (for ०च्छ्रितः); .

(०४) (१) व्यादि (धि) तास्यो (०स्या); व्यादितस्यैर्; महानादः; (२) सर्व०; महद् (for सह); सूतैर् (for भू); सम्भूतैर्दिविजालयैः; (३) तस्थौ तस्मिन्; वररथे; .

(०५) (१) दुर्निरीक्षो; (ऽ)थ; (ऽ)सि (for हि); (२) सुपर्णो (for तेजसा); (अ) प्यधिकं; (अ) भ्यधिको; (अ)त्यधिकं; (४) ०णान्वितः; ०णो वृतः; .

(०६) (१) सर्जति; सज्यति; (२) वा (for च); भिद्यते; न छिद्यते; न दीर्यां (य) ते; न हन्यते;

तमास्थाय रथं दिव्यं पर्जन्यसमनिःस्वनम् ।
**निर्ययौ पुरुषव्याघ्रः पाण्डवाभ्यां सहाच्युतः** ।। ४० ।।[०१]

यं लेभे वासवाद्राजा वसुस्तस्माद्बृहद्रथः।
**बृहद्रथात्क्रमेणैव प्राप्तो बार्हद्रथं नृप** ।। ४१ ।।[०२]

स निर्याय महाबाहुः पुण्डरीकेक्षणस्ततः ।
**गिरिव्रजाद्बहिस्तस्थौ समदेशे महायशाः** ।। ४२ ।।[०३]

तत्रैनं नागराः सर्वे सत्कारेणाभ्ययुस्तदा ।
**ब्राह्मणप्रमुखा राजन्विधिदृष्टेन कर्मणा** ।। ४३ ।।[०४]

बन्धनाद्विप्रमुक्ताश्च राजानो मधुसूदनम् ।
**पूजयामासुरूचुश्च स्तुतिपूर्वमिदं वचः** ।। ४४ ।।[०५]

राजानः-

नैतच्चित्रं महाबाहो त्वयि देवकिनन्दने ।
**भीमार्जुनबलोपेते धर्मस्य प्रतिपालनम्** ।। ४५ ।।[०६]

---

निरस्यते (०ति); न विध्यते; न धृष्यते; न शिष्यति; निरीक्ष्यते; न रिष्यते; शस्त्रैश्चामरतेन वै; शस्त्रैश्च न विशस्यते; (३) दिव्यौ; रथवरो (०चरो) (for ध्वजवरो); दिव्यौ ध्वजवरौ राजन्; (४) चेह; चैव (for देव०); .

(०१)(२) निःस्वनं; पर्जन्य इव निस्वनं; (३) पुरुषव्याघ्र; पुण्डरीकाक्षः (०क्ष; क्ष); .

(०२) (१) राजन् (for राजा); (३) श्रमेण (for क्रमेण); (अ)पि; (ए)नं (for (ए)व); (४) नृपः, नृप (for नृपम्); व्याप्तो बार्हद्रथो नृपः; प्राप्तो बार्ह (बृह) द्रथो रथं; .

(०३) (१) स निर्या (चक्राम); निश्चक्राम (for स निर्ययौ); (२) प्रभुः; तदा; तथा (for ततः); पुण्डरीकनिभेक्षणः; (४) सम०; सह (for समे); ०तपाः; ०मना (for यशाः); .

(०४) (१) मागधाः (for नागराः); (२) (अ)त्ययुसू; ययुस् (for (अ)भ्ययुस्); (४) यथा (for विधि); .

(०५) (१) विप्रयुक्ताश्च; तु (for च); (२) राजानं; (३) ऊचुस्तु; अव्यग्रं; (४) सामं; स्तुति; साधु (for सान्त्व०); .

(०६) (२) नन्दने; देवकीनन्दने त्वयि; (३) पेतो (for पेते); (४) स्वधर्म (for धर्मस्य); प्रतिपालनं; प्रतिपादनं; .

जरासन्धह्रदे घोरे दुःखपङ्के निमज्जताम् ।
**राज्ञां समभ्युद्धरणं यदिदं कृतमद्य वै** ॥ ४६ ॥(०१)

विष्णो समवसन्नानां गिरिदुर्गे सुदारुणे ।
**दिष्ट्या मोक्षाद्यशो दीप्तमाप्तं ते यदुनन्दन** ॥ ४७ ॥(०२)

किं कुर्मः पुरुषव्याघ्र शाधि नः प्रणतिस्थितान् ।
**कृतमित्येव तद्विद्धि नृपैर्यद्यपि दुष्करम्** ॥ ४८ ॥(०३)

**वैशम्पायनः-**

तानुवाच हृषीकेशः समाश्वास्य महामनाः ।
**युधिष्ठिरो राजसूयं क्रतुमाहर्तुमिच्छति** ॥ ४९ ॥(०४)

तस्य धर्मप्रवृत्तस्य पार्थिवत्वं चिकीर्षतः ।
**सर्वैर्भवद्भिर्विज्ञाय साहाय्यं क्रियतामिति** ॥ ५० ॥(०५)

ततः सुप्रीतमनसस्ते नृपा नृपसत्तम ।
**तथेत्येवाब्रुवन्सर्वे प्रतिगृह्यास्य तां गिरम्** ॥ ५१ ॥(०६)

---

(०१) (१) जरासन्धे (for सन्ध); भये; ०हरे (for ह्रदे); लोके (for घोरे); जरासन्धाभिभूतानां;
(३) राज्ञा (for राज्ञां); राज्ञामुद्धरणं देव; राज्ञां चोद्धरणं वीर;
(४) यदद्य (for यदिदं); वै; मे (for ते); .

(०२) (१)क- राज्ञां; विष्णोः; समवपन्नानां; मग्नानां; रुद्धानां; समुपसन्नानां;
(२) दुर्गेषु दारुणे; दुर्गो सुदाज्रुणो; (३) दिष्द्वा; मुख्याद् (for मोक्षाद्);
(४) भ्राजते (for आप्तं ते); पुरुषर्षभ; यदुनन्दन (for पुरुषो); आहृतं ते नरोत्तम; .

(०३) (१) कुर्म, (२) बुवीहि पुरुषोत्तम; ब्रूहि त्वं पुरुषर्षभ; शाधि नः प्रणति (त) स्थितान्; ब्रूहि नो यदुनन्दन; समाज्ञापय नः प्रभो; (३) जितम् (for कृतम्); तद्विद्धि; ते ज्ञेयं; जानीहि; तं ज्ञेयं; (४) यद्यपि स्यात् (यद्यस्माकं) सुदुष्करं (ष्कृतं); .

(०४) (२) बलः; यशाः; मनः; ०त्मनाः (for ०मनाः); .

(०५) (२) साम्राज्यत्वं (for पार्थिवत्वं); पार्थिवांश्च जिगीषतः; (३) सर्वे (for सर्वैर्); यज्ञाथं; यज्ञाय; विज्ञाय; यज्ञेर्थे; (४) साहतं (for साहाय्यं); क्रिय (for दीय०); .

(०६) (१) तं प्रीत; ते प्रीतं; सुप्रीतं; प्रसन्नं (for प्रतीत); (२) नृपा वै (for ते नृपा); नृपसत्तम (for भरत); (३) तथेत्यवा; तथान्ये चा; तं त (तत्त) थेत्य० (for तथेत्येवा); (४) जग्मुश्च; जहुश्च;

रत्नभाजं च दाशार्हं चक्रुस्ते पृथिवीश्वराः ।
**कृच्छ्राज्जग्राह गोविन्दस्तेषां तदनुकम्पया ।। ५२ ।।**(०१)

जरासन्धात्मजश्चैव सहदेवो महामनाः ।
**निर्ययौ सजनामात्यः पुरस्कृत्य पुरोहितम् ।। ५३ ।।**(०२)

स नीचैः प्रणतो भूत्वा बहुरत्नपुरोगमः ।
**सहदेवो नृणां देवं वासुदेवमुपस्थितः ।। ५४ ।।**(०३)

सहदेवः

यत्कृतं पुरुषव्याघ्र मम पित्रा जनार्दन ।
**तत्ते हृदि महाबाहो न कार्यं पुरुषोत्तम ।। ५५ ।।**

त्वां प्रपन्नोऽस्मि गोविन्द प्रसादं कुरु मे प्रभो ।
**पितुरिच्छामि संस्कारं कर्तुं देवकिनन्दन ।। ५६ ।।**

त्वत्तोऽभ्यनुज्ञां सम्प्राप्य भीमसेनात्तथार्जुनात् ।
**निर्भयो विचरिष्यामि यथाकामं यथासुखम् ।। ५७ ।।**

वैशम्पायनः

एवं विज्ञाप्यमानस्य सहदेवस्य मारिष।
**प्रहृष्टो देवकीपुत्रः पाण्डवौ च महारथौ ।**
**क्रियतां संस्क्रिया राजन्पितुस्त इति चाब्रुवन् ।। ५८ ।।**

---

गृह्य च; गृह्यास्य; ०गृह्य तु; पूज्य तु (for ०जबुश् ण; ; तं (for तां); गिरः; गिरा; गिरि (for गिरम्); .

(०१) (१) भाञन (for आजं च); (२) नृपपुङ्गवाः (for पृथिवी); (३) कृत्स्ना (०च्छ्रा०); दाशार्हस् (for गोविन्दस्); तेषां तत्; .

(०२)(२) ०मगः; बलः; त्मनाः (for ०रथः); (३) निर्जयो (for निर्ययौ); सज्जना; च सहा; स्वजना (for सजना); .

(०३) (१) प्राञ्जलि०; समीचै; सचिवैः (for स नीचैः); प्रसृतो; प्रणतो; प्रस्रतो (for प्रशिो); (२) बलि०(बली) (for बहु); समागताः; पुरस्कृतः; समन्वितः; पुरोगमाः; (३) उपस्थितं; .

तच्छ्रुत्वा वासुदेवस्य पार्थयोश्च स मागधः ।
प्रविश्य नगरं तूर्णं सह मन्त्रिभिरप्युत ॥ ५९ ॥

चितां चन्दनकाष्ठैश्च कालेयसरलैस्तथा ।
कालागुरुसुगन्धैश्च तैलैश्च विविधैरपि ॥ ६० ॥

घृतधाराक्षतैश्चैव सुमनोभिश्च मागधम् ।
समन्तादवकीर्यन्त दह्यन्तं मगधाधिपम् ॥ ६१ ॥

उदकं तस्य चक्रेऽथ सहदेवः सहानुजः ॥ ६२ ॥

कृत्वा पितुः स्वर्गगतिं निर्ययौ यत्र केशवः ।
पाण्डवौ च महाभागौ भीमसेनार्जुनावुभौ ।
स प्रह्वः प्राञ्जलिर्भूत्वा विज्ञापयत माधवम् ॥ ६३ ॥

सहदेवः

इमे रत्नानि भूरीणि गोऽजाविमहिषादयः
हस्तिनोऽश्वाश्च गोविन्द वासांसि विविधानि च ॥ ६४ ॥

दीयतां धर्मराजाय यथा वा मन्यते भवान् ॥ ६५ ॥

वैशम्पायनः-

भयार्ताय ततस्तस्मै कृष्णो दत्त्वाभयं तदा ।
अभ्यषिञ्चत तत्रैव जरासन्धात्मजं मुदा ॥ ६६ ॥(०१)

मागधानां महीपालं जरासन्धात्मजं तदा ।
आददेऽस्य महार्हाणि रत्नानि पुरुषोत्तमः ॥ ६७ ॥(०२)

---

(०१) (अ)भयं; तदा; तथा (for ततस्); (२) दत्वा कृष्णो; ततस्तदा; तथा (for तदा); दत्वा विष्णस्तथाभयं; .

(०२) (३) आददद्वै; आदत्तास्य; आदिदेश; आददे स; वस्त्राणि (for रत्नानि); ), अभिषिच्य च (षिञ्च्य च; ०षिच्यत); अभ्याषिञ्चत; तत्रैवं; तत्रैनं, वै राजन्; राजानं (for तत्रैव); सहदेवं जनार्दनः मागधानां महीपालं; , ( मागधानां; ) , (४) नृपं; मुदा; तथा (for तदा); .

गत्वैकत्वं च कृष्णेन पार्थाभ्यां चैव सत्कृतः ।
विवेश राजा द्युतिमान्बार्हद्रथपुरं नृप ।। ६८ ।।(०१)

लक्षालङ्कारः- गत्वैकत्वम् इत्यत्र एकत्वम् ऐकमत्यम्

अभिषिक्तो महाबाहुर्जारासन्धिर्महात्मभिः ।

पार्थाभ्यां सहितः कृष्णः सर्वैश्च वसुधाधिपैः ।
यथावयस्समागम्य विससर्ज नराधिपान् ।। ६९ ।।

विसृज्य सर्वान्नृपतीन्राजसूये महात्मभिः ।
आगन्तव्यं भवद्भिस्तु धर्मराजप्रियेप्सुभिः ।। ७० ।।

एवमुक्ता माधवेन सर्वे ते वसुधाधिपाः ।
एवमस्त्विति चाप्युक्त्वा समेताः परया मुदा ।। ७१ ।।

भीमार्जुनहृषीकेशः प्रहृष्टाः प्रययुस्सह ।
रत्नान्यादाय भूरीणि ज्वलन्तो रिपुसूदनाः।
कृष्णस्तु सह पार्थाभ्यां श्रिया परमया युतः ।। ७२ ।।
रत्नान्यादाय भूरीणि प्रययौ पुरुषर्षभः ।(०२)

इन्द्रप्रस्थमुपागम्य पाण्डवाभ्यां सहाच्युतः ।
समेत्य धर्मराजानं प्रीयमाणोऽभ्यभाषत ।। ७३ ।।(०३)

---

(०१) (१) साध्यकत्वं; गत्वैकत्वं; हि; स (for च); (२) चापि (for चैव); च नमस्कृतः (for चैव सत्कृतः); (३) राजा द्युतिमान्; मतिमाञ्राजा; (जन्); विवेश सहदारोपि; (४) तदा (for पुनर्); बार्हद्रथपुरःसरः; बार्हद्रथपुरं पुनः; नृप (for पुरम्);

(०२) (२) युतः (for ज्वलन्); (४) पुरुषर्षभः; च (सन्०; स) नृपैः सह (for पुष्करे०); .

(०३) (१) अथागम्य; समासाद्य; समागम्य (त्य); तु सङ्गम्य (for उपागम्य); (२) भ्रातृभ्यां सहितो (०ते)च्युतः; (३) ०राजं च; ०राजेन (for ०राजानं); (४) ०माणमव (०सम) र्धयत्; कृरणोवर्धयत प्रभुं; प्रियमाणमभाषत; प्रीयमाणमुपस्थित (ताः); माण उपस्थितः; .

दिष्ट्या भीमेन बलवाञ्जरासन्धो निपातितः ।
राजानो मोक्षिताश्चैव बन्धनान्नृपसत्तम ॥ ७४ ॥(०१)

दिष्ट्या कुशलिनौ चेमौ भीमसेनधनञ्जयौ ।
पुनः स्वनगरं प्राप्तावक्षताविति भारत ॥ ७५ ॥(०२)

ततो युधिष्ठिरः कृष्णं पूजयित्वा यथार्हतः ।
भीमसेनार्जुनौ चैव प्रहृष्टः परिषस्वजे ॥ ७६ ॥(०३)

ततः क्षीणे जरासन्धे भ्रातृभ्यां विहितं जयम् ।
अजातशत्रुरासाद्य मुमुदे भ्रातृभिः सह ॥ ७७ ॥(०४)

हृष्टश्च धर्मराज वाक्यं जनार्दनमभाषत ॥ ७८ ॥

युधिष्ठिरः

त्वां प्राप्य पुरुषव्याघ्र भीमसेनेन पातितः
मागधोऽसौ बलोन्मत्तो जरासन्धः प्रतापवान् ॥ ७९ ॥

राजसूयं क्रतुश्रेष्ठं प्राप्स्यामि विगतज्वरः ।
त्वद्बुद्धिबलमाश्रित्य यागार्होऽस्मि जनार्दन ॥ ८० ॥

पीतं पृथिव्यां युद्धेन यशस्ते पुरुषोत्तम ।
जरासन्धवधेनैव प्राप्तास्ते विपुलाः श्रियः।

लक्षालङ्कारः-पीतम् इत्यत्र पृथिव्या भूमण्डलाख्यकुण्डेन कुम्भेन । दिगन्तविश्रान्ता कीर्तिः सम्पादितेति भावः ।

---

(०१) (१) श्रीभगवान्; युधिष्ठिरः दिष्ढ्या; त्वयैव (for भीमेन); (३) मोचिताश् (for मोक्षिताश्); सर्वे; चैव; ये मे (for चेमे); (४) च महाभुज; ; नृपसत्तमाः; .

(०२) (१) दृष्ट्या; चोभौ; भीमौ; वेमौ; हीमौ (for चेमौ); ०विव माधव (for ०विति भारत); .

(०३) (२) जनार्दनं; यथार्हतं; पूजयामास भारत; (४) षष्वजे; सस्वजे; .

(०४) (१) तस्मिन्हते जरासन्धे; (२) भ्रातृभिर् (for भ्यां); सहितं जयं; सहितो हरिः (रिं); विस्मयं जयं (for विहितं जयम्); जयः; (३) शत्रुमा० (for ०शत्रुरा०); .

वैशम्पायनः

**एवं सम्भाष्य कौन्तेयः प्रादाद्रथवरं प्रभोः ।। ८१ ।।**

प्रतिगृह्य तु गोविन्दो जरासन्धस्य तं रथम् ।
**प्रहृष्टस्तस्य मुमुदे फाल्गुनेन जनार्दनः ।। ८२ ।।**

प्रीतिमानभवद्राजन्धर्मराजपुरस्कृतः ।। ८३ ।।

यथावयः समागम्य भ्रातृभिः सह पाण्डवः ।
**सत्कृत्य पूजयित्वा च विससर्ज नराधिपान् ।। ८४ ।।(०१)**

युधिष्ठिराभ्यनुज्ञातास्ते नृपा हृष्टमानसाः ।
**जग्मुः स्वदेशांस्त्वरिता यानैरुच्चावचैस्ततः ।। ८५ ।।(०२)**

एवं पुरुषशार्दूलो महाबुद्धिर्जनार्दनः ।
**पाण्डवैर्घातयामास जरासन्धमरिं तदा ।। ८६ ।।(०३)**

घातयित्वा जरासन्धं बुद्धिपूर्वमरिन्दमः ।
**धर्मराजमनुज्ञाप्य पृथां कृष्णां च भारत ।। ८७ ।।(०४)**

सुभद्रां भीमसेनं च फाल्गुनं यमजौ तथा ।
**धौम्यमामन्त्रयित्वा च प्रययौ स्वां पुरीं प्रति ।। ८८ ।।(०५)**

---

(०१) (१) यथा च यैः; स यथावत् (for यथावयः); समासाद्य; च सं (समा; स सं) भाष्य; यथावयस्य सम्भाष्य; (२) भ्रातृभिः (for राजभिः); सह; चैव (for तैश्च); पाण्डवैः; ० प्रेष्णा राजा (०जन्) नृपैः सह; (३) संहृष्य; संहृत्य; सत्कृत्वा (for सत्कृत्य); तु (for च); (४) नराधिपः; प;
(०२) (२) सर्वे (for नृपा); (३) स्वदेशं;
(४) यज्ञैर् (for यानैर्); बहुविधैस् (for उच्चावचैस्); तदा; अपि; तथा (for ततः); .
(०३) (१)वैशं; एवं स पुरुषव्याघ्रो; (३) पातं (for घात); (४) अरिं तथा; अरिन्दम; .
(०४) (१) याज; पात (for घातं); तु (for तु) तं कृष्णो (for जरा); (२) अरिन्दम; अरिं नदा; अरिन्दमं; (३) अनुप्राप्य; अनाज्ञप्य; (४) तथा (for पृथां); जनार्दनः (for च भारत); .
(०५) (१) भद्रसेनं च; वासुदेवस्तु (for भीमसेनं च); (२) फाल्गुनं (फल्गुणं; फाल्गुनौ; च यमौ (for यमजौ); (३) सम्यग् (for धौम्यम्); नमस्कृत्य ततः; आमन्त्र्य भगवान्;

पाण्डवैरनुधावद्भिः युधिष्ठिरपुरोगमैः ।
हर्षेण महता युक्तः प्राप्य चानुत्तमं यशः ।
जगाम हृष्टः कृष्णस्तु पुनर्द्वारवतीं पुरीम् ।। ८९ ।।(०१)

तेनैव रथमुख्येन मनसस्तुल्यगामिना ।
धर्मराजविसृष्टेन दिव्येनानादयन्दिशः ।। ९० ।।(०२)

ततो युधिष्ठिरमुखाः पाण्डवा भरतर्षभ ।
प्रदक्षिणमकुर्वन्त कृष्णमक्लिष्टकारिणम् ।। ९१ ।।(०३)

ततो गते भगवति कृष्णे देवकिनन्दने ।
जयं लब्ध्वा सुविपुलं राज्ञां दत्त्वाभयं तदा ।। ९२ ।।(०४)

संवर्धितं यशो भूयः कर्मणा तेन भारत ।
द्रौपद्याः पाण्डवा राजन्परां प्रीतिमवर्धयन् ।। ९३ ।।(०५)

तस्मिन्काले तु यद्युक्तं धर्मकामार्थसंहितम् ।

---

भीममनुज्ञा (०प्रा) प्य (for आमन्त्रयित्वा च); (अ)थ (for च);
(४) नगरं; स्वषुरं; स्वपुरीं; द्वारकां (for स्वां पुरीं); .
(०१) (१) यातश्च; ०यायद्भिर् (for ०धावद्भिर्); प्राप्तश् (for प्राप्य);
(३) युक्तः (for हृष्टः), प्रति (for पुरीम्); ).
(०२) (१) ०बर्हेण (for ०मुख्येन); (२) मनसस्तुल्यगामिना;
(३) धर्मराजा (०ज्ञा) तिसृष्टेन; ०राजनिसृ०; ०राजाविसृ०; ०राजाभिमृ०; ०राजा प्रसृ;
(४) नादयन्; (आ)नन्द० (for (आ)नाद).
(०३) (३) प्रदक्षिणाम्; अवर्तत; अकुर्वति; अथा (तदा; तथा) कुर्वन् (for अकुर्वन्त);
(४) ०कारिणः; .
(०४) (१) ततौ जिष्णौ (for ततो गते); (२) देवकीनन्दने तदा (तथा); (३) तु; च (for सु);
(४) अभयदं; अभयतस्; अभयदसू (for अभयदासू); तदः; ततः; तथा (for तदा); राज्ञां (ज्ञो; ०ज्ञा) दत्वाभयं तदा; राज्ञामभयदे हरौ; .
(०५) (१) संवर्धितौजसौ; ०र्धितं (०र्धित०) यशो; संवृद्धस्तेजसा; संवर्धतौजसे; (३) द्रौप.द्या; (४) प्रचक्रिरे (for अवर्धयन्); .

**तद्राजा धर्मतश्चक्रे प्रजापालनकीर्तनम् ।। ९४ ।।**(०१)

## अस्मिन् पर्वाणि २३अध्याये ९४ श्लोकाः सन्ति

जरासन्धवधपर्वणि (३) तृतीयोऽध्यायः ।

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि जरासन्धवधपर्वणि जरासन्धवधे त्रयोविंशोऽध्यायः।। २३।।

( समाप्तं चेदं जरासन्धवधपर्व)

---

(०१) (१) कालेषु (for काले तु); पुत्रद्युक्तं; तु तद्युक्तं; तु सम्प्राप्ते (प्तं); (२) संयुतं; (३) धर्मजश् (for ०तश्); तद्बेजे धर्मराजश्च; तद्राज्यं धर्मजश्चक्रे; (४) राज्यपालश्च कीर्तिमान्; प्रजापालनकी०; प्रजापालनकीर्तनं (०नमेव च); राज्यपालनमेव च; राज्यं प्राप्य युधिष्ठिरः; राज्यं प्रथित (पालन) कीर्तिमान्;